अथनारायणभाष्यं

१

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ हरिः ॐ ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधी-
तमस्तु मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥ विचार्य सर्ववेदांतैः संचार्य हृदयांबुजे ॥ प्रचार्य सर्वलोकेषु आचा-
र्यं शंकरं भजे ॥ १ ॥ पद्मपादो विश्वरूपो हस्तामलकत्रोटकौ ॥ अद्वैतदीक्षागुरवः स्वाचार्याः पांतु मां ॥ २ ॥ नारायणेंद्रपादा-
ब्जं विश्वेश्वरचरणांबुजं ॥ नृसिंहेंद्रपदांभोजं कैवल्येंद्रपदांबुजं ॥ ३ ॥ एतानि परमाणि चत्वारि हृदयांबुजे ॥ मामकीने प्रकाशंतां
भुक्तिमुक्तिप्रसिद्धये ॥ ४ ॥ नमो नमः कारणकारणात्मने नमो नमो मंगलमंगलात्मने ॥ नमो नमो वेदविदां मनीषिणामुपा-
सनीयाय नमो नमस्ते ॥ ५ ॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ ६ ॥ वारुण्युप-
निषत्का ब्रह्मविद्यासाधना । याज्ञिक्यां खिलरूपासा सर्वत्रोपाभिधीयते ॥ ७ ॥ यथा बृहदारण्यके सप्तमाष्टमाध्यायौ खिल-
काउत्वेन आचार्यैरुदाहृतौ ॥ तथैव नारायणी व्याख्याया याज्ञिक्युपनिषदपि खिलकाउरूपा । तल्लक्षणोपेतत्वात् । कर्मोपासनाब्रह्मतत्व-
ज्ञानेषु किंचिद्वशिष्टं तस्य सर्वस्याभिधानेन प्रकीर्णकरूपखिलत्वं । बृहदारण्यके सप्तमाध्याये पूर्णमदः पूर्णमित्यादिना ब्रह्मतत्वमभि-
हितं ॐ खं ब्रह्मेत्यादिभिरष्टमाध्यायगतैः सह यो वै ज्येष्ठं च श्रेष्ठं च वेदेत्यादिभिर्वाक्यैर्नानाविधान्युपासनानि अभिहितानि । स यः काम-
येत महत्प्राप्नुयामित्यादिना मंथाख्यं कर्माभिहितं । तथा पुत्रविषयादिकामनायुक्तानां तत्कर्माण्यभिहितानि एवमत्रापि अंभस्यपार इत्यादिना

ब्रह्मतत्वमभिहितं। आदित्यो वा एष एतन्मंडलमित्यादिनोपासनमभिहितं। भूरन्नमग्नये पृथिव्यै स्वाहा इत्यादिना कर्माण्यभिहितानि

तत्र कर्मणां बाहुल्यात् याज्ञिकीत्युच्यते। उपक्रमे ब्रह्मतत्त्वाभिधानादुपसंहारे ब्रह्मज्ञानसाधनानां सत्यादीनां संन्यासांतानामभिधानादुपनि

षदित्युच्यते। तदीयपाठसंप्रदायस्तु देशविशेषेषु बहुविधमुपलभ्यते। तत्र यद्यपि शाखाभेदः कारणं। तथापि तैत्तिरीयशाखाध्यायकैस्त
त्तद्देशनिवासिभिः शिष्टैरादृतत्वात्सर्वोपि पाठ उपादेय एव। तत्र द्राविडानां चतुःषष्ट्यनुवाकक्रमपाठः। आंध्राणामशीत्यनुवाकपाठः
कार्नाटकेषु केषांचित् चतुःसप्ततिपाठः। अपरेषां नवाशीतिपाठः। तत्र वयं पाठांतराणि यथासंभवं सूचयंतः अशीत्यनुवाकपाठं प्रा
धान्येन व्याख्यास्यामः। प्रथमानुवाकस्यादौ कश्चिदृचो ब्रह्मतत्त्वं प्रतिपादयंति। तासु प्रथमामृचमाह। ॐ। अंभस्य पारे भुवनस्य म
ध्ये नाकस्य पृष्ठे महतो महीयान्॥ शुक्रेण ज्योतीꣳषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अंतरिति। अंभस्य बहुविधस्य समुद्र
मध्यवर्ति जलस्य पारे तीरे यो महान्क्रौंचो लोकालोकपर्वतादिस्ततोपि महीयान् महत्तरोयं महेश्वरः। तथा भुवनस्य भूलोकस्य म
ध्ये यो मेर्वादिस्ततोपि महत्तरः। नाकस्य पृष्ठे स्वर्गस्योपरि यो महान् ब्रह्मलोकादिस्ततोपि महत्तरः। तथा च छंदोगा आमनंति
ज्यायान्पृथिव्या ज्यायानंतरिक्षात्। ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः इति। स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः

स उत्तरतः स एवेदं सर्वमिति च स परमेश्वरः शुक्रेण भासकेन जीवचैतन्यरूपेण ज्योतीꣳषि निर्मलत्वेन भासकान्यंतःकरणानि सम्यगनुप्र

यिरः। तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः। गर्भे ब्रह्मांडरूपे तन्मध्ये प्रजापतिर्विराड्रूपो भूत्वा चरति प्रवर्त्तते। विराड्रूपमाथर्वणिका आमनंति। अग्नि
मूर्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः॥ वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवीत्यादि। अग्निः प्रकोशयुक्तो द्युलोकः। सर्वव्यापी प
रमेश्वरो वस्तुतस्तथाविध एव सन्मायावशाद्देहेषु जीवरूपेण ब्रह्मांडेषु विराड्रूपेण वा अवस्थित इत्यर्थः। द्वितीयामृचमाह। यस्मिन्निदं ९ संच
वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः। तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्निति। इदं सर्वं जगद्यस्मिन्नव्याकृते मूलकारणे सम
ति च व्येति च सृष्टिकाले समुत्पन्नं सत्संगतमपि भवति चांचेतिपागेस्त्र स्वमपि प्राप्नोतिव्याख्येयं। व्यत्यये न वा संगतं इति द्रष्टव्यं। संहारका
काले विलीनं संहृतगतमपि भवति अधि अधिका। हिरण्यगर्भविराडादयो ऽग्नींद्रादयश्च सर्वे देवाः विश्वे सर्वे यस्मिन्नव्याकृते मूलकारणे
निषेदुः। नितरां आश्रित्यावस्थिताः। तदेव स्थितिसंहारयोर्देवानां चाधारभूतमव्याकृतमेव भूतमतीतं जगद्भव्यं भविष्यज्जगदिदं वर्तमा
नमपि जगत्तदुत तदेवाव्याकृतमेवेत्यर्थः। आइत्यार्षं रूपं प्रसिद्धिर्वायस्यार्थः। तस्मादक्षरमव्याकृतं अक्षरे विनाशरहिते परमे उत्कृष्टे व्योमन्ना
काशावकाशे तत्परमात्मनि वर्तत इति शेषः। तृतीयामृचमाह। येनावृतं खं च दिवं मही च येनादित्यस्तपति तेजसा भ्राजसा च। यमंतः
समुद्रे कवयो वयंति यदक्षरे परमे प्रजा इति॥३॥ वाजसनेयिनो गार्गिब्राह्मणे परमात्मन्याश्रितं यदव्याकृतमभिधीयते। एतस्मिन्नव
ल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति तत्पूर्ववाक्यं च्याभिहितं। अस्यां तु तेनाव्याकृतेनोपाहितं जगत्कारणत्वेन व्याप्तं अभिधीयते। अ २

अत एवोक्ताः सर्वेपि सद्रूपतया भासंते। येन परमेश्वरेणानुगृहीत आदित्यस्तेजसा स्वकीयमंडलांतर्गतं भास्वररूपेण भ्राजते सा च प्रसा
रितरश्मिरूपया दीप्त्या च तपति। सर्वमिदं जगदभितप्तं च करोति। कवयस्तत्त्वविदो यं परमात्मानमंतः समुद्रे प्रकाशितं समुद्रोपलक्षितस स
कलस्य जगतो मध्ये तं तत्त्वं निर्वर्णयंति। यथा परस्वरूपेण तं वा अनुगताः। तथा जगति ब्रह्मतत्त्वमनुगतं पश्यंति। तच्च ब्रह्मतत्त्वमक्षरे विनाशर
हिते परमे उत्कृष्टे निजस्वरूपेऽवस्थाय प्रजा उत्पादयतीति शेषः। स्वरूपेऽवस्थानं तु दोषाः प्रश्नोत्तराभ्यामामनंति। स भगवः कस्मिन्प्रतिष्ठि
त इति स्वे महिम्नीति। आधाराधेयराहित्यमेव स्वस्मिन्नवस्थानं कारणं चैतन्यमभिधीयते। तेन सच्चिद्रूपेण कारणेन स्वमंतरिक्षलोको दि
वं द्युलोको महीं भूलोकश्चैतत्सर्वमावृतं व्याप्तं च कारान्तत्तल्लोकवासिनो देहाः समुच्चीयंते। तेऽपि कारणेन व्याप्ताः। यदक्षरे इति पाठेऽपि त
च्छब्दार्थत्वेनैव व्याख्येयं। चतुर्थमाह। यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यचसर्ज भूम्यां। यदोषधीभिः पुरुषान्पशूंश्च यो विवेश
भूतानि चराचराणि इति। पूर्वमंत्रे जगत्कारणमव्याकृतोपहितं यच्चैतन्यमुक्तं तस्मादत्र जगदुत्पादनं प्रवेशनं च प्रपंच्यते। आत्मन आ
काशः संभूत इत्यारभ्यान्नात्पुरुषः इत्यंतेन ग्रंथेन पूर्वमभिहिता जगतः प्रसूतीप्रसूतिः सृष्टिरुत्पत्तिर्यस्मात् व्याकृताच्चैतन्यात्प्रसृता
प्रवृत्ता तच्चैतन्यं कारणभूतं तोयेन जलोपलक्षितेन भूतपंचकेन। जीवान्मनुष्यगवादीन् जीवदेहान्व्यसर्ज विशेषेणासृजत् भूम्यां ज

ना॰भा॰उ॰

३

गत्यां व्यंच सर्जेति पाठे पितृयेव व्याख्येयं। तथा यच्चैतन्यरूपं मायाविशिष्टं कारणमोषधीभिर्व्रीहियवादिभिरुपलक्षितं अन्नं भूत्वा पुरुषा
न्मनुष्यान्पशूंश्च तदुपलक्षितानि स्थावरजंगमशरीराणि सर्वाण्यपि प्राविवेश। वृक्षादिषु स्थावरेषु वृष्टिजलरूपेण प्रवेशः। तेनचैतन्येन सर्वंज
गत्व्याप्तमिति शेषः। पंचमीमन्त्रमाह। अतः परं नान्यदणीयसं हि परात्परं यन्महतो महान्तं॥ यदेकमव्यक्तमनंतरूपं विश्वं पुराणं तमसः पु
रस्तादिति। पूर्ववाक्योक्तेन जगत्कारणत्वाकारेणोपलक्षितं ब्रह्म स्वरूपं त्वत्र निरूप्यते। यद्ब्रह्म परात् उत्कृष्टात् हिरण्यगर्भादेरपि परमत्यंतमुत्कृष्ट
ष यच्च महतः आकाशादेर्महत्तमं। यद्यप्येकं सजातीयरहितं। अतएकमिंद्रियागम्यं। अनंतरूपं। देशकालवस्तुपरिच्छेदशून्यं विश्वं जगदा
त्मकं। पुराणमनादिसिद्धं। तमसः परस्तात् अज्ञानात्परतः वर्तते। अतो वस्तुतोन्यद्वस्तु अणीयसमत्यंतसूक्ष्मं परं उत्कृष्टं नास्तीति। विश्वं विरा
पेण यत्सर्वं जगदात्मकत्वमुक्तं। तदेतत्षष्ठी सप्तमीभ्यां ऋग्भ्यां प्रपंचयति। तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनां। इष्टापूर्तं ब
हुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः॥ तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः। तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः
इति। मनसा यथार्थवस्तुचिंतनं ऋतं। वाचा तदुच्चारणं सत्यं। एतदुभयमपि तदेव। अधिष्ठानं ब्रह्मैव कवीनां वेदशास्त्रपारंगतानां परमुत्कृ
ष्टं प्रमाणत्वेनादरणीयं यद्ब्रह्म वेदरूपं वस्तु तदपि तस्याधिष्ठानभूतं परब्रह्मात्मकमेव। इष्टं दर्शपूर्णमासादि श्रौतं कर्म। पूर्तं वापीकूपतडागा ३
दि स्मार्तं कर्म तदुभयमपि तदेव ब्रह्म तथा बहुधा जातं पूर्वकल्पजन्यं कल्यादिरूपेण बहुप्रकारमुत्पन्नं। इदानीमपि तथा जायमानं विश्वं सर्वं
जगत्॥ भुवनस्य नाभिः। चक्रनाभिवत्सर्वलोकस्याधारभूतः। परमात्मा बिभर्ति। अन[illegible] आधेयं सर्वमधिष्ठानस्वरूपमेव। अग्निवायुसूर्यचं

मसोपितदेव। तथाचारूकं दीप्यमानं नक्षत्रादिकममरनं देवैः सेव्यं पीयूषं एतदुभयमपि तदेवाधिष्ठानरूपमेव। यद्ब्रह्म हिरण्यगर्भरूपं तदपि तदधि
ष्ठानात्मकमेव। या आपो जलोपलक्षितानि पंचभूतानि। यश्च प्रजापतिर्विराड्रूपस्तदुभयमप्यधिष्ठानरूपमेव। यद्यज्जगदविद्यादृश्या
नानाविधं प्रतीयते तत्सर्वं विद्यादृश्या अखंडैकरसं ब्रह्मैव। अत एव दृष्टिद्वयमभिप्रेत्य वाजसनेयिनः समामनंति। यत्र हि द्वैतमिव भवति तदि
तर इतरं पश्यतीत्यविद्यादृष्टिः। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति विद्यादृष्टिः। ननु प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तमेति वि
ष्णुपुराणे कालस्य नित्यत्वाभिधानात् अविद्ययापि ब्रह्मरूपत्वं नास्तीत्याशंक्य। पुरा ऽस्या विद्यादृष्टिविषयत्वमभिप्रेत्य विद्यादृश्या काल
स्य ब्रह्मविवक्षया ब्रह्मणः सकाशाद् उत्पत्तिः। अष्टमीनवमीभ्यां दर्शयति। सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि॥ कला मुहूर्ताः काष्ठाश्चा
होरात्राश्च सर्वशः। अर्धमासा मासा ऋतवः संवत्सरश्च कल्पंतां। स आपः प्रदुघे उभे इमे अंतरिक्षमथो स्वः। इति। निमिर्नाम जनकस्य पूर्व
आसीत् जः [redacted] ओदो मिथिलेश्वरः इति उपनिषद्विवर्तते। देवप्रसादाद्देवस्य क्षिपक्ष्मपातेषु स वर्तते। तत एव निमेषा उच्यंते। पक्ष्मपातपरिमिताः सू
क्ष्माः कालविशेषा इत्यर्थः। ते सर्वे विद्युतः स्वयंप्रकाशमानात्पुरुषात् परिपूर्णात्परमेश्वरादधिजज्ञिरे। आधिक्येनोत्पन्नाः निमेषेभ्योऽप्यधिकाः
कालविशेषाः काष्ठास्ताभ्योऽप्यधिकाः कलास्ताभ्योऽप्यधिका मुहूर्तास्तेभ्योऽप्यधिका अहोरात्रास्तथा च पूर्वग्रंथकारैरुक्तं। अष्टादश निमेषास्तु
काष्ठा त्रिंशत्तु ताः कला। तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियां। ते तु त्रिंशदहोरात्रः पक्षस्ते दश पंच च इति। चकारावनुक्तसमुच्चयार्थौ
तेन सर्वशब्दस्य नेन स्पष्टीक्रियते लववत्रुट्यादिकाः सर्वेऽपि कालविशेषाः समुत्पन्ना इत्यर्थः। लवत्रुट्योः स्वरूपं पूर्वाचार्यैरुक्तं। नलिनीपत्रसंहत्यास्तु सूच्यग्र

भेदने। दललेद्वयः कालः स कालो लववाच्यः। लवैस्त्रुटिः स्यात्त्रिंशद्भिरिति। अर्धमासाः शुक्लकृष्णरूपा मासाश्चैत्रवैशाखाद्याः। ऋतवो वसं
तग्रीष्माद्या एते सर्वे परमेश्वरादधिजज्ञिरे। तथा संवत्सराश्च प्रभवविभवादिरूपाः कल्पन्तां। परमेश्वरादुत्पन्नाः। अत एव सप्रयोजनसमर्था
भवंति। कल्पन्तामिति बहुवचनपाठे सर्वेपि कालविशेषाः स्वस्वप्रयोजनसमर्था इति योज्यं। स परमेश्वरः स्वनिर्मितेन कालविशेषेण
उपलक्षितः सन् तत्तत्कालोचितसे[illegible]नापः। मधुघेजलोपलक्षितां। पृथिवीं दुग्धवान्। प्राणिभिरपेक्षितं भोग्यजातं पृथिव्यां संपादितवानि
त्यर्थः। तथैवांतरिक्षमिमं कं स्थानं अथो अपि च स्वः स्वर्गः परस्थानं इमे उभे आपि स्थाने प्रदुग्धवान् तयोरपि स्थानयोर्भोग्यं वस्तु संपादितवानित्यर्थः
ननु काललोकादिकारणस्य सर्वत्रानुगतत्वात्। कुतः प्राणिभिरसौ न गृह्यते इत्याशंक्य तस्य परमात्मन ऊर्ध्व इत्याद्याकारविशेषाभावात्
रूपाद्यभावाच्चेति। मंत्रद्वयेन दर्शयति। नैनमूर्ध्वं न तिर्यंचं न मध्ये परिजग्रभत्। न तस्येशे कश्चन तस्य नाम महद्यशः। न संदृशे तिष्ठति रूप
मस्य न चक्षुषा पश्यति कश्चनैनं। हृदा मनीषा मनसाभिक्लृप्तः य एनं विदुरमृतास्ते भवंति इति। कश्चिदपि पुरुषः। एनं परमात्मानं स्तं
भवत्। ऊर्ध्वाकारं उपरिस्थितशाखावत् तिर्यगाकारं वा गृहांतर्वर्ति देवदत्तवत् कश्चिन्मध्येऽवस्थितं वा न परिजग्रभत्। नैव परिगृह्णा
ति। ऊर्ध्वाद्याकाराणां तस्मिन्नभावात्। किंच। तस्य परमात्मनः कश्चन कोपि पुरुषो नेशे नेष्टे मम ग्रहणसौकर्यार्थं ईदृग्भवेति नियंतुं
न समर्थः। अत एव तस्य परमात्मनो महद्यशः इति नाम संपन्नं। अत्यंतस्वातंत्र्येण तदीययशसोऽप्यधिकत्वात्। किंचास्य परमात्मनो रूपं
नीलपीतादिकं संदृशे प्राणिनां दृष्टिविषयत्वेन न तिष्ठति। अशब्दमस्पर्शमरूपमित्यादिश्रुतेः। अतः कश्चन कुशलोपि पुमान् तस्य तत्पदं ना चक्षुषा

एतेन न पश्यति। कथं तर्हि कुरु शास्त्रोपदेशयुक्तेन गृह्यन्त इति चेदुच्यते। दहरहृदयपुंडरीकमध्यवर्तिना मनीषा भौतिकवस्तुगोचराणि
मनांसीति इति मनीषा। तथाविधेन मनसान्तःकरणेनाभिमतः सर्वतो निश्चितो भवति। योगयुक्तं हि मनो लौकिकविषयनिवृत्तं भव
ति तेन चान्तर्मुखेनैकाग्रेण मनसा परमात्मानुभवितुं शक्यते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः। ये पुरु
एनं परमात्मानं मनसा विदुः साक्षात्कुर्वन्ति ते पुरुषा अमृता मरणरहिता भवन्ति। देहात्प्राणानां मुत्क्रान्तिर्मरणं न च तत्त्वविदो
नास्ति। न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्त इति श्रुतेः। उक्तार्थदार्ढ्याय प्रदेशान्तरपठितमन्त्रमुदाहरति। अद्भ्यः संभूतो हिर २
ण्यगर्भ इत्यष्टाविति। अद्भ्यः संभूतः पृथिव्यै रसाच्चेति। अयमनुवाकः। याजुर्होत्रीयचयनमन्त्रप्रकरणे समाम्नातः। तस्यानुवाकस्य छन्दार्थमद्
भ्यः संभूत इति प्रतीकमिदं पठितं। तस्मिन्ननुवाके। तमेव विद्वानमृत इह भवतीति परमात्मतत्त्वविदो मरणराहित्यमुक्तं। हिरण्यगर्भः समवर्तताग्र
ग्र इत्याद्याः अष्टावृचः संहितायां चतुर्थकाण्डे प्रथमप्रपाठके समाम्नाताः। अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तता
धि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्र इति। अद्भ्यः उदकेभ्यः। पृथिव्यै पृथिव्याः व्यत्ययो बहुलमिति पाणिनिस्मरणात्
अत्र विभक्तिव्यत्ययः। रसशब्दः क्षीराज्यादिषु प्रसिद्धः। आज्यस्य तेजस्त्वं तेजो वा आज्यमिति श्रुतेः। अनया रीत्या रसात्तेजसः इत्यर्थः सं
पद्यते। पृथिव्यप्तेजसां ग्रहणं वाय्वाकाशयोरुपलक्षणं। तथा चायमर्थः। विश्वकर्मणः विश्वं ब्रह्माण्डं कर्म कार्यं यस्य तस्माद्विश्व

ना॰ उ॰ भा॰
५

कर्मणः परमात्मनः पंचभूतद्वारा संभूतः उत्पन्नः । यद्वा रसत्वात् परमात्मनो विशेषणं । रसो वै स इति वारुण्युपनिषद्वाक्यत्वात् । आ
ब्रह्मस्तंभपर्यंतानां देवतिर्यङ्मनुष्याणां पांचभौतिकत्वसिद्धेः शरीरस्यापि पांचभौतिकत्वं प्रसिद्धं । किंच एवंभूत आदित्यः चंद्रन
क्षत्रग्रहतारादिकात् तेजस्विदेवताभ्यः इंद्रादीतरदेवताभ्यश्च अधि अधिकः तेजसोत्कृष्टः समवर्तत बभूव । अपि च त्वष्टा दीप्यमा
न आदित्यस्तस्य परमात्मनो रूपं तेजः विदधत् बिभ्रत् एति उदेति । उदयाचलमारोहतीत्यर्थः । सूर्यादिषु यत्तेजस्तत्परमात्मसंबंधीति स
पूर्णस्य ४ र्ववेदांतडिंडिमः । य एवंविधः सविता तस्य पुरुषस्य अग्रे दृष्टिपथे तत्प्रसिद्धं । आसमंतात् जायत इत्याजानं समस्तं विश्वं वर्तत इति शे
षः । निखिलजगत्प्रतिभानं भगवदादित्याधीनमित्यभिप्रायः । द्वितीयमंत्रस्यार्थमाह । वेदाहमेतं पुरुषं महांतं । आदित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति । नान्यः पंथा विद्यते यनाय । कश्चन सूर्योपासकः स्वानुभवं प्रकटयति । एतमाकाशमंडले दृश्यमानं पुरु
षं पूर्णं । आदित्यस्य वर्ण इव वर्णः कांतिर्यस्य तं आदित्यवर्णं । आदित्यस्य समानोपमानाभावात् । स्वोपमानं स्तुत्या प्रयुक्तं । तमसः अंधकारा
त् परस्तात् दूरे वर्तमानं भगवंतं सवितारं वेद जानामि किं च तं पूर्वोक्तविशेषणविशिष्टं एवं पूर्वोक्तविधया वक्ष्यमाणविधया च विद्वान् जान ५
न्नमृतो भवति । अयनाय मोक्षमार्गाय अन्यः पंथा न विद्यते । तृतीयमंत्रमाह । प्रजापतिश्चरति गर्भे अंतः । अजायमानो बहुधा विजाय
ते । तस्य धीराः परिजानंति योनिं । मरीचीनां पदमिच्छंति वेधसः इति । प्रजानां पतिः पालकः । गर्भे रोदस्योर्मध्ये चरति जगति विभासयितुं । किंच स्वयम

जायमानः अनुत्पद्यमानः सन् बहुधा चराचररूपेण विजायते। सूर्य एव सर्वात्मको जायते इत्यर्थः। ये पुण्यकृतः गुरु मकारस्य कान्
रमरीचीनां देवर्षिब्राह्मणानां पदं स्थानमिच्छन्ति। ते धीराः वेधसः जगतो विधातुः तस्य सूर्यस्य योनिं कारणं परमात्मानं परितः सर्वत्र पूर्णत्वेन जानन्
ति। जानीयुरित्यर्थः। चतुर्थमन्त्रमाह। यो देवेभ्य आतपति। ~~यो देवेभ्य आतपति~~ यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये
इति। यो देवेभ्यः कर्मानुष्ठानद्वारा देवानामुपकारार्थमातपति। यः देवानां पुरो अग्रे हितः हितकरो यः समस्तदेवेभ्यः पूर्वं प्रथमं जातः उत्प
न्नः सर्वदेवज्येष्ठः। तस्मै रुचाय दीप्यमानाय ब्रह्मणः परमात्मनः पुत्रो ब्राह्मिः तस्मै ब्राह्मये। सूर्यदेवाय नमोऽस्तु। पञ्चमं मन्त्रमाह। रुचं ब्रा
ह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे। इति। देवाः परमात्मा। अग्रे महासर्गादौ रुचं दीप्तिरूपं ब्राह्मं ब्र
ह्मणः देवस्य संबन्धिनं। सर्ववेदवेद्यमित्यर्थः। सूर्यं जनयन्तः उत्पादयन्तः तद्वक्ष्यमाणं वाक्यमब्रुवन्न् अब्रुवन्। पूज्यत्वात्परमात्मनः एकवच
ने बहुवचनप्रयोगो वेदेन कृतः। ननु देवा इति। नकु वचनमिन्द्रादिदेवतापरं किमर्थं न भवतीति चेन्न। तेषां सूर्यजनकत्वे मानाभावात्। पूर्वो यो देवेभ्य
इत्यत्र इत्यादिभ्यः पूर्वं सूर्योत्पत्तिश्रवणाच्च। तद्वक्ष्यमाणवचनं दर्शयति। यो ब्राह्मणस्त्वेवं एवकारार्थः। एवं पूर्वोक्तरीत्या। विद्यात्। जानाति
तस्य ब्राह्मणस्य वशे स्वाधीने देवा इन्द्रादयः। एतिप्रमुखाः असन्वशे भवन्ति। इति सूर्यस्वरूपपरिज्ञाने सर्वदेववशीकारः फलमिति भावः। षष्ठं म
न्त्रमाह। श्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपं। अश्विनौ व्यात्तं। इष्णन्निषाण। अमुं म इषाण। सर्वं म इषाणेति।

ना·उ·भा· पूर्वमंत्रे सूर्यपरोक्षतयास्तुत्वास्मिन्मंत्रे परोक्षतयाभिष्टवीति। भो भगवन्नादित्य निखिलजगत्संजीवनातेतवलक्ष्मीः इंदिरा ह्रीः हरति सौंदर्येणम
६ नांसीतिह्रीः मनोहरा अतिसुंदरी भारती। अनयेवव्युत्पत्त्या ह्रीशब्दः पार्वतीवाचकोपिद्रष्टव्यः। सरस्वती लक्ष्मीः पार्वतीचपत्न्यो भार्याः
सूर्यस्य श्रुतिस्मृतिपुराणेषु त्रिमूर्त्यात्मकत्वेन प्रसिद्धत्वात्। नक्षत्राणि रूपमाकारः। अश्विनौव्यात्तंमुखंचकराभ्यां सर्वं ब्रह्मांडं तदवयव
भूतमित्यर्थः। एवमभिष्टुतो भगवान् श्रीसूर्यः भक्ताय प्रत्यक्षो भूत्वा वक्ति भो भक्त इष्टं अभीष्टं मत् मत्तः इषाण। इच्छ प्रार्थय अमुं परलो
कं इषाण। यद्यन्मनसिवर्तते तत्सर्वं इषाण। अत्र छंदसम् अन् इत्यत्र एकतवर्गनिष्ठत्वात् तकारस्थानेनकारप्रयोगश्छांदसः।
एवं सूर्येणोक्तो भक्तस्तत्सर्वं प्रार्थितवान् सूर्योपि दत्तवान्। अयमपि कृतार्थो जातः॥ हिरण्यगर्भः समवर्तताग्रे भूतस्यजातः पतिरेकआ
सीत्। सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम इति॥१॥ यस्मात्परमात्मनः सकाशात्। हिरण्यगर्भश्चतुर्मुखो ब्रह्मा अग्रे
सृष्ट्यादौ समवर्तत संभूतः जातः सन् यत्प्रसादाद्भूतस्य एक एक एव पतिरासीत्। स परमात्मा पृथिवीं द्यां इमां प्रत्यक्षां उत अपि दाधार
धृतवान् तं परमात्मानं विना अन्यस्मै कस्मै हविषा हविष्मता यज्ञेन विधेम विध्यनुष्ठानं कुर्मः न कस्मैचित् किं तु तस्यैव प्रीत्यर्थं सर्वं
श्रौतस्मार्तकर्म कुर्मः। द्वितीया। यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय ह ६
विषा विधेम। यः परमात्मा प्राणतः प्राणवतो निमिषतो जगतो जंगमस्य स्थावरस्य च महित्वा महत्त्वेन। महत्प्रजायां एक इत् एक एव राजा

नभूंवयः परमात्मा अस्य ब्रह्मांडस्य मध्ये विद्यमाना द्विपदः मनुष्यपक्ष्यादीन् चतुष्पदः गोमहिष्यादीन् ईशेनित्यंक्षयति। सर्वप्राणि
हृदयपुंडरीके स्थितत्वात् यामितया जगत्सर्वं पुण्यपापेषु प्रेरयति तं परमात्मानं विनेस्यादि पूर्ववत्। तृतीयामाह। य आत्मदा बल
दो यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेमेति। यः परमात्मा आत्मानं जीव
रूपं प्रददातीति आत्मदः। बलं अन्नादि पुष्टिं ददातीति बलदः उभयत्र दैर्घ्यं छांदसं। यस्य परमात्मनः प्रशिषं आज्ञां विश्वे देवाः सर्वे मनु
ष्याः सर्वेपि देवाः उपासते मर्यादां परिपालयंति। यस्य परमात्मनः छाया आश्रयः शरणागतत्वं अमृतं मोक्षहेतुः यस्य अशर
णागतत्वं मृत्युः नरकहेतुः। तं परमात्मानं विनेस्यादि पूर्ववत्। चतुर्थीमाह। यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेमेति। इमे भूमंडले विद्यमानाः हिमवंतः हिमवत्पर्वत प्रभृति महामेरु विंध्य सह्या
द्रिकुटाचल प्रभृति पर्वताः यस्य परमात्मनः महित्वा महित्वानि विभूतयः हिमवंत इत्यत्र हिमाचलस्य सर्वपर्वतराजत्वात् तन्नाम पू
र्वकं छत्रिन्यायेन इतरेषां ग्रहणं। यत उमा जगन्माता भागीरथी च तद्दुहितरौ। तस्मादित्यर्थः। किंच रसशब्दो नदीवाचकः आता
वेकवचनं। रसया नद्या गंगादि सर्वनदीभ्यः समुद्रं लवणादि समुद्रान् यस्य परमात्मनो विभूतिमाहुः। वेदाः कथयंति। इमाश्चतस्रः प्राच्या
दिदिशः यस्य परमात्मनो अवयवाः। प्रदिशः विदिशः आग्नेय्याद्याः यस्य परमात्मनो बाहू। अनया रीत्या गिरिनदीवृक्षादि सर्वं परमात्म

नो विभूतिरिक्तकं तं परमात्मानं विनेत्यादि पूर्ववत्। अथ पंचमी। यं क्रंदसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि सूर उ
दितो व्येति कस्मै देवाय हविषा विधेमेति। यत्र ययोर्द्यावापृथिव्योरंतराले सूरः सूर्यः उदितः सन् व्येति शिंशुमारचक्रं परिभ्रम
ति ते द्यावापृथिव्यौ कीदृश्यौ क्रंदसी अतिवृष्टिविद्युत्पातादिना लयाधारत्वेन च आक्रंदनस्य प्राणिरोदनस्य हेतुभूते। एतेन लयकारण
त्वमुक्तं। किंच अवसा रक्षकेनान्नेन तस्तभाने जीवानां स्थितिं कुर्वाणे। एतेन जीवनहेतुत्वमुक्तं। एतदुपलक्षणं उत्पत्तेरपि। जगदुत्प
त्तिस्थितिलयकारणभूते रेजमाने विराजमाने एवंविधे रोदस्यौ यं परमात्मानं मनसा निर्मलमनोवृत्त्या अभितः सर्वतो ध्यायतः तं प
रमात्मानं विनेत्यादि पूर्ववत्। अथ षष्ठीमाह। येन द्यौरुग्रा पृथिवी च दृढे येन स्वः स्तभितं येन नाकः। यो अंतरिक्षे रजसो विमानः कस्मै
देवाय हविषा विधेमेति। उग्रा अत्र निपातादिना क्रूरा द्यौः पृथिवी च येन परमात्मना दृढीकृते सर्वप्राणिधारणपोषणक्षमे कृते येन परमा
त्मना स्वः आदित्यमंडलं स्तभितं अंतरिक्षे निराधारं स्थापितं अंतरा च भूमौ न पतति। येन परमात्मना नाकः स्वर्गः सुखविशेषः पुण्यात्म
नामुपभोगाय निर्मितः। यः परमात्मा अंतरिक्षे भुवर्लोके रजसो वृष्टिरूपोदकस्य विमानः निर्माणकर्ता तं परमात्मानं विनेत्यादि पूर्ववत्। अथ स
प्तमीमाह। आपो ह यन्महतीर्विश्वमायन् दक्षं दधाना जनयंतीरग्निं। ततो देवानां निरवर्ततासुरेकः कस्मै देवाय हविषा विधेमेति। यत् यदा
जगन्निर्मातुं संकल्पितवान् तत सदा परमात्मा आपः उदकानि निरवर्तत उत्पादयामास। आप इत्यत्र प्रथमायाः द्वितीयार्थे तात्पर्यं।

आपः कीदृशी: । महतीः पूज्याः समुद्रादिरूपेण महत्परिमाणवा । पुनः कीदृशी: दक्षं समस्तप्राणिधारणपोषणक्षमं सामर्थ्यं दधानाः धारयंती:
अग्निं जनयंती: । पुनः कीदृशी: याः विश्वं जगत् आयन् । व्याप्नुवन् । परमात्मा कीदृशः एकः अद्वितीयः देवानां असुः । अग्न्यादीनां
प्राणभूतः ह किल निरवर्तत तस्मात् अंतर्भावितणिचि लङ् मध्यमो बोध्यः तं परमात्मानं विनेत्यादि पूर्ववत् । अथाष्टमीमाह । यश्चिदा
पो महिना पर्यपश्यद्दक्षं दधाना जनयंतीरग्निं । यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेमेति । दक्षं श्रौतस्मार्तकर्मा
नुष्ठानक्षमं अग्निं दधानाः । अग्निं जनयंती । वाडवाग्निः समुद्रोदके विद्यमानत्वात् । आपः उदकानि चिदपि यः परमात्मा
महिना महिम्ना मलोपश्छांदसः । पर्यपश्यत् । निखिलजीवजीवनसाधनत्वेन पर्यपश्यत् । यः परमात्मा सर्वेषु देवेषु अधि
अधिकत्वेन एको देव आसीत् तं परमात्मानं विना कस्मै देवाय हविषा विधेम । न कस्मै चित् । किंतु तस्मा एव । सप्तपाकयज्ञसप्त
हविर्यज्ञसप्तसोमसंस्थाः आहत्य एकविंशतिसंस्थाः अन्यत्पूर्वं वापीकूपतटाकगोदानभूदानादिकं अनुष्ठाय समर्पया
मः । व्याख्यातमन्यत् । अथेदानीं यथा हिरण्यगर्भादयः परमात्मनः उपलक्षणकास्तथा परमात्मनोऽस्य दिगादिकं जगत् हि सृष्टिः विश्व
परमात्मानमुपलक्षयति श्रुतिर्मंत्रद्वयेन दर्शयति । एषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः स उ गर्भे अंतः । स विजायमानः स जनि
ष्यमाणः प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां

ना॰ उ॰ भा॰ मतिसंपतत्रैर्द्यावापृथिवीजनयन्देवएकइति। विद्वद्भिरनुभूयमानोदेवः स्वप्रकाशः परमात्माप्रदिशः प्रकृष्टाः प्राच्याद्याः आ
८ ग्नेयाद्याश्चदिशः सर्वाः अनुप्रविश्यावस्थितः प्रवेशस्यप्रत्यंतरप्रसिध्यर्थोहिशब्दः तथापूर्वोजातः हिरण्यगर्भरूपत्वेनाय
मेवमेवप्रथममुत्पन्नः हिशब्देनहिरण्यगर्भः समवर्ततेतिमंत्रप्रसिद्धिः सूच्यते सउसएवपरमेश्वरोगर्भेऽन्तः ब्रह्मांडरू
पस्यमध्येवर्तते सएवविजायमानोदेवतिर्यगादिरूपेणइदानींजायते इतःपरमपिजनिष्यमाणः सएवसर्वप्रत्यक् अन्नमया
दिकोशेभ्यः आंतरः मुखाः देहेंद्रियाध्यक्षत्वेनमुख्यः विश्वतः सर्वतोमुखानिरूपाद्युपलब्धिद्वाराणिचक्षुरादीनियस्या
सौविश्वतोमुखः। तादृशोऽयंजगदधिष्ठानत्वेनतिष्ठतिसचब्रह्मांडरूपदेहवत्त्वात्सर्वप्राणिदेहस्वरूपत्वात्तदीयैः सर्वैश्च
क्षुरादिभिर्युक्तइतिविश्वतश्चक्षुरित्यादिभिः पदैरभिधीयते। तत्तल्लोकनिवासिनांप्राणिनांचक्षूंषि तत्रतत्रस्थितान्ये
वतदीयानिभवंतिअतोऽस्यसर्वतश्चक्षुष्ट्वं एवंविश्वतोमुखत्वादिकमपिद्रष्टव्यं। सचपरमेश्वरोबाहुभ्यांसन्नमति
बाहुसदृशाभ्यांधर्माधर्माभ्यांनिमित्तकारणाभ्यांसर्वंजगद्वशीकरोति। तथापतत्रैः पतनशीलैः पंचीकृतपंचमहाभू
तैः सन्नमतिसर्वंजगदुत्पादयति। एवमयंद्यावापृथिव्यादिकं कृत्स्नंजगदुत्पादयन्नेकएवावतिष्ठते उक्तार्थस्यसा
तिशयमुत्पादयितुमत्रद्वयेनगंधर्वदृष्टांतंदर्शयति। वेनस्तत्पश्यद्विश्वाभुवनानिविद्वान्यत्रविश्वंभवत्येकनीडं ८

यस्मिन्निदं संच विचैकं स ओतः प्रोतश्च विभुः प्रजासु । प्रतद्वोचे अमृतं नु विद्वान्गंधर्वो नाम निहितं गुहासु । त्रीणि प
दा निहिता गुहासु यस्तद्वेद सवितुः पितासदिति । वेनो नाम गंधर्वः सर्वप्राणिनां गुहासु बुद्धिषु निहितं अमृतं विना
शरहितं तद्वस्तु स्वानुभवेन विद्वान् प्रतद्वोचे नु शिष्येभ्यः प्रोवाच खलु कीदृशो वेनः यत्र यस्मिन्परमात्मवस्तुनि वि
श्वं सर्वं जगदेकनीडं भवति । एकत्वेन विश्वमवस्थितं तं तादात्म्यं प्राप्नोति तद्वस्तु गुरुशास्त्रप्रसादेन पश्यन् साक्षात्कुर्व
न् विश्वा भुवनानि सर्वानपि लोकान्जनान्वर्तते । आत्मसाक्षात्कारे हि सर्वं जगदात्मकमित्यवगतिर्भवति । किंचवैनेन
दृष्टे यस्मिन्वस्तुनि परमात्मनीदं जगत्संच विच समुत्पद्यते विलीनं च भवति । एकमद्वितीयतत्त्वरूपः परमात्मा विभुर्व्यापी सन् ती
प्रजासु दीर्घतंतुवदोतस्तिर्यक्तंतुवत्प्रोतश्चावतिष्ठति गुहासु प्राणिनां बुद्धिषु त्रीणि पदा जाग्रत्स्वप्नसुषुप्तिरूपाणि त्रीणि स्था
नानि निहिता अवस्थितानि यो यं गंधर्वः तज्जागराद्यवस्थानं वेद स गंधर्वः सवितुः उत्पादकस्य स्वकीयजनकस्यापि पिता जनको
भवति लोकप्रसिद्धः पिता पुत्रस्य देहमात्रं जनयति अक्षतत्वाभिज्ञस्तु परमात्मरूपेण सर्वजगदुत्पादकत्वाल्लोकप्रसिद्धस्य
स्वजनकस्यापि स्वयमुत्पादको भवति । यस्तानि विजानात्सवितुः पितासदिति श्रुत्यंतरात् । तस्य परमेश्वरस्य व्यवहारे सर्वप्राण्युप
कारकत्वं परमात्मदर्शिनो मुक्तिप्रदत्वं च मंत्रद्वये नारयति । स नो बंधुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा । य
त्र देवा अमृतमानशानास्तृतीये धामान्यध्यैरयंत । परि द्यावापृथिवी यंति सद्यः परि लोकान्परि दिशः परि स्वः । ऋतस्य तंतुं वि

ना·उ·भा·
९

ततं विचृत्तस्तदपश्यत्तदभवत्प्रजासु इति। स परमेश्वरो नोऽस्माकं सर्वेषां बंधुः अस्मदनुष्ठितसत्कर्मानुसारेण हितकारित्वात्। जनिता उत्पा
दकः भोक्तृत्वात् स च विधाता जगतो निर्माता स च विश्वा निभुवनानि सर्वानुत्तमो धमल्लोकान् धामानि तेषु लोकेषु देवादीनां योग्यानि
स्थानानि च वेद जानाति। यत्र तृतीये लोके स्वर्गाख्ये लोके देवा इंद्रादयो अमृतमानशानाः सुधां पिबंतो धामानि स्वकीयस्थानानि अ
ध्यैरयंत सर्वतः प्राप्नुवंतः तत्सर्वं विदित्वा तत्तदनुष्ठितकाम्यकर्मानुसारेण फलं प्रयच्छतीत्यर्थः। ये तु मुमुक्षवः ते सर्वे विदिततत्त्वाः
संतो द्यावापृथिवी लोकद्वयं सद्यः परियंति। बोधलक्षण एव सर्वतो व्याप्ता भवंति। तथा लोकानवरिष्ठानंतरिक्षादीन्परियंति दिशः
प्राच्याद्याः परियंति स्वः स्वर्लोकं भोगं परियंति सर्वात्मकत्वेन सर्वप्राप्तिरुक्ता। ऋतस्य सत्यस्य परब्रह्मणस्तंतुं अविच्छेदेना
वस्थानं विततं विस्तीर्णं यथा भवति तथा विचृत्य गुरुशास्त्रमुखं निश्चित्य तत्तद्ब्रह्म पश्यन् साक्षात्कृतवान् स एव प्रजासु म
ध्ये तद्ब्रह्मतत्त्वमभवत्। तथा च श्रुत्यंतरं। ब्रह्मवेद ब्रह्मैव भवतीति। अंभस्यपारे इत्यादिना तदभवत्प्रजास्वित्यंतेन ग्रंथेन प्रतिपा
दितां ब्रह्मविद्यामुपसंहरति। परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च। प्रजापतिः प्रथमजा ऋतस्यात्मनात्मा
नमभिसंबभूवेति। ऋतस्य सत्यस्य ब्रह्मणः प्रथमजाः प्रथमकार्यभूतः प्रजापतिः हिरण्यगर्भो लोकान्भूरादीन् भू ९
तानि देवमनुष्यप्राणिदेहान् प्रदिशः आग्नेय्याद्याः दिशश्च प्राच्याद्याः परीत्य सर्वतो व्याप्य सृष्टिकाले सृष्ट्वा पुनस्त
द्विपरीत्य स्थितिकाले रक्षित्वा। आत्मना स्वस्य रूपेण तादृक्त्वप्रत्यक्षेणेत्यर्थः आत्मानं सत्यज्ञानादिलक्षणमु

नु

भिसंबभूव सम्यक्सर्वतः प्राप्तवान् । तदेव ब्रह्मविद्याभिलिपादिता । अथ तात्कालिसाधनभूताः सोपाधिकब्रह्मध्यानजपस्नानादिकर्मांगभू
तामंत्राः कर्मकांडे पूर्वमुक्ताः अस्मिन् खिलकांडे ऽभिधीयंते । तत्रैकेन मंत्रेण ब्रह्मप्राप्त्यर्थं अंतर्यामिणं प्रार्थयते । सदसस्पतिम
द्भुतं प्रियमिंद्रस्य काम्यं । सनिं मेधामयासिषं इति । सीदंत्यस्मिन् व्याहृते कारणे सर्वं जगदिति सदः सदसस्पतिं पालकं अंत
र्यामिणं अयासिषमहं प्राप्तवानस्मि शीघ्रं प्राप्तवानित्यनया क्रियया भूतार्थनिर्देशः कीदृशं सदसस्पतिमद्भुतं आश्च
र्यरूपं मनसाप्यचिंत्यरचनारूपस्य जगतो नायासेन निर्मातृत्वमद्भुतत्वं । इंद्रस्य देवराजस्यापि प्रियं । सोप्यंतर्यामिणं
कदा प्राप्स्यामीत्येव मात्रगच्छते । अत एव सर्वैरन्यैः काम्यमपेक्षणीयं सं निष्कर्मफलं तस्य दातारं मेधां श्रुतार्थतद्ग्रंथधारणात्मिकां
प्रयच्छंतमिति शेषः । अथवा ह्युपाधिकं परमेश्वरं प्रतीच्छाभिप्रार्थयते । उदीप्यस्व जातवेदोपध्नं निरृतिं मम । पत्ररू ंस्वमय
मावह जीवनं च दिव्रोदचोति । जाते प्राणिशरीरे जठराग्निरूपेण विद्यते अवतिष्ठते इति जातवेदाः । अथवा जातान् उत्पन्नान्यजमा
नान् तत्फलदानाय वेत्ति स्वचित्तेन निश्चिनोति इति जातवेदाः । हे जातवेदः मदनुग्रहार्थं जठरूपेण दीप्यस्व । किं कुर्वन् मम निष्कारि
णीं निरृतिं पापदेवतामपघ्नन् विनाशयन् तां विनाश्य ततो मदर्थं पत्ररूगवाश्वादी जीवनं दीर्घायुष्यं च कराभ्यां अन्यदपि सर्वं भोग्यजात
मावह संपादय ततः सुखनिवासार्थं दिशः प्रोच्या दिशा निवासयोग्यानि तत्र दिग्गतस्थानानि दिश देहि । संपादितानां गवाश्वादीनां अविना

त्वांप्रार्थयते। मानो हिंसीज्जातवेदो गामश्वंपुरुषंजगत्। अबिभ्रदग्न आगहि श्रिया मा परिपातयेति। हे जातवेदः त्वमस्माद
न्मदीयं गवादिकं निर्ऋतिर्मा हिंसीत् माविनाशयतु। अगच्छदेन गवादिव्यतिरिक्तं गृहक्षेत्रादिकं विवक्षितं। हे अग्ने च
म बिभ्रद्धारयन्। अस्मदपराधं मनस्यधारयित्वागहि। अस्मद्गृहार्थमागच्छ। ततो मां श्रिया धनधान्यादिसंपदा परिपातय स
र्वतः प्रापय। इत ऊर्ध्वमेकादशभिर्गायत्रीमंत्रैः परब्रह्मसाक्षात्कारभूतात्मलिंगोक्ता देवताः मुमुक्षुरभ्यर्थयते। तत्रादौ विश्व
रूपधरं रुद्रं प्रार्थयते। तत्पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्। इति विश्वतश्चक्षुरित्यादिमंत्रो
क्तो विराट्पुरुषः सहस्राक्षः तस्य पुरुषस्य स्वरूपं विद्म जानीमहि लभेमहि वा तदर्थं तस्य विराड्रूपस्य महादेवस्य स्वरूपं धीमहि ध्यायेम
लतद्ध्यानेन नोऽस्मान् रुद्रो विराड्रूपो महादेवः प्रचोदयात्। प्रचोदयतु। अथ बिभ्रद्दोर्भिः कुठारं मृगमभयं करोरुकं प्रसन्नो महेश
ईशाद्यागमप्रसिद्धमूर्तिधरं महेशं प्रार्थयते। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। सर्वत्र गायत्रीमंत्रेषु
बहुवचनलिंगादिव्यत्ययः। तमागमप्रसिद्धं पुरुषाकारं महादेवं जानीम ध्यायेम। तत्तस्मिन् ध्याने नोऽस्मान् रुद्रः प्रेरयतु। बीजापूर
गदेक्षुकार्मुकेत्यागमप्रसिद्धमूर्तिधरं विनायकं प्रार्थयते। तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्। इति। गज
समानवक्त्रत्वेन दीर्घस्य तुण्डस्य रत्नकलशादिधारणार्थं वक्रत्वं दन्तिः महादन्तः। तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि। तन्नो नंदिः प्रचोदयात्।

इति। तत् यं परमशिववाहनभूतं नंदिकेश्वरं वयं विद्महे धीमहि च। कथंभूतं पुरुषाय पुरुषं कामरूपित्वात् जातुचित्स्वेच्छया तिर्यक्त्वं परिहाय स्वी
कृतदिव्यपुरुषविग्रहं। पुनश्चक्रतुंडाय चक्रवत्तुंडं वक्त्रं यस्य यथा चक्रायुधं विष्णुप्रयुक्तं सद्भक्तांसि हंति। तथा स्वारूढं परमशिवस्य
रक्षोभिः सहसंगरप्रसंगे स्वमुखेन तान् हंतीत्यर्थः। तत्सः नंदिः नंदीनः प्रचोदयात् इति व्याख्यातं। तत्पुरुषाय विद्महे महासेनाय धीम
हि। तन्नः षण्मुखः प्रचोदयात् इति। तत् यं वयं विद्महे धीमहि च तन्नः सः षण्मुखः तिलकस्वामी नः प्रचोदयात्। यं कथंभूतं पुरुषाय पुरुषं अंतर्या
मितया सर्वत्रपूर्णपूर्णत्वात्। महती देवसेना यस्य तत्तमित्यर्थः। तत्पुरुषाय विद्महे स्वर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात् इति स्पष्टोयं मंत्रः
वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि। तन्नो ब्रह्म प्रचोदयात्। इति। यत् नः ब्रह्म नः पुण्यापुण्येषु कर्मसु प्रेरयति। तद्वयं विद्महे गुरुकुले क्लिष्टा वे
दांतश्रवणादिना जानीमहे ज्ञात्वा च निदिध्यासनविधया तं धीमहि। अखंडं तद्देवोऽहमिति दिवानिशमात्मने ध्यायामः। तत्कथंभूतं वेदात्मनाय व
र्णव्यत्ययेन वेदात्मकाय। शाखोपशाखोपेतसर्ववेदस्वरूपमित्यर्थः। हिरण्यगर्भाय चतुर्मुखब्रह्मस्वरूपमित्यर्थः। वेदा हिरण्यगर्भ यारूप
लक्षकत्वेन सर्वात्मकमिति यावत्। सेयं परब्रह्मगायत्री। नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात् इति। विष्णुर्नः
प्रचोदयात्। तं विद्महे धीमहि च कथंविधं भक्तानां नराणां समूहो नारं तस्यायनमाधारं वसुदेवस्यापत्यं पुमान् वासुदेवस्तं। वज्रनखाय विद्म
हे तीक्ष्णदंष्ट्राय धीमहि। तन्नो नारसिंहः प्रचोदयादिति। नरसिंह एव नारसिंहः वज्रनखाय तीक्ष्णदंष्ट्राय तस्मै पदयोजना पूर्ववत्

सेयं मायस्यास्त्वं भाद्रवतीर्णस्य नरवेर्हिरण्यकशिपुजठरभेत्तुः कृतनदीश्रोत्रयज्ञोपवीतस्य भगवतो नरकंठीरवस्य गायत्री। भास्कराय विद्म
हे महद्द्युतिकराय धीमहि। तन्नो आदित्यः प्रचोदयात् इति। अदितिर्देवमातुरयमादित्यः भाः भूलोकविषयादीप्तिस्तत्कर्ता भास्करः मह
ती त्रिलोकीगोचरा द्युतिर्महद्द्युतिः तत्कर्ता महद्द्युतिकरः आन्नकृतरत्नादिनाप्राप्तस्याकारस्य लोपश्छांदसः अन्यदतीतवद्योजयितव्यं
वैश्वानराय विद्महे लालीलाय धीमहि। तन्नो अग्निः प्रचोदयादिति। स्वस्मिन्कृतानि हव्यानि यथाभागं स्वयमश्नन् अन्यदेवताभ्यो
नयतीत्यग्निः विश्वेभ्यो नरेभ्यो हितः वैश्वानरः लौकिकवैदिकव्यापारानुकूल्येन सर्वप्राणिहितैतियावत्। लालीलायेत्यत्र पृषोदरादे
राकृतिगणत्वात् हइति वर्णो लुप्यते हेलालीलायेत्यर्थः। हेला स्वकुटुंबक्रीडा लीला सर्वदेवताग्रगण्यत्वलक्षणा च क्रीडा यस्य
सः हेलालीलस्तस्मै हेलालीलाय। यद्वा वैश्वानराय विद्महे लालीलायेति पदच्छेदः। तथा च मंत्रांतरे प्रयोगः। यद्वा घासस्य मुत
यन्नवित्येति पूर्वं च आत्मनेपदं अत्र परस्मैपदं उभयत्र बहुवचनमेवा तत्त्वार्थैक्य। विद्महे अन्यदतिक्रांतवद्योजयितव्यं
कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात् इति। छांदसप्रयोगलोकानुसारेण व्याख्यास्यामः। दा
क्षायणी सती किल दक्षस्य पितुर्यज्ञे पावके भविष्यादृशिराजभागधेयादयवत्तोनद्विव्यपरमंमंगलास्पदकायं तिरश्चक्रे। ततः पर
मयोगिन्यां मेनकायां प्राप्ते पार्वत्यादाविश्वक्रे जनिता वा दैकन्या चासौ प्राक्परिणयात् कुमारी चेति कन्यकुमारी तत्संबुद्धौ हे कन्यक
मारि कन्नति देदीप्यते इति कनकांता कुत्सितं परतंत्रत्वादिलक्षणं यस्यां सा अल्पं मारयति क्रीडायशेन करपरवाल्ला भ्यां चकुं भूमिं मारयति

भो हे भवानि। भो मेनके पित्वां विद्महे। हरिहरविरिञ्च्यादिभिः तारा ध्यां सर्वदेवतोत्कृष्टां तन्मेयेकृ सकलभां जानीमहे विदित्वा चरा त्रिदिवं धीमहि भु-
क्तिमुक्तिप्रदात्रीमिति शेषः। कुस्मै कात्यायनाय स्वपित्रे यथा रामकृष्णादिरूपेणावतीर्णस्य भगवतो बहवो मातापितरस्तथा भगवत्या अपि
देवकार्यं चिकीर्षया जगदनुजिघृक्षया चावतीर्णायाः राक्षसेः उः खेन गम्या दुर्गा दूकारांतत्वं छांदसं एवं शाद्वलागायत्र्यो व्याख्याताः। अ-
थ स्नानांगभूता मंत्रा उच्यंते। तत्र शिरसि मृत्तिकया सह दूर्वां धारयितुं दूर्वाभिमंत्रणमंत्रानाह। सहस्रपरमा देवी शतमूला शतांकुरा। सर्वं हर-
तु मे पापं दूर्वा। उः स्वप्ननाशिनीति। येयं दूर्वाभिमानिनी देवता सा मे पापं सर्वं हरतु। कीदृशी सहस्रसंख्येभ्यः पावनहेतुभ्यो द्रव्येभ्यः परमो-
त्कृष्टा सा च देवी द्योतनात्मिका शतसंख्याकानि मूलानि यस्याः सा शतमूला तथा शतांकुरा शतशब्देन बहुत्वमुपलक्ष्यते। उः स्वप्नक-
लं अनिष्टं नाशयतीति। उः स्वप्ननाशिनी। कांडात्कांडात्प्ररोहंती परुषः परुषः परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन चेति। दूर्वेति छिनत्ति
पातकमिति दूर्वा तत्संबुद्धौ हे दूर्वे दूर्वी हिंसायां हे त्वं यथा विशेषत्वं नोऽस्मान् शतेन सहस्रेण च पौत्रैर्हि श्राद्धेन कर्मकारैः प्रतनु प्रकृष्टं सर्वोत-
कृष्टं यथा तथा विस्तारय। त्वं किं भूता। परुषः परुषः परि प्रतिपर्व परितः प्ररोहंती कांडात्कांडात्प्रतिमूलं मूलात्सकाशात् प्ररोहंती। अयमभि-
प्रायः। दूर्वाया एव स्वभावः प्रतिपर्व भूसंपर्कवशादुत्पादप्रसारः पादेषु प्रसरोत्सु तेषु पर्वमूलं भवति तस्मादेव मूलात्पुनः अंकुरोदयः तत एवांकुरा-
एवा त्पुनर्दूर्वाः लतायंते ताभ्यो लताभ्यः पुनः पर्वप्ररूढपर्वाणि एवं प्रकारेण स्वव्यामात्रसर्थः। एवमित्यव्ययविभक्तेः शब्दादेशश्छांदसः हे दूर्वे यथा

पूर्वोक्त भंग्यात् इष्टका वृद्धिः तथाऽस्मद् इष्टकां वर्धयेति । यात् शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयं इति । हे देवि
पिशंगया कान्त्या देदीप्यमाने इष्टके भक्तैः कायते शब्द्यते स्तूयते इति इष्टका ते त्वं खलु हे इष्टके कै गै शब्दे । तेन तव संबंधिनी परिचर्यां वि
यं हविषा हविःप्रदाने विधेम कुर्मः । किं विधाया स्तस्याः साका यात्वं शतेन स्वान्वयं प्रतनोषि सहस्रेण च विरोहसि उत्पद्यते एतद् भावार्थः ।
पूर्वमिष्टकाभिः पञ्चितः । अथ मृत्तिकाभिमन्त्रणमन्त्रास्तत्र प्रथममन्त्रमाह । अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरा । शिरसा धारयिष्यामि रक्ष
स्व मां पदे पदे इति । येयं भूमिस्तामश्वाः क्रान्तिं तेन वः स्वपदैराक्रमंति तादृशी भूमिः अश्वक्रान्ता । अग्निचयने उखानिर्माणार्थं मृत्स्थान
प्रदेशस्याश्वाक्रमण विधानादश्वपादानां मृच्छुद्धि हेतुत्वं गम्यते । तथा रथचक्रान्ता रथ्यसंचारेण क्षुण्णा सती क्रान्ता भवति । तथा त्रिवि
क्रमावतारे विष्णुः स्वपदेन भूमिमाक्रामति ततोऽत्र धृत्त्व मन्त्रवरथ विष्णुभिराक्रान्ते ऽत्र हे भूमे वसुंधरा सर्वाणि वस्तूनि धारयंती सती
तथा स्थान कर्मण्येतस्मिन् मदीयशिरसा धारयित्वा देवी द्योतमाना त्वं स्नानार्थं गच्छन्तं पदे पदे रक्षस्व । द्वितीयं मन्त्रमाह । भूमिर्धेनुर्ध
रणी लोकधारिणी । उद्धृतासि वराहेण कृष्णेन शतबाहुनेति । हे मृत्तिके त्वं भूमिरूपासि । कृष्णवर्णेन शतसंख्यात बाहुयुक्ते
न वराहावतारेण पूर्वमुद्धृतासि कीदृशी भूमिः धेनुः कामधेनुवत्प्रीणयित्री धरणी सत्वानां धारयित्री । लोकधारिणी प्राणिनां पिधार
यित्री । तृतीयं मन्त्रमाह । मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतं । मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्र १२

ष्ठितं। इति षट्पदे यमकः। महापंक्तिश्छंदः स्कांदे। मृत्तिके अत्रास्त मृत्। मया यद्दुष्कृतं अकर्तव्यं पापं कृतं तस्य हननविनाशाय। किंच यतः
त्वं ब्रह्मणा परमेष्ठिना दत्ता भूमिरूपेण स्थापिता। अस्मद्दत्ता असि। ननु मामेवमभिमंत्र्य कः स्नातिस्मेत्यत आह। काश्यपेनत्युप
लक्षितैः परमर्षिभिः स्नानादिकाले ऽभिमंत्रिता तद्दुष्कृतं हननवती असि। अतः शिष्टाचारप्रामाण्याद्वयमभिमंत्रयाम इतिभावः।
किंच मे मह्यं पुष्टिं देहि यतः पृथिवीरूपायां त्वयि सर्वं चतुर्विधं भूतजातं प्रतिष्ठितं वर्तते। अतस्त्वयि अधिष्ठिताय मह्यं पुष्टिं देहि इ
त्यर्थः। अनन्यपदेन संबुद्धित्रयं भगवत्या तित्रयप्रयोजनं। मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके। त्वया हतेन पापेन गच्छामि परमां
गतिमिति। प्रतितिष्ठंति प्राणिनो ऽस्यामिति प्रतिष्ठिता तत्संबुद्धौ हे प्रतिष्ठिते मृत्तिके मे मत्संबंधि तत्प्रसिद्धं सर्वं पापं निर्णुद विना
शय। हे मृत्तिके त्वया प्रसिद्धया त्वया पापे न हतेन सता सप्तम्यर्थे तृतीया पापे हते सतीत्यर्थः परमां गतिमपवर्गं गच्छामि। एवं उर्वीं मृत्तिकां
च दक्षिणहस्ते गृहीत्वा मंत्रैरभिमंत्र्याथेंद्रादपि अभयादिकं प्रार्थ्यते द्वाभ्यां मंत्राभ्यां। यत इंद्र भयामहे ततो नो अभयं कृधि। मघवन्छ
ग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि। इति। हे इंद्र मघवन् यतो यस्मात्पापान्नो रिपोर्निरयाद्वयं भयामहे बिभीम। ततः पापादिभ्यः सकाशा
न्नोऽस्मभ्यं अभयं कृधि कुरु। निष्पापान् निःशत्रून् निर्निरयांस्त्वत्प्रसादाद्भविष्याम इतिभावः। न केवलं पापादित्रितयादभयप्रदानं
अपितु तत्पापादित्रितयं शाग्धि शासनं विनाशय इति यावत्। किंच भक्तत्वेन तव संबंधिना नोऽस्माकं ऊतये रक्षणाय विद्विषो तव बहिः श
त्रून् जहि संहर। कथंभूतान् शत्रून् ये अतिपीडयंतीति विमृधस्तान्। क्विपि द्वितीया बहुवचनं। स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेंद्रः पुर एतु

न: स्वस्तिदा अभयंकर: इति। इंद्रस्नानार्थमुद्यतानां नोऽस्माकं पुर: पुरस्तात्समक्षं नेतु रक्षितुमागच्छतु। कथंभूत: स्वस्ति इहलोकसंबंधि सौ
ख्यं ददातीति स्वस्तिदा:। स राजा देश: विश: भक्ताया: प्रजाया: पति: पालक:। वृत्रं हंतीति वृत्रहा। विमृध: शत्रून्वशयति स्वाधीनीकरोती
ति वशी। वशीकृतरक्ष: संघ इत्यर्थ:। वर्षति पुष्करावर्तकादीन्मेघानाप्य सिंचति भूमिमिति वृषा। स्वस्ति परलोकसंबंधि कल्याणं ददा
तीति स्वस्तिदा: ददाते: क्विप्। अभयंकर: स्पष्टं। अथैकेन मंत्रेण इंद्रादिभ्य: स्वस्तिर्याच्यते स्नानावसरे नक्रग्रहादिजन्या पीडा मा
भूदिति। स्वस्ति न इंद्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा:। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधात्विति। इंद्र: नोऽस्मभ्यं
स्वस्तिं दधातु पोषयतु किंविध:। वृद्धश्रवा:। समृद्धयशा:। पूषा न: स्वस्तिं दधातु किंविध: विश्ववेदा: बहुज्ञानो बहुधनो वा तार्क्ष्यो ग
रुड: न: स्वस्तिं दधातु किंविध:। अरिष्टनेमि: द्राघीयसा पथा गमनेपि राक्षसैरन्यैर्वा अनुपहिंसितरथ: रथैकदेशवाचिना नेमिश
ब्देनोपलक्ष्यते। बृहस्पतिरिंद्रपुरोधा न: स्वस्तिं दधातु निगदव्याख्यातं। अथैकेन मंत्रेण सोमं प्रार्थ्यते। आपांतमन्युस्तृपलप्रभर्मा
धुनि: शिमीवां छरुमां ऋजीषी। सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि देभुरिति। सोमश्चंद्रमा: विश्वानि सर्वाणि वना
नि ओषधिवनस्पतीन्पुष्णातीति शेष:। वनशब्देनात्र द्विजमात्रं लक्ष्यते। केन साधनेन पुष्णाति अतसा गगनमंडले स्वकीयसंतत १३
गमनेन अत सातत्यगमने। सोम: कथंभूत: आपांतमन्यु: तेमागमस्यार्षत्वादापातमन्यु: उपर्युपरि क्रोधवानित्यर्थ:। यथा मातापित्रादय:
शिक्षार्थं बालाभ्याकुप्यंति जातुचित्कायेन चैतु कदाचिदप्येतं गणं तथा भगवान्नक्षत्रवर्गेणापि न कुप्यति जिघृक्षया एतादृशोप आपांतमन्युरि

लक्ष्यते। अहो इदमापातरमणीयमित्यादौ आपातशब्दरूपर्युपरि पर्यायितया प्रयुज्यते। पुनः कथंभूतः। उपलानां चंद्रकांतशि-
लानां प्रभेव प्रभा यस्य सः उपलप्रभः मधुनो माक्षिकादेः प्रियो माधुनिः मधौ वसंतस्य वा वसंते खलु रोहिणीनायकः सम्यगव-
भासते पर्जन्यपटलहिमादेस्तदानीमभावात्। शमीवृक्षो यस्य प्रियत्वेन वर्तते शमीवानिति वक्तव्ये शिमीवानिति प्रयोगश्छा-
दसो द्रष्टव्यः शिमीवान्यथा बिल्ववृक्षः शैवः तथा शमीवृक्षोपि शैव इति हेतोः। बिल्वपत्रवच्छमीपत्राण्यपि चंद्रशेखरमस्तके सम-
र्प्यंते इति शमीचंद्रयोरेकाधिकरणत्वादन्योन्यप्रियत्वं। तथा दारुमान् बहुसौख्यवान् तथा ऋजीषी अतिदीप्तिमान् एवं सो-
मंस्तत्वा इंद्र स्तोतीति। अर्वाक् वचनव्यत्ययः अर्वाचि दूरापेक्षया यान्यर्वाचीनानि प्रतिमानानि उपमानानि गुणपराक्रमादिभिः इंद्र-
न देभुः दंभु हिंसायां। अस्माद्धिटि बहुवचनं न पीडयंति स्मेत्यर्थः। लोके खलु स्वस्यान्य उपमानं दुःखावहं मत्तुल्यं वर्तत इति चिंता-
संपादकत्वात्। तदभावे मत्सदृशो नास्ति इति निरतिशयमहिमप्राप्तेः एवमनुपमानोऽनन्यतुल्यः शचीपतिरस्मानवत्विति वाक्यशे-
षः। अथैकेन परमात्मा प्राप्यते। ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। स बुध्निया उपमा अस्य विष्ठाः सतश्च यो-
निमसतश्च विवरिति। परब्रह्मदेवत्या त्रिष्टुप् याज्ञवल्क्यदृष्टा। ब्रह्म त्रिलोकीं विआवः स्वप्रकाशेन विवृतानकरोद्व्यवहिताश्चेति उपस-
र्गक्रिययोर्व्यवधानं लोकाः कीदृशाः सुरुचः शोभनं रोचंते शोभंते इति सुरुचः तान् ब्रह्म कीदृक् प्रथमं सर्वदेवताद्विमं तथा पुरस्तात्प्राच्यां दिशि
सूर्यरूपेण जज्ञानं जायमानं विराजादिजनने पुरस्तात्प्राक् हिरण्यगर्भरूपेण वा जज्ञानं जनने शोभनं विशापः श्च्योसतिजज्ञानमिति रूपं तथा वेनः व्ये

ना॰उ॰भा॰ त्ययेन वेनं सर्वकमनीयं। वीकांत्यादौ। किमारभ्य सीमतः द्वितीयायां। लुकि सिद्धं। सीमानं मर्यादां भूलोकमध्यभागमारभ्य स्करुच स्त्रीन्लोका
१४ न्व्यावः प्रकाशितवानिति भावः। वीकांत्यादौ अस्मात् वि आङ् पूर्वात् लङि मध्यमैकवचने पि व्यत्यये नव्रथमपुरुषो ग्राह्यः। त्रैलोक्यप्रकाशमे
व स्फुटीकरोति स व्यत्ययेन तङ्गस बुभ्रियाः प्राच्यां याद्दिशः सतो विद्यमानस्य घटपटादेः योनिस्थानं। असतो अमूर्तस्य वाय्वादेश्चयो
निं प्र भवं विवः प्रकाशायति वृणोतेः शपि लुक्से लङि गुणे च विवरिति रूपं अमाङ्योगेप्यदो प्राप्तिश्छांदसी बुभ्रियाः कीदृश्यः उपसमीपे मांति
तिष्ठंति भूतानि यास्स ताउपमास्तावकाशादित्यर्थः। माङ् माने वर्तनेन्चेति धातुपाठः। अतएवास्यजगतो विधाः विविधा धारयित्र्यः विविधा तिष्ठंति
यास्विति व्युत्पत्तिः। अत्रउपसर्गात्सुनोतीत्यादिना षत्वं एनादृक् बुभ्रियाः सदसद्योनिं प्र भवप्रकाशयति तस्य भासा सर्वमिदं विभातीति मं
त्रांतरादिति भावः। बुभ्याःवैदिशः इति श्रुतेः। अथपुनर्द्वाभ्यां परिगृहीत मृत्तिकाद्यर्थं पृथिवी प्रार्थ्यते। स्योना पृथिवि भवानृक्षरा निवेश
नी। यच्छनः शर्म सप्रथा इति। हे पृथिवि विशालेभूमे त्वंनो ऽस्मभ्यं स्योना घोनकं मणिडुः स्वांतकं अरभव। शर्म ऐहिकामुष्मिक सुखमपिय
च्छ देहि छांदसं दीर्घत्वं। कथंभूतान्नृन्मनुष्यान् तदुपलक्षितचतुर्विधभूतग्रामं सारयत्कत्वादयति इति नृक्षरा उत्पाद्योत्वन्नान् आमार
णयादिस्थानेषु निवेशयंती यथायथं स्थापयंती तिनिवेशनी प्रथमामलमूत्रगंडूषनिष्ठीवनादि सहिष्णुतालक्षणयाक्षांत्यासह वर्तमाना सप्र
था: गंधद्वारं दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं इति। या पूर्वोक्ति श्रीसामयाभिष्टुतानां नूदेवतां इहास्मिन् १४

स्नानकर्मणि उपह्वये समीपमाह्वयामि । कथंभूतां श्रीयते आश्रीयते चतुर्विधैर्जंतुभिरिति श्रितां श्रियं गंधो द्वारमनुमापकलिंगं यस्याः सा
गंधद्वारा तां इयं पृथिवी भवितुमर्हति गंधवत्वादित्यनुमानगम्या मित्यर्थः । दुराधर्षां कुद्दालखननाद्युपायसहस्रैरप्यकंप्यां नित्यपुष्टां नाना
नानाविधैः सस्यैर्नगरग्रामादिभिर्गिरिनदीसमुद्रद्वीपादिभिः पुष्टां नित्यपुष्टां नित्या चासौ पूर्वोक्तैः पुष्टेति वा तां करीषिणीं कृषि
वलैः बीजावापैः पच्यमानां करीषं गोमयमस्यास्तीति करीषिणी गवादिपशवो यस्यां संति सा करीषिणी तामिति वा नाना
विधचतुष्पाद्वतीमित्यर्थः । सर्वभूतानामीश्वरीं स्वयं । एतैर्मंत्रैरभिमंत्रितां मृत्तिकामादाय तलमलकमुपलिप्य जलप्रवेशनार्थं
प्रार्थनामंत्रानाह । श्रीर्मे भजतु । अलक्ष्मीर्मे नश्यतु । विष्णुमुखा वै देवाश्छंदोभिरिमान्लोकाननपजय्यमभ्यजयन् । महाँ इंद्र
ो वज्रबाहुः षोडशी शर्म यच्छत्विति । मे मां श्रीर्गजंति लक्ष्मीर्मे भजतु मे ममत्वं नाशिनी । अलक्ष्मीर्ज्येष्ठा देवी नश्यतु अस्मत्तोऽस्मत्कु
लतोऽस्मद्बंधुवर्गतोऽस्मद्ग्रामतोऽस्मद्राष्ट्रतो वा कोटियोजनांतरिते दूरीभवत्वित्यर्थः । किंच ये विष्णुमुखाः लक्ष्मीपतिप्रधाना देवाश्छंदो
भिर्वेदविहितैः साधनैरिमान् प्रत्यक्षान् चतुर्दशसंख्याकान्लोकानभ्यजयत् चिरायद्वय भोगाय जिग्यिरे अभिभूतवंतो जयप्रति
लब्धिः कथमनपजय्यं रक्षोनायकैरपजेतुमशक्यं यथा तथा तेनो भीष्टप्रदा भूयासुरिति वाक्यशेषः । वे प्रसिद्धो । अपिच
वज्रबाहुरिंद्रोपि नः शर्म यच्छतु कीदृशो महान् त्रिलोकीपूज्यः । षोडशकला अस्य संति षोडशी राकाचंद्रः तदुपमानं यथा

सर्वाभीष्टस्तथेंद्रोपि। यद्वा योऽश्नीति योऽश्नात्यश्नारात्रीविशेषोच्यते तज्जपपूर्वकत्वादिंद्रोपि योऽश्नीत जपश्र भावादेव शचीपतिरैंद्रीपदवीमा
जगामेति प्रसिद्धेः। स्वस्तिनो मघवा करोतु हंतु पाप्मानं योस्मान्द्वेष्टि इति। यजुः। मघवा शचीपतिः नः स्वस्तिकरोतु यः अस्मान्द्वे
ष्टि तं पाप्मानं हंतु। सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवंतं य औशिजः। शरीरं यज्ञशमलं कुसीदं तस्मिन्सीदतु योस्मा
न्द्वेष्टि इति। हे ब्रह्मणस्पते। शाखोपशाखोसहितानां वेदानां परिपालक हे परमात्मन् मां सोमानं सोमलताभिषोतारं स्वरणं
सर्वशाखासूदात्तादिस्वरनेतारं च कृणुहि कुरुष्व। त्वदनुग्रहात्स्वरादियुक्तं वेदानधीत्य सोमादिक्रतून्करिष्यामीत्यर्थः। किंच। उशि
ङ् नाम माता तस्यापत्यं पुमानौशिजः नामतः कक्षीवान् विभक्तिव्यत्ययः। यः परमर्षिः समं माशरीरं यज्ञशमलं यज्ञक्रतुविष
ये श्रमं श्रमसहिष्णुत्वं कृत्वा तिस्वीकरोतीति यज्ञशमलं करोतु। किंच। यः शत्रुः अस्मान्द्वेष्टि स तस्मिन्सीदतु चिरकालं तिष्ठतु
कस्मिन्नित्यत आह कुसीदं नरकं कुत्सितं यथा तथा सीदंति पापिनो स्मिन्निति व्युत्पत्तिः। जानुदघ्ने जले प्रविश्य जप्यो मंत्रावाह। चरणं पवि
त्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेमेति। अनेन मंत्रेण लक्ष्मीपतिश्चर
णारविंदं स्तूयते। तेन वैष्णवेन चरणेन पूताः पवित्रितास्तः करणा वयं अरातिं नरकहेतुत्वेन शत्रुभूतं पाप्मानं अतितरेम तेन कीदृशेन
पवित्रेण शुद्धेन स्वच्छं। येन केन येन न पूतो नाम सर्वो दुष्कृतानि तरति तच्चरणं पवित्रं विततं विस्तृतं भूम्यंतरिक्षस्वर्गं यो मा क्रांतत्वात्। १५

पुराणं पुरातनं विष्णोः पुराणपुरुषत्वात्तदवयवानामपि पुराणत्वं। अयमेव मंत्रो ब्राह्मणचरणप्रक्षालनेपि विनियुज्यते। सजो
षा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहन्छूर विद्वान्। जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो न इति। हे वृत्रहन् हे शूर हे इं
द्र अस्मदधिष्ठितेषु अग्निष्टोमादिक्रतुषु समागत्याग्नौ हूयमानं सोमं पिब त्वं कथंभूतः। समानास्वांतःकरणवृत्त्यनुरूपा जोषः प्री
तिर्यस्यासौ सजोषाः। गणैः स्वकीयपरिचारकैः सह वर्तत इति सगणः विद्वान् सर्वज्ञः। कैः सह मरुद्भिः सहदेवताभिः सह मरुच्छ
ब्दोत्र देवतामात्रवचनः अपि च शत्रूँरपमृधः इत्यत्र दीर्घादटि समानपादे इति नस्य रुत्वं पूर्वस्य सानुनासिकत्वं च तथा शत्रून् अप मृ
धः इति पदच्छेदः शत्रून् जहि मृधः किंपि हिंसाया बहुवचनं संग्रामान् अपनुदस्व विनाशय अथानंतरं नोऽस्मभ्यं विश्वतः सर्वतः
अभयं कृणुहि। नाभिद्रव्यसजले स्थित्वा जप्यान्मंत्रानाह। सुमित्रान आप ओषधयः संतु दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च वयं
त्रा: द्विष्मः इति। नोऽस्मान्प्रति आप ओषधयश्च सुमित्राः सुहृदः संतु यो स्मान्द्वेष्टि यं च वयं द्विष्मः इति। नो स्मान्प्रति आप ओषधयश्च
सुमित्राः सुहृदः संतु यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तस्मै दुर्मित्राः दुर्हृदो भूयासुः अस्मभ्यं सुखं शत्रुभ्यो दुःखं च अब्देवता ओषधिवन
स्पतिदेवताश्च कुर्वंत्वित्यभिप्रायः। आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे। यो वः शिवतमो रसस्तस्य भाजय
तेह नः। उशतीरिव मातरः। तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च न इति। हि ष्ठा मंत्रे हि स्थ इति पदच्छेदः हे आ

नां॰ उ॰ भा॰

१६

पः हि यस्मात् कारणात् । याः यूयं मयो भुवः स्थ । स्नानपानादिहेतुत्वेन सुखप्रापयित्र्यो भवथ । तस्मात्कारणात् ताः यूयं नः अस्मान्
भक्तान् स्मान् दधातन पोषयत कस्मै प्रयोजनाय चक्षसे परमात्मदर्शनाय । कथंभूताय । रणाय रमणीयाय तत्र महे इति पूज्यत
माय तस्मै महे मोक्षरूपफलत्वान्महते भुक्तिमुक्तिप्रयोजनाय अस्मान्पोषयत अन्यथा जीवनं व्यर्थमित्यभिप्रायः । किंच हे आपः वो
वो युष्माकं यः शिवतमः कल्याणतमो माधुर्यलक्षणो रसोऽस्ति तस्येहास्यां भुवि विद्यमानान्नोऽस्मान्भाजयत प्रापयत तस्यानं
कुरुतेत्यर्थः । यथा भाजने जलं तिष्ठति तथा युष्मदीयः रसोऽस्मासु तिष्ठत्विति भावः । अत्र निदर्शनं प्रदर्शयति इव यथा मातरः स्वापत्य
मुत्तमं गुडादिकं प्राशयन्ति तथा कथंभूताः उशतीः उशत्यः । अपत्यवृद्धिं कामयमानाः पुत्र उहि त्वादि स्नेहवत्य इति यावत् । किंच हे आ
पः वो युष्मान् वयं अरमत्यर्थं शरणं गमाम प्राप्नुमः । कस्मै प्रयोजनाय शरणीकरणं यस्यास्मदीयस्य पापजालस्य क्षयाय विप्रणा
शाय यूयं जिन्वथ प्रीतिं कुरुथ । तस्मै तत्क्षयार्थमेव युष्माभिरपि भाक्तत्वादस्मत्पापक्षयार्थमेव यत्नः क्रियते अस्माभिरप्येतदर्थमे
व युष्मच्छरणं क्रियते अन्यथा कथमस्मत्पापक्षयार्थे युष्माभिरुद्यमतां इत्यभिप्रायः । किंच भो अब्देवताः नो अस्मान् जनयथ पुत्र
दुहि त्वादिजननसमर्थान् कुरुथ । इतः परं द्वाभ्यां मन्त्राभ्यां वरुणाभिधानां अधिष्ठातृ देवतां प्रार्थयते । हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचि
तः । यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं । तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनरि १६

रः साश्रितवर्गश्च मुक्त्वा चांते यथेष्टं पुण्यकृतां लोकानां आप्नुहीति। जले निमग्नस्य प्राणायामार्थं अघमर्षण सूक्तमाह। ऋतंच सत्यं
चाभीद्धात्तपसोध्यजायत। ततोरात्रिरजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधिसंवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य
मिषतोवशी। सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्। दिवंच पृथिवीं चांतरिक्षमथो स्व रिति। तिसृणा ऋचामेकेकपदयोजना। अभितः
इद्धः अभीद्धः इद्धं दीप्तं सोसर्वतो देदीप्यमानः परमात्मा तस्मादभीद्धात्परमात्मनः सकाशात् ऋतं यावत्ज्ञानोदयः तावत्तथ्यं पृथिव्या
दिभूतपंचकं अजायतोत्पन्नं। किंच सत्यं यावत्ज्ञानोदयस्तावत्तथ्यं भुवनचतुर्दशकं अजायतोत्पन्नं। पंचभूतानां चतुर्दशभुवनानां
च सत्यत्वस्य ज्ञानोदयावधित्वात् ज्ञानोत्तरकालं मिथ्यात्वांगीकाराच्च। चकारद्वयं तदंतर्वर्तिप्राणिवर्गसमुच्चिनोति ननु भूतपंचकं
भुवनचतुर्दशकंच कदा समुत्पन्नमिति चेत्तत्र शृणु। तपसः अधि पर्यालोचनादूर्ध्वं अहं ब्रह्मांडमेवोत्पादयामि इत्यभिध्यानजीवयामि इ
तिपर्यालोचनानंतरं अजायतेत्यर्थः। तथाच श्रुतिः। सोकामयत। बहुस्यां प्रजायेयेति। सतपोतप्यत। सतपस्तप्त्वा। इदं सर्वम
सृजत। यदिदं किंचेति। तपपर्यालोचन इति धातुपाठात् अत्र तपः शब्देन पर्यालोचनं गम्यते। लोकानुभवोपि कुलालो घटमुत्पादया
मीत्यालोच्य घटमुत्पादयति। शरावमुत्पादयामीत्यालोच्य शरावमुत्पादयतीत्यादाय तत्तो भूतभुवनोत्पत्त्यनंतरं रात्रिस्त्रियामा अ
जायत। औपलक्षण्येन अहरप्यजायतेति मंतव्यं ततः अहोरात्रोत्पत्ति अनु समुद्रः सप्तधाभिन्नः पारावारो अजायत। अर्णांसि जलानि

ना॰ भु॰ भा॰ सिद्धिं तोयस्मिन्निस्यर्णवः। वापीकूपतडागादिरजायत समुद्रादर्णवादधि समुद्रार्णवजन्मनः पश्चात्संवत्सरः द्वादशमासात्मकः
१८ त्रयोदशमासात्मकश्च अजायत संवत्सरः। कथंभूतः। अहोरात्राण्येवोपलक्षणं नघटिकामुहूर्तप्रहरादींश्च विदधत् विदधानः कुर्वाणइ
तियावत्। पुनः कथंभूतः। वशीस्वाधीनकर्ता लोकस्य विश्वस्य जगतः कथंभूतस्य निमिषतः निमेषं कुर्वतः उपलक्षणमेतत् अनिमिषतः ने
त्रं व्यापारं कुर्वतो कुर्वतश्चराचरात्मकस्येति भावः संवत्सरात्मकः कालः परमात्मनः सकाशादुत्पन्नः सन् सर्वंजगद्वशीकरोतिइत्यभि
प्रायः। ननु आधाराधेयभावेन विद्यमानं सर्वं ब्रह्माण्डं परमात्मोत्पादयामास एकं तत्कथं आधारमुत्पादयामासेत्यत आह। धातापर
मेश्वरः। सूर्याचंद्रमसौ पुण्यवंतो पृथिवीमंतरिक्षं दिवं एवः लोकत्रयस्य भोग्यजातं अथो अथः इत्यस्मिन्नर्थे ओतं तव्यं। अधस्तादि
द्यमानं लोकसप्तकमपि यथापूर्वं पूर्वपूर्वकल्पेषु यथा यथाकल्पयत्। अजनयत् तथा तथेदानीं तनेकल्पेप्यकल्पयदित्यर्थः। चकारउक्त
मनुक्तसमुच्चिन्वानो केचित्तु ऋतं यथार्थभाषणं सत्यं यथार्थसंकल्पमिति व्याचक्षते। तेषां व्याख्याने भूतभवनो त्यस्यानंतरं इत्यादावध्याहर्तव्यं
मन्यथाभूतानि भुवनानि चनोत्पन्नानि चेत्कुतः प्राणिनः कुतो वाङ्मनसादिव्यापारः कथं वा समुद्रा ख्यायन्तिः अस्मदुक्तं वा श्रेयः। अघमर्षणं
कृत्वा ततऊर्ध्वं अवगाहनार्थाश्च चोदयति। यत्र पृथिव्याः रजः स्वमान्तरिक्षे विरोदसी। इमाः स्तदापो वरुणः पुनात्वघमर्षणः पुनंतु वसवः पुनः
नुवरुणः पुनात्वघमर्षणः। एवंभूतस्य मध्ये भुवनस्य गोप्ता। एषपुण्यकृतां लोकानेष मृत्योर्हिरण्मयं। द्यावापृथिव्योर्हिरण्मयं संश्रितं १८
एवः। सनः स्वः सं शिशाधि। इति। पृथिव्यां वर्तमानानां अस्माकं रजः स्वकीयं पापं यदस्ति अंतरिक्षे सर्वतोंतरिक्षलोके विरोदसी विशेषेण रोदस्यो

ति। सुवर्णमयं शृंगं गवड्डुपर्यवस्थितं मुकुटं यस्यासौ हिरण्यशृंगः। तादृशं वरुणं जलाधिपतिं प्रपद्ये अनुग्रहार्थं प्राप्नोमि। तादृशो वरुण त्वं मया
याचितः प्रार्थितः सन् तीर्थं अवतरणस्थानं देहि। किंच। असाधूनां गृहे मया यद्भुक्तं तथा पापेभ्यः पापिभ्यः सकाशात् प्रतिग्रहश्च यः कृतः
यच्चाप्यदपि यद्दुष्कृतं मानसं वाचिकं चानुष्ठितं मे मदीयं तत् इन्द्रादयो देवाः तदशेषं पुनन्तु शोधयन्तु। जलावस्थितदेवान्प्रति नमस्कारमंत्रं
दर्शयति। नमोग्नयेप्सुमते नम इंद्राय नमो वरुणाय नमो वारुण्यै नमो ऽद्भ्य इति। आपायस्याग्नेः संति सोयमप्सुमान् जलमध्ये निगू
ढ इत्यर्थः। तथाविधायाग्नये इंद्राय वरुणाय वारुण्यै वरुणपत्न्यै जलाभिमानिदेवताभ्यश्च नमस्कारोस्तु। निमज्जनप्रदेशे दुष्टजलाप
नयनमंत्रमाह। यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतादिति। अपां संबंधि यत्क्रूरं रूपं मरणकारणमावर्तादिरूपं यच्चामेध्यं निष्ठी दि
वनादिदुष्टं। यच्चाशान्तं वातश्लेष्मादिजनकं तत्सर्वमस्मान्निमज्जनप्रदेशादपगच्छतु। निमज्जनमंत्रमाह। अत्याशनादतीपा
नाद्यच्च उग्रात्प्रतिग्रहात्। तन्मो वरुणो राजा पाणिना ह्यवमर्शतु। सोहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठ
मारुह्य गच्छेद्ब्रह्मसलोकतामिति। देवपितृमनुष्यादियत्समतीत्य भुक्तमत्याशनं। देवर्षिपितृतर्पणमतीत्य पीतमुदकं अतिपानं
उच्चाशत्रवतश्च यः पुमान्तस्माद्यो धनप्रतिग्रहः स उग्रः। एतैरत्याशनातिपानउग्रप्रतिग्रहैः संपादितं यत्पापं मदीयं तत्सर्वं वरुणो
राजा नः अस्माकं स्वामी स्वकीयेन पाणिनापनयतु। ततः पापरहितः सोहं रजोगुणरहितः संसारकारणरागद्वेषादिदोषान्निर्मुक्तः। अतएवानुष्ठा

ना॰ उ॰ भा॰ ध्यास्यमानः पापरहितः स्वर्गस्योपरि भागमारुह्य ब्रह्मणा हिरण्यगर्भेण समानलोकत्वं गच्छेयं। यश्चाप्स्वरूपः स पुनात्वघमर्षणः इति
१७ यजुः२ अप्सु सन्तमसुद्रोकेषु नानाविधमहानदीनदसु दीर्घिका। कूपाकदकेषु च यो वरुणो अधिष्ठाता स नवर्तते स नः पुनातु। कथंविधः अघं
महापातकमपि कर्षति विनाशयतीत्यघमर्षणः। तीर्थभूतानां गंगादिनदीनां आवाहनमन्त्रमाह। इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तो
मं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमयेति। हे गंगे विश्वनाथराजधानीसमीपस्थभागीरथि हे
यमुने। आदित्यतनये हे सरस्वति नदीरूपेण विद्यमान ब्रह्मपत्नि हे शुतुद्रि एतन्नाम सरिद्वरे। हे आर्जीकीये एतन्नाम सरि[illegible]मरुद्वृधे ए
तन्नाम सरिद्वरे यूयं इमे व्यत्ययेन मया इमं मनः पूर्वकं वाचा प्रयुज्यमानं स्तोमं स्तुतिरूपमन्त्रसमुदायं शृणुहि व्यत्ययेन शृणुत यूयं त्वा च सु
षम स्वस्य स्थानेभ्यः आसचत उपसर्गव्यवधानं सचते दैर्घ्यं च छांदसं। आगच्छत मां पावयितुं यद्वाव स्थितुं दातुं च अस्तु ते स्थानस्ना
न जलमध्यभागं प्रतीति शेषः। सन्निधध्वं चकाभिः सह परुष्ण्या नाम नद्या सिक्न्या सह सुषोमा नाम नदी तया सुषोमया सह आर्यथि
तुरयमाशयः। यद्यप्यहं एतन्मन्त्रोक्तानां अनुक्तानां च महानदीनां रोधांसि गत्वा चिरंतनकाले स्थित्वा स्नात्वा पीत्वा दिवसान् यनेतुमक्षमः
तथाप्यहं यत्र कुत्रचिद्भद्रकूपोदकेन स्नानं कुर्वाण एतेन मन्त्रेण गंगाद्या नदीरुपतिष्ठ उपस्थितास्ताः सन्निदधतां सन्निधाय
च मदीयानां महतामघानां विनाशं विदधतां विधाय चैवं मामभिदधतां पुनो सिन्धुः [illegible] भोमा भोगा स्वकुटुंबः सपरिवा
४ परुष्णि या असिक्नी नाम नदी तया असि[illegible]छांदसः वितस्ता नाम नदी तया १७

द्यावापृथिव्योर्यत्पापमस्ति अन्तरोदस्योः पृथगुक्तत्वात्पृथिव्यामितिपदेन भूमेरधस्ताद्वर्तमानः पाताललोको विवक्षितः सर्वेष्वपि लोकेषु
तत्र जन्मान्यनुभवतामस्माकं यत्पापमस्ति तत्सर्वं पापं तदनुष्ठानाद्वा नस्मांश्च वरुणः पुनातु शोधयतु पापं विनाशयतु स्थानस्मान्क
रोतु। कीदृशो वरुणः। आपः जलस्वामित्वेन तद्रूपः अघानि मर्षयति विनाशयति इत्यघमर्षणः। किंच वसवः पुनंतु वरुणः पु
नातु। अघमर्षणनाम ऋषिः पुनातु तादृश एव वरुणो भूतस्यातीतस्य भुवनस्य प्राणिजातस्य गोप्ता रक्षिता तथा भूतस्य भव्य
स्य भविष्यतोपि जगतो गोप्ता एव वरुणः पुण्यकृतां ज्योतिष्टोमादिपुण्यकारिणां लोकान्प्रयच्छतीति शेषः। एवं वरुणो मृ
त्योः सर्वप्राणिमारकस्य यमस्य संबंधिनं हिरण्मयं लोकं विशेषेण आणिनां प्रयच्छतीति शेषः। यत्तु हिरण्मयं ब्रह्मांडरूपं स्व
वः स्वर्गशब्दाभिधेयं द्यावापृथिव्योः द्युलोकभूलोकयोः संश्रितं वर्तते हे वरुण स त्वं नोऽस्मान्प्रति सुकृतस्तादृशं स्वर्गलोकं संदिश
धि। सम्यगनुगृहाण। इति स्मिभिः ऋग्भिः स्नातवतः पुरुषस्याचमनमंत्रोऽनाह। आर्द्रं ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वल
ति ब्रह्माहमस्मि। योऽहमस्मि ब्रह्माहमस्मि। अहमस्मि ब्रह्माहमस्मि। अहमेवाहं मां जुहोमि स्वाहेति। येदेनदुदकरूपमार्द्रं त
दंतत्स्वोधिष्ठानचैतन्येन ज्वलति प्रकाशते तेनाधिष्ठानचैतन्यरूपं ज्योतिरहमस्मि देहेंद्रियादिभ्यो विभिन्नस्स्वम
मतदेवाधिष्ठानचैतन्यं स्वरूपमित्यर्थः। तदेवोपपाद्यते। यज्ज्योतिर्ज्वलतीत्युक्तं तज्ज्योतिर्ब्रह्मैवेत्यनेन ज्योतिरहमस्मीति वाक्येन ब्रह्माहमस्मीति उक्तं

ना॰ उ॰ भा
१९

बिनाश्य रूपांतरस्य ब्रह्मत्वलक्षणस्य प्राप्तिर्भवति ॥ किंतु योहं पुरा जीवोस्मि स एवेदानीं अहं
भवति ननु पूर्वसिद्धं जीवात्मनः स्वरूपं ब्रह्मास्ति यस्मात् ब्रह्मरूपमपि पूर्वमज्ञानाज्जीवत्वमारोपितमासीत् । तस्मिन्नज्ञाने
विवेकेनापनीते सति यस्मात् पूर्वमेव सिद्धमेव ब्रह्मस्वरूपमिदानीमनुभविता स्मि । ननु नूतनं किंचिद्वस्तु मोगतमहमहमे
व अहंकारसाक्ष्येव ननु अहंकारे स्वरूपः अहं ब्रह्मास्मि तस्मादहमेवाहं ब्रह्मा न त्वानुभववेलामपि पूर्वसिद्धोहमेव न तु पो बिल्याग्नि
ध्यानवदुपचरितं ब्रह्मांचं तादृशोहं जलरूपं मां जुहोमि उदराग्नौ प्रक्षिपामि हविः प्रदानवाचि स्वाहा शब्दः महेहवर्तिभ्यो देवताभ्यो
जलरूपं हविर्ददामित्यर्थः । आचमनादूर्ध्वं पुनरपि स्नानमंत्रमाह । अकार्यकार्यवकीर्णि स्तेनो भ्रूणहा गुरुतल्पगः । वरुणोपामघम
र्षण स्तस्मात्पापात्प्रमुच्यते इति । अकार्यं राज्ञप्रतिषिद्धं कलंजभक्षणादिकं तत्कर्तुं शीलं यस्यासौ अकार्यकारी । प्रतिषिद्धस्त्रीगम
नवानवकीर्णी ब्राह्मणरूपवर्णहर्ता स्तेनः । वेदवेदांगविद्ब्राह्मणः तद्गर्भो वा भ्रूणः तं हंतीति भ्रूणहा गुरुदारगामी तु गुरुतल्पगः
एतादृशापापकारिणामपि मामघमर्षणः पापविनाशकोपांस्वामी वरुणः तस्मात्सर्वस्मात्पापात्प्रमुच्यते मोन्ययजुरहस्यपाप
क्षयार्थं स्नानमंत्रमाह । रजोभूमिस्त्वमांरोदयस्व प्रवदंति धीराइति यजुः हे परमात्मन् हे यद्यापरजो भूमिः पापस्थानः तथा
पि तु अनुस्वारलोपश्छांदसः । त्वं मां न रोदयस्व नकारोध्याहर्तव्यः मदीयपापफलमाभोजयित्वा न रोदय किंतु पापं बिनाशयानु
ग्रहोपादिति धीराः धीमंतः शास्त्रपारगताः प्रवदंति यतोहमपि प्रवदामीत्यर्थः । स्नानादूर्ध्वं जपमंत्रमाह । आक्रांतसमुद्रः प्रथमे वि १९

विधर्मंजनयन्प्रजाभुवनस्यराजा ।वृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुरिति ।समुद्रवत्घोरत्वादसंगोदासीना
संमोहात्मनःपरमानंदस्वभावत्वाद्वासमुद्रःपरमात्मासन्चसर्वंजगदाक्रान् आंक्रांतवान् व्याप्तवान् ।किंकुर्वन्अयमेस्त्रष्टेरादिकाले
प्रजाजनयन्कीदृशोप्रथमेकालेविधर्मन्प्राणिभिःपूर्वकल्पेऽनुष्ठितानाविविधाधर्मायस्मिन्कालेस्वफलदानार्थंउद्बोध्यंतेसोयं
विधर्मातस्मिन्सन्चपरमात्माभुवनस्यपालकत्वाद्राजास्वभक्तानांकामानांवर्षणहेतुत्वाद्वृषाईश्वरःसर्वंअव्याप्तवान् किंचसानो
सानोपर्वतपार्श्वभागेअत्यंतरेतंब्रह्मगिरिरित्याचक्षतेइतिश्रवणाद्ब्रह्मावबोधयोग्योदेहेगिरिस्तदवयवःसानुवत्स्हृदयपुंडरीकं
तन्व्यपुंडरीकंतच्चपवित्रंबाह्यदेहावयववद्विष्टस्पर्शादिदोषाभावात्तच्चरूपंअधिपुरुषप्राप्तिहेतुध्यानस्थानत्वादितरावयवेभ्योप्य
धिकं अतएवध्यातृणामवनस्यपालनस्यहेतुत्वाद्यंहिमवत्युमायागौर्याब्रह्मविद्याभिमानरूपत्वाद्गौरीवाचकउमाशब्दोब्रह्मविद्यामु
पलक्षयति ।अतएवतलवकारोपनिषदि ब्रह्मविद्यामूर्तिप्रस्तावे ब्रह्मविद्यामूर्तिः ।पठ्यते ।बहुशोभमानामुमांहैमवतींतांहोवा
चेति ।तद्विषयःपरमात्मतस्ययाउमयासहवर्तमानत्वात्सोमःसन्चसानोहृदयपुंडरीकेबृहद्ब्रह्मयथाभवतितथावावृधेवृद्धिंप्राप्तःपू
र्वमविद्यावृतत्वेनसंकुचितोजीवोभूत्वातस्यामविद्यायांविद्ययाधनीतायांब्रह्मत्वाविर्भावात्सवृद्धइवभासतइत्यर्थः ।सन्चसोमःसु
वानोजीवानांधर्माधर्मयोःप्रेरकःइंदुःफलप्रदानेनचंद्रवदाह्लादहेतुः ।।इतिश्रीनारायणोपनिषद्भाष्येप्रथमोनुवाकः ।अथद्वितीयेनुवाकः ।।

तत्रानिष्टपरिहारार्थत्वेन जप्यामंत्रास्तत्र प्रथमामृचमाह । जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा
नावेव सिंधुं दुरितात्यग्निरिति । वेदांसि वेदनानि ज्ञानानि तानि जातान्युत्पन्नानि यस्मादग्नेः सोयं जातवेदाः । आधानेन संस्कृतेग्नौ
पश्चात्कर्तव्यविषयाणि ज्ञानान्युत्पद्यंते तस्मै जातवेदसे यागकाले लतात्मकं सोमं सुनवाम अभिषुतं करवाम स्वयं सर्वं वेत्तीति वेदोग्निः
स चारातीयतोस्मासु शत्रुत्वं कर्तुमिच्छतः पुरुषान्निदहाति नितरां भस्मीकरोति किंच सोग्निर्नोस्माकं विश्वा दुर्गाणि सर्वा आप
दोतिपर्षत् अतिशयेन पारितवानित्यर्थः । किंच यथा लोके नावा सिंधुं समुद्रं नाविकस्तारयति तथाग्निर्दुरितानि पापान्यतिशयेन तारयतीति
शेषः । द्वितीयामृचमाह । तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः इति । येयं वन्ह
दुर्गा कल्पादिषु मंत्रशास्त्रेषु प्रसिद्धा तां दुर्गां देवीं शरणं अहं प्रपद्ये कीदृशीं अग्निसमानवर्णां तपसा स्वकीयेन संतापेन ज्वलंतीं अस्मच्छ
त्रून्दहंतीं विशेषेण रोचते स्वयमेव प्रकाशते इति विरोचनः परमात्मा तेन दृष्टत्वाद्वैरोचनीं कर्मफलेषु स्वर्गपशुपुत्रादिषु निमित्तभूतेषु जुष्टामुपास
कैः सेवितां । हे सुतरसि सुष्ठु संसारतारणे तोद्देवि तरसे तारयित्र्यै तुभ्यं नमोस्तु । तृतीयामाह । अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि
विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोरिति । हे अग्ने नव्य स्तोतव्यस्त्वमस्मान्स्वस्तिभिः क्षेमकारिभिरुपायैर्विश्वा दुर्गाणि अतिस
र्वा आपदोतिशयेन लंघयित्वा पारय संसारस्य परतीरं नय नोस्माकं त्वत्प्रसादात् पूश्च पुरी निवासयोग्या पुरी सापि पृथ्वी विस्तीर्णा भवतु उर्वी सर्वसस्यनिष्पा
दयोग्या भूमिरपि बहुला भवतु त्वं च नोकाय तनयाय अस्मदपत्याय तदीयपुत्राय च शंयोर्भवस्रवस्य मिश्रयिता भव । चतुर्थीमाह । विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा

रितातिपर्षि॥ अग्ने अत्रिवन्मनसा गृणानो ऽस्माकं बोध्यविता तनूनां इति॥ हे जातवेदः दुर्गहा सर्वासामापदामपहंता त्वं विश्वानि दुरितानि
सर्वाणि पापानि नावा सिंधुं समुद्रमिव नो ऽस्मानतिपर्षि अतिशयेन तारयसि हे अग्ने अत्रिवदाध्यात्मिकादितापत्रयरहितत्वेनात्रिर्मा इव
ध्यो जीवन्मुक्तो महर्षिः आत्मोपम्येन भूतानां दयां कुर्वन् तमानव इत्येतच्छास्त्रमनुसृत्य सर्वेपि सुखिनः संतु सर्वे संतु निरामया इत्येवं म
नसा यथा सर्वदाभासयति तथा त्वमपि मनसा गृणानः उच्चारयन् भावयन् अस्माकं तनूनामविता रक्षिता भूत्वा बोधि बुध्यस्व सावधा
धानो भवेत्यर्थः॥ पंचमीमाह॥ पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्सधस्थात्॥ स नः पर्षदति दुर्गाणि विश्वा क्षामद्दे
वो अति दुरितात्यग्निः॥ इति॥ पृतना परकीयसेना तां जयतीति पृतनाजित् अत एव सहमानं शत्रूनभिभवंतमुग्रं भीतिहेतुमग्निं
परमादुत्कृष्टात्सधस्थात्स्वकीयैर्भृत्यैः सहावस्थानदेशात् हुवेम आह्वयामः॥ स न इत्यादि पूर्ववत्। किंचाग्निर्देवः क्षामत् अस्मा
नपराधिनः क्षममाणः अति दुरितानि अतिशयितानि पातकानि ब्रह्महत्यादीन्यति लंघयतीति शेषः॥ षष्ठी मृचमाह॥ प्रत्नोषि क
मीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि॥ स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्वेति॥ हे अग्ने त्वमध्वरेषु यागेषु ईड्यः स्तु
त्यः सन् कं सुखं प्रत्नोषि प्रतनोषि विस्तारयसि॥ सनात् च कर्मफलदातापि सन् होता होमनिष्पादको नव्यः स्तुत्योपि भूत्वा [illegible] सत्सि सी
दसि यागदेशे तिष्ठसि अतो हे अग्ने स्वां च स्वकीयामपि तनुवं पिप्रयस्व अस्मदीयहविषा प्रीणय ततो ऽस्मभ्यं च सौभगं शोभनयोग्यापत्यं

आमजस्य सर्वतो देहि॥सप्तमीमृचमाह॥गोभिर्जुष्टमयुजो निषिक्तं तवेंद्र विष्णो रनु संचरेम॥नाकस्य पृष्ठमभिसंवसानो वैष्ण
वीं लोक इह मादयंतां इति॥हे इंद्र वयं तव व्यत्ययेन त्वामनु संचरेम भृत्या इव त्वत्सेवका भवेमेत्यर्थः तव कथंभूतस्य न युज्य ते
पापैर्दुःखैश्चेति अयुक्तस्य अयुजः तथा विष्णोः सर्वयागेषु व्यापनशीलस्य किमुद्दिश्य गोभिर्धेनुभिर्जुष्टं निषेवितं अमृत
धाराभिर्निषिक्तं महाभाग्यमुद्दिश्येति शेषः॥किंच सर्वे देवाः मां मादयंतां वांछितप्रदानेन हर्षयंतु कुत्र इह लोके भूमौ स
र्वे देवाः कथं विधा नाकस्य पृष्ठं उपरिभागमभिसर्वतः संवसानः व्यत्ययेन संवसानाः आश्रित्य वसानाः मां कथंभूतं वैष्णवीं विष्णु
संबंधिनीं भक्तिं कुर्वाणामिति शेषः॥इति नारायणीयभाष्ये द्वितीयोनुवाकः॥अतः परं पापक्षयद्वारा अन्नकामस्य होममंत्रा
नाह॥अथ होमार्थान्महाव्याहृति संज्ञकान्मंत्रानाह॥भूसंस्कारादि आज्यसंस्कारांतं स्वगृह्योक्तविधया कर्म कृत्वा एते
र्मंत्रैराज्यं मंत्रलिंगादन्नं वा होतव्यं अयं प्रधानयागः स्विष्टकृदादि च पुनर्गृह्येण विधिना कर्तव्यं॥भूरन्नमग्नये पृथिव्यै स्वाहा
भुवोन्नं वायवेंतरिक्षाय स्वाहा स्वरन्नमादित्याय दिवे स्वाहा भूर्भुवः सुवरन्नं चंद्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृ २१
भ्यो भूर्भुवः स्वरन्नमोम्॥इति भूर्भुवः स्वरिति त्रीणि पदानि अव्ययानि त्रैलोक्याधिष्ठान देवता वाचकानि च भूः पृ

थिव्यधिष्ठानदेवतामह्यमन्नं दद्यादितिश्रेषः॥ तदर्थं वच रूपमन्नं मयास्मिन्नस्मात्तोऽग्नौस्वाहाहुतमस्तु॥ कस्मैअग्नये पृथिव्यधि
ष्ठिताय पृथिव्यै अग्न्यधिष्ठात्र्यै च पर्यायद्वयेपीत्थमेवव्याख्याप्रकारः चतुर्थपर्यायेतु भूर्भुवः स्वः वस्तास्ति स्तोधिष्ठात्र्योमह्य
मन्नं दद्युरितिश्रेषः समानमन्यत् एवंप्रधानयागंसर्वं कृदंतं कृत्वा प्राङ्मुखोभूत्वानमोदेवेभ्यइतिमंत्रेणदेवान्॥ दक्षिणामु
खः स्वधापितृभ्यइतिमंत्रेणपितॄंश्चोपतिष्ठते स्वधाशब्दः पितृप्रियंनमस्कारादपूपचारं ब्रूते देव्यत्वाक्षेमस्यतु पिंडदानादिपै
तृकप्रकरणपठितत्वायमेवस्वधाशब्दः पितृनुद्दिश्येदंकव्यं स्वधास्तु निहितमस्त्वित्यमुमर्थं ब्रूते ओंकारोभ्यनुज्ञां कथयति
अस्मास्वाथितमन्नं दातुं भूर्भुवः स्वःवस्तिस्त्रोदेवताओं दद्यामेत्यंगीकुर्वंत्वित्यर्थः॥ ॥इतितृतीयोनुवाकः॥ ॥इतःपरं केवलपा
पक्षयार्था मंत्राउच्यंते आज्यमेवात्रहोतव्यं नान्यन्मंत्रलिंगाभावात् आज्यस्य सर्वहोमसाधारणत्वात् फलांतरानुक्तेःपा
पक्षयएवफलं॥ भूरग्नयेपृथिव्यैस्वाहा भुवोवायवेंतरिक्षायस्वाहा स्वरादित्याय दिवेस्वाहा भूर्भुवः स्वश्चंद्रमसेदिग्भ्यः
स्वाहानमोदेवेभ्यः स्वधापितृभ्यो [illegible] भूर्भुवः स्वरग्नओम्॥ इति॥ भूरादयस्त्रिस्त्रीलोकेप्रसिद्धाः इदमाहुतिद्रव्यं
स्वीकृत्यास्मत्पापंनिवारयत्वितिश्रेषः हेअग्नेत्वमपिमत्प्रार्थितंओंकर्तुंअंगीकुरु इतिचतुर्थोनुवाकः॥ महत्वकामस्यत

ना॰उ॰भा॰

स्कलकहोममंत्राउच्यंते॥भूरग्नयेचपृथिव्यैचमहतेचस्वाहाभुवोवायवेचांतरिक्षायचमहतेचस्वाहास्वरादित्यायचदिवेचमहतेचस्वाहा
नमोदेवेभ्यःस्वधापितृभ्योभूर्भुवःस्वर्महरोम्॥इति॥तिस्रोदेवतामहत्तत्वंसर्वपूज्यत्वंदेवकरितिविशेषःमहतइतिअग्न्यादीनांविशेष
२२ वि णंवचनलिंगेपरिणामेनान्वेतव्यं एतत्सर्वंमांत्रवर्णिकोदेवताः ओम् अंगीकुर्वंतु समानमन्यत् इतिपंचमोनुवाकः पूर्वत्रभूरग्न
यइत्यनुवाकेसर्वसाधारणाःपापक्षयार्थहोममंत्राउक्ताः॥अथप्रतिबंधनिवारणेनमुमुक्षोःज्ञानप्राप्त्यर्थंहोममंत्राउच्यंते॥पाहिनोअग्नएन
सेस्वाहा॥पाहिनोविश्ववेदसेस्वाहा॥यज्ञंपाहिविभावसोस्वाहा॥सर्वंपाहिशतक्रतोस्वाहेति॥हेअग्नेनोऽस्मानेनसोज्ञानेनप्रतिबंधकात्सा
पात्पाहिरक्षतुभ्यमिदंस्वाहास्वहुतमस्तु॥नोस्माकंविश्ववेदसेतवहुतंज्ञानसिध्यर्थंपाहितत्साधनसंपादनेनपालयतदर्थंतुभ्यमि
दंस्वाहाहुतमस्तुनिःशेषेणभा दीप्तिःविभासैववसुधनंयस्याग्नेःसोयंविभावसुः हेविभावसोयज्ञंविविदिषाहेतुत्वेनअस्माभिरनु
ष्ठीयमानंपाहिनिर्विघ्नेनसमाप्तिंनीत्वापालय शतसंख्याकाःक्रतवोयेनाग्निनानिष्पादितास्तेसोयंशतक्रतुः हेशतक्रतोसर्वंज्ञानसाध
नंगुरुशास्त्रादिकंपाहि॥इतिषष्ठोनुवाकः॥पाहिनोअग्नएकया॥पाह्युतद्वितीयया॥पाह्यूर्जंतृतीयया॥पाहिगीर्भिश्चतसृभिर्वसोस्वा २२
हेति॥पुनरपिपूर्वोक्तप्रयोजनकाहुतिचतुष्टयंमंत्राउच्यंते॥हेअग्नेहेवसोजगन्निवासहेतोत्वंएकयाऋग्वेदलक्षणयागिराअभि

अपिच ऋग्यजुःसामथर्वणरूपाभिष्टुतस्ताभिर्गीर्षु तः [stain] सनूनः पाहि स्वाहा २

ष्टुतः सन्नोस्मान्पाहि तदर्थमिदमाज्यं तुभ्यं स्वाहा सुहुतमस्तु स्वाहा ऋग्भिः सर्वत्रानुषज्यते उतापि च द्वितीयया यजुर्वेदरूपया गिराऽभिष्टुतः सन्नः पा
हि स्वाहा किं च तृतीयया सामवेदात्मिकया गिरा अभिष्टुतः स नूनः स बंधिउ ऊर्जमन्नं अन्नरसं च पाहि स्वाहा ॥ इति सप्तमोनुवाकः ॥ अर्थसं
न्नप्रतिपादककृत्स्नवेदांतप्राप्तिकामेन जप्यं मंत्रमाह ॥ यश्छंदसामृषभो विश्वरूपश्छंदोभ्यश्छंदाꣳस्याविवेश ॥ सचाꣳ शिक्यः पुरोवाचो
पनिषदिंद्रो ज्येष्ठ इंद्रियाय ऋषिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छंद ओमिति ॥ यः प्रणवः छंदसां वेदानां मध्ये ऋषभः ज्येष्ठः वि
श्वरूपः सर्वजगदात्मक एतद्वेदसारत्वं विश्वरूपत्वं च सा हि सामुपनिषदि प्रपंचितं ॥ तादृशः प्रणवः छंदोभ्यो वेदेभ्यः प्रादुर्भूत इति त्रोपः
विदसारत्वेन प्रजापते प्रत्यभादित्यर्थः स पुनश्छंदाꣳसि गायत्र्यादि विवेश। छंदोभिरुपलक्षितेषु मंत्रेषु प्रयोक्तव्यः तथा प्रपंचसारेऽभिहि
तं अस्य तु वेदादित्वात्सर्वमंत्राणां प्रयुज्यते ह्यादाविति तेन प्रणवेन प्रतिपाद्यः इंद्रः परमेश्वर्ययुक्तः परमात्मा उपनिषत्सुरोवाचउप
निषदं ब्रह्मविद्यां सर्ववेदांतसिद्धांतमुक्तवान् कीदृश इंद्रः सचाꣳ शिक्यः सद्भिः कर्मानुष्ठायिभिरुपास्यके ज्ञानिभिश्च प्राप्तुंश
क्यः ज्येष्ठः कारणत्वेन सर्वस्मात्प्रथमः किमर्थं विद्यामुक्तवान् इति उच्यते। ऋषिभ्यः ऋषीणां अंतर्मुखानां जिज्ञासूनां इंद्रियाय ज्ञा
नसामर्थ्याय अतो हं तत्प्रतिबंधनिवारणाय देवेभ्यः पितृभ्यश्च नमस्करोमि ॥ भूर्भुवः सुवरोम् लोकत्रयावस्थित छंदः मंत्रब्राह्म

इत्यष्टमोनुवाकः॥

त्मकं वेद ओमूप्राप्नोतिँ॥ अध्यलब्धानां वेदानां अविस्मरणाय जप्यं मंत्रमाह॥ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः
श्रुतं मा च्योढ्ढं ममामुष्य ओम्॥ त्वत्प्रसादान्मदीयचित्ते ग्रंथतदर्थयोर्धारणमस्तु॥ अनिराकरणं निराकरणं विस्मरणं यथा न भवति तथा धा
रयिता भूयासं अमुष्येत्थं प्रार्थयमानस्य मम कर्णयोर्यत्किंचिद्देशास्त्रादिकं यदा कदाचिदपि श्रुतमासीत्तत्सर्वं हे देवाः मा च्योढ्ढं मा विनाशय त
तोहं ओं प्राप्नुयां स्थिरं धारयामीति शेषः॥ इति नवमोनुवाकः॥ अथ ज्ञानसाधनं यत्तपश्चित्तैकाग्र्यं अस्ति मनसश्चेंद्रियाणां चैकाग्र्यं परमं तप इ
ति स्मृतेः॥ तत्तपः श्रौतस्मार्तकर्मस्वरूपतया प्रशंसति यद्वा तथाविधं तपः सिध्यर्थं जप्यं मंत्रमाह॥ ऋतं तपः सत्यं तपः श्रुतं तपः शांतं तपो दमस्तपः
शमस्तपो दानं तपो यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः॥ इति॥ ऋतं मनसा यथावस्तु चिंतनं सत्यं वाचा यथार्थभाषणं श्रुतं वेदस्य पू
र्वांतरभागार्थबोधायाध्ययनमू मांसयोः श्रवणयोः शांतं शांतिर्बाह्येंद्रियाभ्यंतरेंद्रियोपरमतिः दमनं दमः यथोक्तोपवासादिभिः शरीरक
र्षणं शमः शत्रुष्वपि क्रोधराहित्यं दानं धने पुत्रत्वं निवृत्तिः परस्वतापादनपर्यंतं यज्ञोऽग्निहोत्रादिः तदेतत्सर्वमर्वाचीनं तपः भूरादिलोकत्रे
यात्मकं विराड्देहरूपं यद्ब्रह्मास्ति हे मुमुक्षो एतद्ब्रह्मोपास्य विजातीयप्रत्ययरहितसजातीयप्रत्ययप्रवाहं कुरु एतदुपासनीयमुत्तमं त २३
पः इति नारायणीये दशमोनुवाकः॥ अथ विहितानुष्ठानरूपं पुण्यं ज्ञानसाधनतया प्रशंसति निषिद्धाचरणं तु ज्ञानप्रतिबंधकत्
यानिंदति॥ यथा वृक्षस्य संपुष्पितस्य दूराद्गंधो वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति यथासिधारां गर्ते वहितामवक्रामेयद्युवे

तशोको धातुः प्रसादान्महिमानमीशमिति॥ सच्चिदानंदैकरसः परमेश्वरः सर्वाधिष्ठानत्वेन सर्वस्यजगतः स्वरूपत्वादात्मश
ब्देनोच्यते आत्मशब्दः स्वरूपवाचीति प्रसिध्दः मायाकार्यभूतलौकिकव्यवहारे सूक्ष्मत्वेन प्रसिध्दः परमाणुद्व्यणुकादिःअ
णुशब्दवाच्यः तस्मादप्य[redacted]यमात्मातिशयेनसूक्ष्मत्वादणीयान् आकाशादिगादयः परिमाणाधिक्याल्लोकेमहच्छब्दवाच्याः॥ ततोप्यय
मात्मातिशयेनाधिकत्वान्महीयान्परमाणुद्व्यणुकादीनामस्मदादिप्रत्यक्षगम्यत्वाभावेपियोगिजनचक्षुर्गम्यत्वमस्तितदप्यात्म
नो नास्ति इत्यभिप्रेत्याणीयस्त्वमुक्तं आकाशदिगादीनामेकब्रह्मांडमध्यवर्तित्वात्तादृशब्रह्मांडलक्षकोट्यधिष्ठानत्वमभिप्रेत्यमहीयस्त्व
मुक्तं तादृशः परमात्मा अस्य देवमनुष्यादिरूपस्यजंतोर्गुहायांनिहितः गुहाशब्देन हृदयपुंडरीकमध्यवर्तिनीबुधिरूपं लक्ष्यते। गुह
संवरण इत्येतस्माधातोः उत्पन्नो गुहाशब्दः बुधिश्च हृदयपुंडरीकेन संवृत्ता तन्मध्यवर्त्तित्वात्तस्यां बुध्दावावरणस्यपरमात्मनोनिहित
त्वंनाम विद्ययोपलभ्यमानत्वं न नु बुध्यावाधेयत्वं सर्वजगदाधारस्य तदसंभवात्तं तथावस्थितं ईशं शमदमादिगुणयुक्तोऽधिकारी
पुरुषः पश्यति साक्षात्करोति सत्वाधिकारो धातुः प्रसादादुपजायते धाताजगतोविधाता परमेश्वरः तस्य प्रसादोनुग्रहः तथा च पूर्वाचा २६
र्यैरुक्तं ईश्वरानुग्रहादेषां पुंसां अद्वैतवासना महाभयकृतत्राणाद्विप्राणामेवजायते इति कीदृशमीदृशमक्रतुं संकल्परहितं तस्यन

युवेहवा विद्धयिष्या मि गर्तेपतिष्यामी त्येवमभृतादात्मानं जुगुप्सेदिति ॥ यथा वृक्षस्य उद्यानादौ स्थितस्य चंपकादिलक्षणस्य संपुष्पि
तस्य सम्यग्विकसितपुष्पोपेतस्य योगंधः स्फुरभिरस्ति सोयं दूराद्दूरदेशान्ह्वातिवायुना सहागच्छति एवं पुण्यस्य कर्मणो ज्योतिष्टो
मादेः सत्कीर्तिः स्फुगंधिसमानाद्दूराह्वाति मनुष्यलोकात्स्वर्गं गच्छति तस्मात्पुण्यमनुष्ठेयं ॥ अथ पापस्य दृष्टांत उच्यते ॥ यथा लो
के कश्चित्कदाचित्केन चिद्धेतुना गर्ते गर्तस्योपरि तिर्यक्काष्ठवदवहितां प्रसारितामसिधारां अहं अवक्रामे पादाभ्यामुपरि
क्रामि यद्यादिद्युवेद्युवे याम्यायामितदा असिधारया पादयोर्द्वैदस्यशोभविष्यति पादछेदश्च यदि द्वैदस्पर्शोभावः गर्ते गर्ते प
तिष्यामि उभयथा दुःखमेवेति विद्धयिष्यामि विह्वलितो भविष्यामि तस्मादस्मात्कर्मण उपरमे इति ॥ चिंतयति ॥ यथा एवं
मुमुक्षुरप्यमृतान्मोक्षप्राप्तिहेतोः आत्मानं अंतःकरणं स्थिरीकृत्य पापाज्जुगुप्सेत् ॥ यदि पापं प्रकटं करिष्यामि तदा लोकैः
अहं निंद्ये यदि रहसि तदा याम्यैः पीड्ये तस्माद्बहिः रहसि च पापं न करिष्ये इत्यपरम्यतां ॥ इति श्रीनारायणीये एकादशोनु
वाकः ॥ यथोक्तप्रशंसोपेतपुण्यानुष्ठानेन विधिनिषिद्धाचरणवर्जितेन स्वस्थांतःकरणस्य पुरुषस्य तत्त्वमुपदेष्टुं अयम
नुवाक आरभ्यते तत्र प्रथमामृचमाह ॥ अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः ॥ तमक्रतुं पश्यति वी

पानादिभोगजातं समीचीनमिति संकल्पनं जीवस्यैव न त्वीश्वरस्य संकल्पहेतुभूतांतःकरणोपाधेरभावात् अतो निरूपाधिकत्वान्महिमानमतिशा
येन महांतमीश्वरमीदृशं परमेश्वरं साक्षात्कृत्य वीतशोकः शोको जन्ममरणादि शोकरहितो भवतीति द्वितीयामृचमाह सप्त प्राणाः प्रभवंति
तस्मात्सप्तार्चिषः समिधः सप्तजिह्वाः॥ सप्त इमे लोका येषु चरंति प्राणा गुहाशया निहिताः सप्त सप्तेति॥ शुद्धांतःकरणैर्यो ज्ञातव्यः परमात्मो
क्तस्तस्य शाखाचंद्रन्यायेनोपलक्षणार्थं जगत्कारणत्वमुच्यते॥ तस्मात्परमात्मनो मायाशक्तिविशिष्टात्सप्तप्राणाः प्रभवंति अन्यत्र सप्त वै
शीर्षण्याः प्राणा इत्युक्तत्वात् शिरोवर्जितसप्तछिद्रगताः सप्तसंख्याकाश्चक्षुरादयः प्राणाः परमेश्वरादुत्पद्यंते द्वे श्रोत्रे द्वे चक्षुषी द्वे नासि
के वागेकेति सप्तत्वं तेषां चक्षुरादीनां स्वस्वविषयप्रकाशनशक्तयः सप्तार्चिषः तैरर्चिर्भिर्गृह्यमाणत्वेन सप्तसंख्याका विषयाः समिधः वि
षयैरिंद्रियाणि समिध्यंते प्रकाशयुक्तानि क्रियंते तथैकस्यापि चक्षुरिंद्रियस्य गोलकभेदेन द्वित्वं तथा रूपस्याप्येकस्य वामदक्षिणरूपग्राहक
चक्षुर्वृत्तिभेदाद्द्वित्वं द्रष्टव्यं एवं शब्दगंधयोर्द्वित्वे सति विषयाः सप्त संपद्यंते अथवा समिच्छब्देन सप्तसंख्या न संबध्यते किं तु जिह्वाशब्देन अग्नेः
जिह्वानां च सप्तत्वमाथर्वणिकैराख्यातं काली कराली च मनोजवा च सुलोहिता यापि सुधूम्रवर्णा स्फुलिंगिनी। विश्वरुची च देवी लेला
यमाना इति सप्तजिह्वाः इति॥ ताश्च परमेश्वरात्प्रभवंति इमे भूरादयः सप्तसंख्याकाः लोकाः तस्मात्प्रभवंति येषु सप्तसु लोकेषु देवमनुष्या
दिशरीरवर्तिनः प्राणाश्चरंति तादृशाल्लोका उत्पन्ना इति पूर्वेणान्वयः गुहा बुद्धिस्तस्यां शेते उपलभ्यत इति गुहाशयः परमेश्वरः

 तस्मादुत्पन्नाः सप्तर्षयः सप्त समुद्रा इत्यादिकाः सप्तसंख्याकाः पदार्थविशेषा निहितास्तत्र तत्रावस्थापिताः॥ अथ तृतीयामाह॥ अतः समुद्रा गिरय
 श्च सर्वेऽस्मात्स्यंदंते सिंधवः सर्वरूपाः॥ अतश्च विश्वा ओषधयो रसाच्च येनैष भूतस्तिष्ठत्यंतरात्मा॥ लवणो इत्यादयः सप्तसमुद्राः मेरुप्रमुख
प्रभृतयो गिरिविशेषाश्चास्मात्परमेश्वरादुत्पन्नाः सर्वरूपाः नानागंभिमुखाः सिंधवः स्यंदंते प्रवहंति व्रीहियवाद्या विश्वाः सर्वा ओ
षधयश्चोत्पन्नाः कथंभूतात्परमात्मनः रसात् विद्वदनुभवनीयात् रसो वै स इति पूर्वमुक्तत्वात् एषोहंप्रत्ययेन गम्यमानोंतरस्थात्मा
स्थूलदेहचिदात्मनो मध्यवर्ती यो लिंगदेहो येनौषधिरसेन भूतोऽधिष्ठितः सन् तिष्ठति॥ अत इति पूर्वेणान्वयः॥ ब्रह्मा देवानां पदवीः क
वीनामृषिर्वि- प्राणां महिषो मृगाणां॥ श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्॥ अंतर्बहिर्वर्तिनां प्राणसमुद्रा
दीनामचेतनानां सृष्टिमुक्त्वा चेतनेषु परमेश्वरस्योत्कृष्टत्वरूपेणावस्थानमुच्यते॥ देवानामग्नींद्रादीनां मध्ये ब्रह्मा चतुर्मुखो भूत्वा
परमेश्वरो नियामकत्वेनावतिष्ठते॥ तथा कवीनां काव्यनाटकादिकर्तृणां मध्ये पदवीः भूत्वावतिष्ठते व्याकरणे निष्पन्नः सुरा
द्विशेषपदं तद्वेत्ति गच्छतीति पदवीः शब्दसामर्थ्यादिभिज्ञो व्यासवाल्मीक्यादिरूप इत्यर्थः विप्राणां वैदिकमार्गवर्तिनां

ब्राह्मणानांमध्येऋषिस्तज्ज्ञोत्रप्रवर्तकोवसिष्ठादिरूपोबभूवमृगाणांचतुष्पदांमध्येशक्त्याधिक्ययुक्तोमहिषोबभूव गृध्रोपलक्षितानांसर्वेषांपक्षिणांमध्येप्रब
लश्येनोबभूववनानांवृक्षसमूहरूपाणांछेदनार्थंस्वधितिःपरशुर्बभूवयागहेतुभूतवल्यात्मकः सोमोभूत्वारेभन्संज्ञयायुक्तःसन्पवित्रंअधिका
रणंगंगाजलकुशादर्भादिद्रव्यजातंसर्वमस्येति पंचमीमृचमाह अजामेकांलोहितशुक्लकृष्णांबह्वीःप्रजांजनयंतीॅसरूपां॥अजोह्येकोजुषमाणोनु
शेतेजहात्येनांभुक्तभोगामजोन्यः॥व्यवहारदशायांपरमेश्वरस्यचतुर्मुखब्रह्मादिशरीरेषुविशेषेणावस्थानमभिधाययथोक्तजगत्सृष्टेर्मूलकारण
भूतांमायाशक्तिमुपजीव्यबद्धमुक्तपुरुषव्यवस्थाप्रदर्श्यते॥नजायतइत्यजामूलप्रकृतिरूपामायानह्यनादेस्तस्याजन्मसंभवतिसाचमायेकाइतर
स्यसर्वस्यसैजगतस्तत्कार्यत्वात्तथाचासौतेजोबन्नानित्रीणिरूपाण्युत्पाद्यतद्रूपावतिष्ठतेतदानींलोहितशुक्लकृष्णवर्णैरुपेताभवतितथाछंदोगाम्ना
मनंतियदग्नेरोहितंरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्येतिअन्नशब्देनात्रपृथिव्युपलक्ष्यते रजःसत्वतमोगुणावालोहितादिशब्दैरूप
लक्ष्यंतेगुणत्रयात्मिकामायेत्युक्तंभवतिसाचदेवतिर्यङ्मनुष्यादिरूपांगुणत्रितयात्मकत्वेनसरूपांबहुविधांप्रजांजनयंतीनजायतइत्यजोजीवः
तस्यापिमायावदनादित्वादुत्पत्तिर्नास्तिताद्दशोजीवोद्विविधः आसक्तोविरक्तश्चेतितयोर्मध्येएकआसक्तोजोजीवःपूर्वोक्तांअजांमायांजुषमा
णःप्रीतिपूर्वकंसेवमानोनुशेतेतदनुसारेणैववर्ततेविषयाननुभुंजानोविवेकरहितोजन्ममरणप्रवाहरूपेणसंसरतीत्यर्थःअन्योजोविरक्तोजीवो
भुक्तभोगामेनांमायांजहातिपरित्यजतिविरक्तःपूर्वमेवभोगान्भुक्त्वानतूपरिष्टाद्भोक्ष्यंते ताद्दशैर्भोगैर्युक्तामात्याभुक्तभोगातांमायांविवेके

नबाधतइत्यर्थः॥षष्ठीमृचमाह॥हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजा

ऋतंबृहदि[illegible]ति॥यःपुमान्मायाविवेकेनमायांपरित्यजतितस्यसर्वमपिजगद्ब्रह्मरूपेणावभासतइत्येवमर्थोत्रमंत्रेदृश्यते एतदर्थमादौजग

दनूद्यते हंसइति सर्वदागच्छतीतिहंसआदित्यःसचशुचिषत्शुच्यौशुचौमंडलेज्योतिर्मयेसीदतीतिशुचिषत् सूत्रात्मस्वरूपेणजगन्निवासहेतुत्वा

त्वसुर्वायुःतद्रूपःसन्नंतरिक्षेसीदतीत्यंतरिक्षसत् होमनिष्पादकआहवनीयाद्यग्निर्होतातद्रूपेणसोमयागांगभूतायांवेद्यांसीद

तीतिवेदिसत् अमावास्यादितिथिविशेषमनपेक्ष्यभोजनेयात्रार्थंतत्रतत्रपुरुषागच्छन्नू वैदेशिकोतिथिःतद्रूपेणदुरोणेषुगृहेषु

परकीयेषुसीदतीतिदुरोणसत् नृषुमनुष्येषुकर्माधिकारीजीवरूपेणसीदतीतिनृषत् वरसत् वरेश्रेष्ठेक्षेत्रेकाशीद्वारवत्यादौपूजनी

यरूपेणसीदतीतिवरसत् ऋतेसत्येवैदिकेकर्मणिफलरूपेणसीदतीतिऋतसत् अब्जाः नदीसमुद्रादिगताभ्यःशंखमकरादिरूपे

णजायतइत्यब्जाः गोभ्यःक्षीरादिरूपेणजायतइतिगोजाः ऋतंसत्यवचनंतस्मात्कीर्तिरूपेणजातेयतइतिऋतजाः अद्रिभ्यःपर्वतेभ्यःवृ

क्षादिरूपेणजायतइतिअद्रिजाःहंसइत्यारभ्याद्रिजाइत्यंतेनोक्तंयज्जगदस्तितज्जगद्दृतंसत्यंबृहत्तत्ब्रह्मअज्ञानदृष्ट्याजगद्रूपेणभा २६

समानंसर्वंज्ञानदृष्ट्याब्रह्मैवेत्यर्थः सप्तमीमृचमाह॥घृतंमिमिक्षिरेघृतमस्ययोनिर्घृतेश्रितोघृतमुवस्यधाम॥अनुष्वधमावह

व्योम्नि आकाशेनक्षत्रादिरूपेणसीदतीतिव्योमसत् ४

मादयस्वस्वाहाकृतंवृषभवक्षिहव्यं॥ भोग्यजातस्यज्ञानयोग्यंदेहानुकूल्यंप्रार्थ्यज्ञानसाधनयागादिकर्महेतोरग्नेरानुकूल्यंप्रार्थयते॥ पूर्वंयजमा
नः॥ अग्नावाहवनीयादिरूपेघृतंमिमिक्षिरेसिक्तवंतः मिहसेचनइतिधातोरूपंनद्धृतमस्याग्नेर्योनिरुत्पत्तिकारणं घृतेनज्वालाभिर्वृद्धिदर्श
नात्ततोप्यमग्निर्घृतेश्रितोघृतमाश्रित्यावस्थितः घृतमुवस्य घृतमेवास्याग्नेर्धामस्थानंतेजोहेतुर्वाहेअग्नेअनुष्वधंस्वधामनु अस्मदीयं
हविः स्वरूपमनुसृत्य आवहदेवानत्रानयआनीयचमादयस्वयसुहृष्टान्कुरुहेऋषभहेश्रेष्ठस्वाहाकृतंस्वाहाकारेणास्माभिर्दत्तं
हव्यंवक्षिवहदेवान्प्रापय॥ अष्टमीमृचमाह॥ समुद्रादूर्मिर्मधुमाँ२ उदारदुपांशुनासममृतत्वमानट्॥ घृतस्यनामगुह्यंयद
स्तिजिह्वादेवानाममृतस्यनाभिः॥ समुद्रेति समुद्रवदतिप्रभूतात्परमात्मनऊर्मिसदृशोजउप्रपंचोमधुमान् भोग्यत्वेनमाधुर्ययुक्तःउदारत्उदगच्छ
दुत्पन्नइत्यर्थः यथालोकेसमुद्रात्तरंगउत्पद्यतेएवंचिदेकरसात्परमात्मनोजड भोग्यजातंसमुत्पन्नं घृक्षरणदीप्त्योरितिधातोरूत्पन्नोघृतशब्दः घृतंक्षि
प्तंस्वप्रकाशंब्रह्मेत्यर्थः तस्यब्रह्मणोयन्नामप्रणवरूपगुह्यंसर्ववेदेष्वस्तितथाचकठैराम्नातंसर्वेवेदायत्पदमामनंतीतिप्रस्तुतस्यतत्तपदंसंग्रहेणब्रवीम्योमि
त्येतदितितेनप्रणवरूपेणांशुनाध्यानकालेशनैरुच्चार्यमाणेनउत्पत्तिविनाशरहितंअमृतत्वंब्रह्मत्वंसमानट्सम्यगानशेप्राप्नोमीत्यर्थः॥
तच्चप्रणवाख्यंनामदेवानांजिह्वादेवैर्ध्यानपरैर्निरंतरमुच्चार्यमाणत्वेनजिह्वेवसर्वदामुखमध्येवर्तते किंचेदंप्रणवरूपममृतस्याविनाशरहितस्य
मोक्षस्यनाभिः रथचक्रस्यनाभिरिवाश्रयभूतंअनेनहिमुक्तिरूपंफलंलभ्यते अतएवकठैराम्नातं एतद्ध्येवाक्षरंज्ञात्वायोयदिच्छतितस्य

तदिति॥ एतस्यामृचि प्रणवस्य मोक्षसाधनत्वमुक्तं नवमीमाह॥ वयंनामप्रब्रवामाघृतेनास्मिन्यज्ञेधारयामानमोभिः॥ उपब्रह्माशृणवच्छस्यमा
नंचतुःश्रृंगोवमीद्गौरएतत्॥ वयंज्ञानार्थिनः पुरुषाः अस्मिन्ज्ञानयज्ञेघृतेनदीप्तेनस्वप्रकाशेनब्रह्मणा निमित्तेनप्रणवरूपंप्रब्रवामसर्व
दाउच्चारयामः च तानमोभिः नमस्कारैःयुक्तावयंत्वेतब्रह्मतत्वंसर्वदाधारयामः ज्ञानस्ययज्ञत्वंभगवतोक्तं स्वाध्यायज्ञानयज्ञाश्चय
तयः संशितव्रताइति शस्यमानमस्माभिः प्रणवेनस्तूयमानंउपशृणवत् पार्श्ववर्त्तिभिः तत्ववेदिभिः श्रूयमाणमेवतद्ब्रह्मतत्वंच
तुःश्रृंगः आकारोकारमकारनादरूपश्रृंगचतुष्टयोपेतोगौरः श्वेतः प्रणवाख्यऋषभः अवमीत् वांतवान् ब्रह्मतत्वंप्रतिपादयदि
त्यर्थः अकारादीनांप्रणवमात्राणांश्रृंगत्वमुत्तरतापनीयश्रुतंशृंगेषुश्रृंगंसंयोज्येतिनिष्कामैरनुष्ठेयत्वेननिर्मलत्वात्प्रणव
स्यगौरत्वंवृषभत्वंच संहितोपनिषद्याम्नातंच॥ यश्छंदसामृषभोविश्वरूपइति वमनेनप्रतिपादनमुपलक्ष्यते॥ दशमीमृचमाह
चत्वारिश्रृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश॥ श्रृंगाः प्रणवस्ययान्यका
रादीनिचत्वारि अस्यप्रणवस्यप्रतिपाद्यत्वेनप्रणवरूपस्यब्रह्मणस्त्रयः पादाः पद्यतेगम्यतेब्रह्मत्वमेभिरितिपादाः अध्यात्मंविश्व २७
तैजसप्राज्ञैः विराट्हिरण्यगर्भाव्याकृतैस्त्रिप्रकारेणसंबद्धोवृषभः प्रणवोमहः तेजोरूपंब्रह्मतत्वंरोरवीतिअतिशयेनप्रति
२ अधिदैवं विराट्हिरण्यगर्भाव्याकृतानि देशकालेन मायया ... चिदाचद्रूपेदेशान्त॥ तथैवास्यब्रह्मणोभूरादयः सप्त
लोकाः हस्ताःसोहस्तस्थानीयाः त्रिधाबद्धः अकारोकारमकारेषु विश्वतैजसप्राज्ञैः २१

पादयति तद्देवप्रतिपाद्यत्वं स्पष्टीक्रियते॥ महो देवः परमेश्वरः मर्त्यान् मनुष्यदेहान् आविवेश सर्वतः प्रविष्टः स एष इह प्रविष्टः आनखाग्रेभ्यः श्रुत्यंतरात्॥ एकाद
शीमृचमाह॥ त्रिधाहितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंदन्॥ इंद्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः॥ त्रिधाहितं शरीरे विश्व
तैजसप्राज्ञाख्येन त्रिप्रकारेण ब्रह्मांडे विराट् हिरण्यगर्भाव्याकृताख्येन त्रिप्रकारेणावस्थितं घृतं दीप्तं स्वप्रकाशं ब्रह्मतत्त्वं देवासो देववत्सात्त्विका अंतर्मु
खाः पुरुषाः गवि वाचि तत्त्वमस्यादिवेदरूपायामेवान्वविंदन् अनुक्रमेण लब्धवंतः कीदृशं घृतं पणिभिर्गुह्यमानं पण व्यवहारे स्तुतौ चेति धातुः पणि
भिः स्तोतृभिरुपदेष्टृभिराचार्यैः परमरहस्यत्वेन गोप्यमानं त्रिधाहितमित्येतद्देवोच्यते॥ इंद्रः परमैश्वर्ययुक्तः विराट्पुरुष एकं जागरणरूपं जज्ञा
न उत्पादितवान् सूर्यशब्दस्तेजस्वित्वेन हिरण्यगर्भमुपलक्षयति स च हिरण्यगर्भ एकं स्वप्नरूपं जजान वेनेति धातुः कांतिकर्मा वेनात् सर्वदुःख प्र
राहित्येन कमनीयादव्याकृतात् एकं सुषुप्तिरूपं निष्पन्नमिति शेषः स्वस्मिन्नेव धीयतेऽवस्थात्रयं यत्र इत्याश्रयांतररहिता ब्रह्मरूपा चित् स्वधाश
ब्देनोच्यते स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति श्रुत्यंतरात् तया स्वधया ब्रह्मरूपया चिता पूर्वमुक्ता इंद्रसूर्यवेना निष्टतक्षुः जागरणा
दिकं निष्पादितवंतः एताभ्यां द्वाभ्यामृग्भ्यां प्रणवतत्त्वप्रतिपाद्यार्थोऽभिप्रपंचितो॥ द्वादशीमृचमाह॥ यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः॥
हिरण्यगर्भं पश्यत जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु॥ यो देवो हिरण्यगर्भं पश्यत साक्षात्करोति कीदृशं हिरण्यगर्भं देवानां प्र
थमं अग्नीन्द्रादीनामादिभूतं पुरस्तात् जायमानं अग्नी[illegible]सृतेः पूर्वमेवोत्पद्यमानमनेन प्राथम्यं स्पष्टीकृतं कीदृशो देवः विश्वा

ना॰उ॰भा॰ धियो विश्वस्य जगतः कारणत्वेन अधियः अधिकः रुद्रः सन्तू वैदिकः शब्दः तं इवति आप्नोति वेदप्रतिपाद्य इत्यर्थः स देव स्ताद्दशः परमेश्वरः शु
२८ भया स्मृत्या सर्वसंसारनिवर्तकत्वेन शोभनया ब्रह्मतत्त्वस्मृत्या संयुनक्तु संयुक्तं करोतु सोयं मन्त्रो ब्रह्मविद्यालब्धये जपितव्य इति मन्त्रलिं
गादवगम्यते॥ त्रयोदशीमृचमाह॥ यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित्॥ वृक्ष इव स्तब्धो दिवि तिष्ठत्येक
स्तेनेदं पूर्णं पुरुषेण सर्वं॥ यदुक्तं शुभया स्मृत्या संयुनक्त्विति॥ तत्र स्मरणीयं तत्त्वमत्र निर्दिश्यते॥ यस्माद्ब्रह्मतत्त्वात्परमुत्कृष्टं अपरं
निकृष्टं वा वस्तु किंचिदपि नास्ति॥ परापरशब्दाभ्यां गुणोत्कर्षनिकर्षौ विवक्षितौ ज्यायोणीयःशब्दाभ्यां परिमाणोत्कर्षापकर्षौ वि
वक्षितौ सर्वप्रकारोत्कर्षापकर्षनिषेधेन अद्वितीयत्वं सिध्यति॥ यथा वृक्षो गमनागमनरहित एकत्रैव स्तब्धोऽवतिष्ठते
तद्वदयमद्वितीय एकः परमेश्वरः स्तब्धो निर्विकारो दिवि द्योतनात्मके स्वप्रकाशरूपे तिष्ठति तेन पुरुषेण चिदेकरसे
नात्मना सर्वमिदं जगत्पूर्णं जगदाकारो नास्ति ब्रह्मतत्त्वमेवावस्थितमित्यर्थः॥ चतुर्दशीमृचमाह॥ न कर्मणा न प्रजया
धनेन त्यागेनैके अमृतत्वमानशुः॥ परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति॥ यथोक्तब्रह्मतत्त्वस्मरणस्यान्तरंगं २८
सर्वत्यागरूपं साधनमत्रोच्यते॥ अग्निहोत्रादिकं सहस्रसंवत्सरसत्रांतं यत्कर्म तेन कर्मणा न तदमृतत्वं न लभ्यते प्रजया पितृभ्य इ

पि तथामृतत्वं नलभ्यते दानेन सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदंतीति श्रुतेः धनदानस्य बहुविधफलसाधनत्वावग
मात्तस्य दानं निषादकं यद्यपि नमस्ति तेन धनेन अमृतत्वं नलभ्यते ॥ किंतर्हि कर्मप्रजा ~ पि

निश्रुतेः॥ पित्तविषयादृणाद्विमोचनहेतुत्वात्पुत्रादिरूपाप्रजा धनादीनां सर्वेषां लौकिकवैदिकव्यापाराणां त्यागेनैके केचित् एवं तर्मुखाः अमृतत्व
मानशुः प्राप्नुवंति यदमृतत्वं यतयः इंद्रियनियमशीलाः विशंति प्राप्नुवंति तदमृतत्वं नाकं परेण स्वर्गादप्युत्कृष्टं सं गुहायां स्वकीयबुद्धावेका
ग्रायां निहितमवस्थितं सत् विभ्राजते विशेषेण दीप्यते अंतर्मुखैरनुभूयत इत्यर्थः॥ पंचदशीमप्याह॥ वेदांतविज्ञानसुनिश्चिता
र्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः॥ तेब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे॥ पूर्वस्यामृचि त्यागस्य मोक्षसाधन
त्वमुक्तं अन्यत्रहि तरति शोकमात्मवित् ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यत इत्यादि श्रुतिस्मृतिषु ज्ञानस्य मोक्षहेतुत्वमुच्य
ते अतोस्यामृचि विरोधपरिहाराय ज्ञानसंन्यासयोर्मोक्षे पृथगुपयोग उच्यते वेदांता उपनिषद्वाक्यानि तेरुत्पन्नं सर्वसंसार
निवर्तकत्वेन विशिष्टज्ञानं यदस्ति तेन सुनिश्चितो जीवब्रह्मैक्यलक्षणोर्थो यैः पुरुषैः ते वेदांतविज्ञानसुनिश्चितार्थाः संन्या
सः पूर्वोक्तः प्रजादित्यागस्तत्पूर्वको योगः प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपाणां पंचानां चित्तवृत्तीनां निरोधो योग इति पतंजलिना सूत्रितत्वात्
तस्माद्योगाच्छुद्धसत्वाः विषयभोगव्यावृत्तचित्ताः अतएव यतयो नियमशीलाः एतेन ज्ञानं तत्वप्रकाशनेन अविद्यानिवर्तकं त्यागस्तु विषयभोग

* अपरांतकालः * पुनर्देहस्याविद्यमानत्वात्॥ नचेत्त्वं ज्ञानेयो देहपातावसरः सोयंपरांतकालः २

निवृत्तिद्वाराचित्तशुद्धहेतुरितिपृथगुपयोगउक्तोभवतिब्रह्मणोलोकोदर्शनंसाक्षात्कारः तस्मिन्नुत्पन्नेसतिसंसारिविलक्षणास्तेपुरुषाविल
क्षण्ययोतनार्थस्तुशब्दस्ताद्दशाःपुरुषाः सर्वेपरिमुच्यंते ज्ञानिषुदेवमनुष्यत्वादिकृतउत्तमाधमभावोऽप्रयोजक इतिविवक्षयासर्वइत्युक्तं
कदामुच्यंतइत्याशंक्यपरांतकालइत्युक्तं॥ सत्यज्ञानेयोदेहपातादवसरः सोयं [illegible] पुनर्देहग्रहणरहितत्वात् तस्मिन्परांतका
लेसंसारबंधनाद्विमुच्यंते नतुतत्त्वज्ञानिनोपिप्रलयकालेस्थूलसूक्ष्मशरीरद्वयबंधान्मुच्यंतएवेत्याशंक्यपरामृताद्विजगत्का
रणत्वेनोत्कृष्टंपरं तत्त्वज्ञानंमंत्रेरणविनाशरहितत्वादमृतंताद्दशात्परामृताद्व्याकृताद्ज्ञानिनः प्रलयकालेनमु
च्यंते॥ ज्ञानिनस्तुदेहपातादवसरएवताद्दशादव्याकृतादपिमुच्यंतइतिशेषः॥ षोडशीमृचमाह॥ दह्रंविपापंपरमेश्मभू
तंयत्पुंडरीकंपुरमध्यसंस्थं॥ तत्रापिदह्रंगगनंविशोकस्तस्मिन्यदंतस्तदुपासितव्यं॥ तत्त्वंज्ञातुमसमर्थस्यसूक्ष्मो
पायउच्यते यदेतत्पुंडरीकमष्टदलंहृदयकमलमस्ति कीदृशंदह्रंअल्पंविपापंशफ्यंशरीरसंबंधिदोषैरपरामृष्टत्वात् परस्यात्मनोवेश्मभूतंवकारस्थानेमका
रःछांदसः॥ वेश्मभूतंगृहभूतं सर्वदातत्रोपलभ्यत्वात् पुरस्यशरीरस्यमध्येसंस्थितंराज्ञइवपुरमध्येप्रासादः तत्रापिदह्रेपुंडरीके दह्रं सूक्ष्मंगगनमाकृ
शवद्‌सूर्तंब्रह्मरूपमस्ति ब्रह्मणः सर्वगतत्वेपिघटाकाशवत्पुंडरीकस्यानापेक्षयादह्रत्वमुपचर्यते॥ तथाचश्रुत्यंतरं॥ यदिदमस्मिन्ब्रह्मपुरंदह्रं

त्युक्तं
पि

२९

× स च स्वरः प्रणवः वेदांते चोपनिषदि ॐमित्येतदक्षरमिदं सर्वमित्यादिकायां प्रतिष्ठितः प्रतिष्ठोदितः ४

पुंडरीकं वेश्म दह्रोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति॥ दहराकाशस्य च ब्रह्मत्वं दह्राधिकरणे निर्णीतं अत एव विशो-
कं शोकरहितं गगनशब्दवाच्यं ब्रह्म एवं सति तस्मिन्पुंडरीके अंतर्मध्ये यद्ब्रह्मतत्वमस्ति तदुपासितव्यं विजातीयप्रत्ययरहितेन सजातीयप्रत्ययप्र-
वाहेन चिंतनीयं॥ सप्तदशीमृचमाह॥ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥ वेदा नाम अग्निमीळे पु-
रोहितं इषे त्वोर्जे त्वेति इत्यादीनामादिरूपक्रमस्तस्मिन्नुपक्रमे यः स्वरः यो वर्णः प्रणवरूपोस्ति स च स्वरः प्रणवो ध्यानकाले व्याकृते जगत्कारणे ली- प्रकृताव
नो भवति अकारमुकारमकारेषु विराड्हिरण्यगर्भाव्याकृतानि ध्यातव्यानि विराड्रूपमकारमुकारे प्रविलाप्य तं चोकारं हिरण्यगर्भरूपं मूलप्रकृतिरू-
पमकारे प्रविलापयेत् तस्य च प्रकृतौ लीनस्य प्रणवस्य यः परश्च तुर्यमात्रारूपेण नादे ध्यातव्य उत्कृष्टोस्ति सोयं महेश्वरो विज्ञेयः अनेन मंत्रेण पूर्वो-
क्तं गगनशब्दवाच्यं वस्तु प्रपंचितं॥ इति द्वादशोनुवाकः॥ पूर्वानुवाकांते हृदयपुंडरीके उपास्यं यन्महेश्वररूपं निर्दिष्टं तस्मिन्नुपास्ये गु-
णविशेषा अस्मिन्ननुवाके विस्तरेण प्रदर्श्यंते॥ तत्र प्रथमामृचमाह॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवं॥ विश्वं नारायणं देवम-
क्षरं परमं पदमिति॥ देवं पूर्वोक्तं महेश्वरं ध्यायेदिति शेषः॥ कीदृशं देवं सहस्रशीर्षं सहस्रशब्देनापरिमितत्वमुपलक्ष्यते अनंत-
शिरस्कमित्यर्थः सर्वजगदात्मकं विराड्रूपं महेश्वरस्य देहः तथा सति भस्मदादिशिरांसि सर्वाण्यपि तदीयान्येवेत्यनंतशिर-

स्कत्वं ॥ अनेनैव न्यायेन विश्वानि सर्वाण्यस्मदीयान्यक्षाणीन्द्रियाणि तदीयान्येवेति विश्वाक्षं विश्वस्य जगतः शं सुखं अस्माद्भवतीति विश्वशंभुः
तादृशं ॥ उक्तसहस्रशीर्षविराड्रूपदेहे अवस्थितस्य महेश्वरस्य निजरूपं द्वितीयार्धेनोच्यते ॥ विश्वं जगदात्मकं आरोपितस्य जगतोऽधिष्ठान
व्यतिरेकेण वास्तवरूपाभावात् नारायणशब्दस्य निर्वचनं पुराणेषु प्रदर्शितं आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः
पूर्वं तेन नारायणः स्मृत इति ॥ जगत्कारणेषु पंचभूतेष्ववस्थितमित्यर्थः ॥ स एवेंद्रमित्रादिरूपेणावस्थितत्वाद्देव इत्युच्यते ॥ तथा च ऋग्वे
दे मंत्र आम्नातः ॥ इंद्रं मित्रं वरुणमग्निमाहुः इति अक्षरस्य श्रुत इति वा तस्याक्षरत्वं कारणत्वेनोत्कर्षात् परमत्वं पुनः कथंभूतः पश्यते
ज्ञानिभिः प्राप्यत इति लक्ष्यत इति वा पदं ॥ द्वितीयामृचमाह ॥ विश्वतः परमान्नित्यं विश्वं नारायणं हरिं ॥ विश्वमेवेदं पुरुषस्तद्विश्व
मुपजीवतीति ॥ विश्वतो जगतो जडवर्गात् परमात् विभक्तिव्यत्ययः परमं उत्कृष्टं ऋगभेदेन पुनरुक्तिपरिहारो द्रष्टव्यः प्रकृतिरूपत्वात्
अनेन प्रकारेण ध्यातव्यत्वाच्च नास्ति पुनरुक्तिदोषः विनाशरहितत्वाच्च नित्यत्वं यदिदं विश्वमिदानीं अज्ञानदृष्ट्या प्रवर्तते तत्सर्वं वस्तु
तत्वदृष्ट्या पुरुषः परमात्मैव स च परमात्मा तद्विश्वमुपजीवति स्वस्य व्यवहारार्थमाश्रयति ॥ तृतीयामाह ॥ नारायणं महाज्ञेयं विश्वा
त्मानं परायणं ॥ पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं ॥ विश्वस्य जगतः पालकत्वात् पतिं आत्मनो जीवानां नियामकं ३०

त्वादीश्वरं नियंतारं वर्त्तमानत्वाच्छाश्वतं परममंगलत्वाच्छिवं नारायणत्वं पूर्वमुक्तं ज्ञेयेषु तत्त्वेषु मध्ये प्रौढत्वान्महाध्येयं
जगदुपादानत्वेन तदभेदाद्विश्वात्मकं उत्कृष्टाधारत्वं परायणत्वं सर्वमध्यारोपितं जगदधिष्ठाने वर्तते ॥ चतुर्थीमाह ॥
नारायणपरोज्योतिरात्मानारायणः परः ॥ नारायणपरंब्रह्मतत्त्वंनारायणः परइति ॥ पुराणेषु नारायणशब्देन व्यवह्रि
यमाणोयः परमेश्वरः सएव परं उत्कृष्टं सत्यज्ञानादिवाक्यप्रतिपादितस्य ब्रह्मणस्तत्त्वं अतो नारायणः परएवात्मा
नत्वमरोमूर्तिविशेषः तथापरोज्योतिः तदेतदुत्कृष्टंज्योतिश्छंदोगैः परंज्योतिरुपसंपद्यतइत्याम्नातं ॥ तदपिनारायणएव तस्मान्ना
रायणः परमात्मा पुनरपिनारायणस्य सर्वात्मकत्वमुच्यते नारायणश्छांदसत्वात्सर्वेत्रविसर्गलोपः परंब्रह्मवेदांतवेद्यंचि
द्रूपं तत्त्वं अबाधितंयथार्थवस्तु परः सर्वोत्कृष्टः परोजाड्यादिगुणव्यतिरिक्तः ध्याता वेदांताधिकारी ध्यानं प्रत्यगात्म
गोचरो वृत्तिविशेषः परः मायानाशकः एवं विधोनारायणइतिध्यायेदित्यर्थः ॥ पंचमीमृचमाह ॥ यच्चकिंचिज्जगत्स
र्वंदृश्यतेश्रूयतेपिवा ॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः ॥ अस्मिन्वर्तमाने जगति यत्किंचित्समीपवर्तिवस्तु

जातं दृश्यते अपि वा दूरस्थं श्रूयते तत्सर्वं वस्तुजातं अयं नारायणोंतर्बहिश्च व्याप्यावस्थितः यथा कटकमुकुटाद्याभरणस्य
उपादानकारणं सुवर्णं अंतर्बहिर्व्याप्यावतिष्ठते तद्वत् ॥ षष्ठीमृचमाह ॥ अनंतमव्ययं कविं समुद्रेंतं विश्वशंभुवं ॥
पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखं ॥ अत्र पूर्वार्धेन नारायणस्य वास्तवरूपं संक्षिप्यापन्यस्यते ॥ अनंतं देशप
रिच्छेदरहितं अव्ययं विनाशरहितं कविं चिद्रूपेण सर्वज्ञं समुद्रे अतिबहुत्वेन समुद्रसदृशे संसारे अंतं अवसानरूपं
यदा नारायणस्य स्वरूपं जानाति तदैव संसारः क्षीयत इत्यर्थः विश्वशंभुवं विश्वस्य संसारसुखस्योत्पत्तिकारणरूपं ए
तस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुत्यंतरादीदृशं नारायणरूपमिति शेषः उत्तरार्धेनोपासनस्थानमु
च्यते ॥ पद्मकोशमित्यादिना यथाष्टदलकमलस्य कोशमध्यच्छिद्रं तत्सदृशं तच्च हृदयशब्दवाच्यं सो किंच पद्मवदू
र्ध्वमुखं हृदयपद्मं त्वधोमुखमिति शेषः ॥ सप्तमीमृचमाह ॥ अधो निष्ट्या वितस्त्यांते नाभ्यामुपरि तिष्ठति ॥ ज्वा ३१
लमालाकुलं भाती विश्वस्यायतनं महत् ॥ निष्टिः ग्रीवाबंधः तस्याधस्ताद्वर्तते तत्रापि नाभ्यामुपरि नाभिदेशस्योर्ध्वे दू
रभागे वितस्त्यां द्वादशांगुलिपरिमितावितस्तिः एवंविधप्रदेशे पूर्वोक्तं यद्धृदयपुंडरीकं वर्तते तत्र महत्परब्रह्म भाति

तो

दीर्घश्छांदसः कथंभूतं विश्वस्यब्रह्मांडस्यायतनमाधारः ज्वालमालाभिः प्रकाशपरंपराभिराकुलं व्याप्तमित्युक्तं॥ अष्टमीमृचमा
ह॥ संततं शिलाभिस्तु लंबत्याकोशसंनिभं॥ तस्यांते सुषिरं सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितं॥ आकोशः पद्ममुकुलं तस्मिन्सं
निभं तत्सदृशं हृदयकमलं लंबते शरीरमध्ये अधोमुखत्वेनावलंबते तच्च शिलाभिर्नाडीभिः परितः सम्यग्व्याप्तं संततं
चैकाचहृदयस्यनाड्य इतिश्रुत्यंतरात् तस्यहृदयस्यांतेसमीपेसूक्ष्मंसुषिरंछिद्रंसुषुम्नानाडीनालं तिष्ठति तस्मिन्
सुषिरे सर्वमिदंजगत्प्रतिष्ठितंश्रितंतत्रमनसिप्रविष्टेसतिसर्वजगदाधारस्यब्रह्मणोभिव्यज्यमानत्वात्॥ नवमी
मृचमाह॥ तस्यमध्येमहानग्निर्विश्वार्चिर्विश्वतोमुखः॥ सोग्रभुग्विभजंतिष्ठन्नाहारमजरःकविः॥ तिर्यगूर्ध्व
मधःशायीरश्मयस्तस्यसंतता॥ तस्यसुषुम्नानालस्यमध्येमहाश्रेष्ठोग्निर्वर्ततेसचविश्वार्चिर्बहुज्वालोपेतः
अतएवज्वालाविशेषैः परितोवस्थितासुसर्वासुनाडीषुसंसरणाद्विश्वतोमुखोबहुविधमुखः अग्रभुक् स
स्यपुरतःप्राप्तमन्नंभुंक्तेइत्यग्रभुक् सचभुक्तमाहारंशरीरेसर्वावयवेषुविभजान्विभाजयन्प्रसारयन् तिष्ठ

न्नवतिष्ठतइत्यर्थः॥तथाचभगवतोक्तं॥अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः॥प्राणापानसमायुक्तःपचाम्यन्नंचतुर्वि
धमितितस्माद्भुक्तमन्नमसौजरयति॥नतुस्वयंजीर्यतइत्यजरः अतःकविःअभिज्ञःकुशलइत्यर्थः॥किंचतस्याग्रेरश्म
यःकिरणाःतिर्यक्ऊर्ध्वंअधःश्रेरतइतिवचनव्यत्ययः॥संतता सर्वतोव्याप्ताः॥दशमीमृचमाह॥संतापयतिस्वंदेह
मापादतलमस्तकः॥तस्यमध्येवन्हिशिखाअणीयोर्ध्वाव्यवस्थितः॥पादतलमारभ्य मस्तकः वर्णव्यत्ययः मस्तक
पर्यंतंकृत्स्नमपिस्वकीयंदेहं सर्वदासंतापयति सोयंशारीरगतःसंतापःअग्निसद्भावेलिंगं तस्यज्वालाविशेषैःकृ
त्स्नदेहव्यापिनःमध्येवन्हिशिखाकाचित्ज्वालाअणीयाअत्यंतसूक्ष्माऊर्ध्वासुषुम्नानाडीनालेनऊर्ध्वंब्रह्मरंध्र
पर्यंतंप्रसरसावस्थितविशेषेणावस्थिता। एकादशीमृचमाह।नीलतोयदमध्यस्थाद्विद्युल्लेखेवभास्वरा।नी
वारशूकवत्तन्वीपीताभास्वत्यणूपमाइति।तोयमुदकंददातिइतितोयदोमेघःसचवार्षिकंजलपूर्णत्वान्नी ३२
लवर्णः तादृशस्यमेघस्यमध्यस्थिताविद्युल्लेखेवसेयंपूर्वोक्ताशिखाभास्वराप्रभावतीनीवारबीजस्यशूकंदी

र्घपुच्छं यथा तनुर्भवति तद्वद्दिव्यशिखा वर्तन्वी सूक्ष्मा बाह्यवन्हिशिखेव पीता भास्वती पीतवर्णा दीप्तियुक्ता च भवेत् सा च अणू
पमा लौकिकानां अणूनां सूक्ष्मवस्तूनां भवितुं योग्या ॥ द्वादशीमृचमाह ॥ तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ॥ स
ब्रह्म स शिवः स हरिः सेंद्रः सोक्षरः परमः स्वराट् ॥ तस्याः पूर्वोक्ताया वन्हिशिखाया मध्ये जगत्कारणभूतः परमात्मा विशे
षेणावस्थितः तस्योपासनार्थमल्पस्थानत्वेपि न स्वयमल्पः किंतु सर्वदेवात्मको ब्रह्मा चतुर्मुखः शिवः गौरीपतिः हरिरिंदि
रापतिः इंद्रः स्वर्गाधिपतिः अक्षरः जगद्धेतुर्मायाविशिष्टोंतर्यामीश्वरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते इति भगवतो
क्तत्वात् परमो मायारहितः शुद्धचिद्रूपः अत एव पारतंत्र्याभावात् स्वराट् स्वयमेव राजा सहस्रशीर्षमित्यादिवाक्यप्र
तिपादितं पद्मकोशप्रतीकाशमित्यादिवाक्योक्तप्रकारेण ध्यायेदिति तात्पर्यार्थः ॥ ॥ इति त्रयोदशोनुवाकः ॥ ॥
इदानीमादित्यमंडले परब्रह्मण उपासनामाह ॥ आदित्यो वा एष एतन्मंडलं तपति तत्र ता ऋचस्तदृचा मंडलꣳ स ऋ
चां लोकोथ य एष एतस्मिन्मंडलेर्चिर्दीप्यते तानि सामानि स साम्नां लोकोथ य एष एतस्मिन्मंडलेर्चिषि पुरुषस्तानि
यजूꣳषि स यजुषा मंडलꣳ स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोंतरादित्ये हिरण्मयः पुरुषः ॥ १४ ॥

इदानीमादित्यमंडले परब्रह्मण उपासनमाह। नारायणशब्दवाच्यो यः परमेश्वरः पूर्वानुवाकेऽभिहितः स एष आदि
त्यो वै सोपाधिकः सन् आदित्यरूपेणायोवर्तते तस्य चादित्यस्यैतद्दृश्यमानं मंडलं वर्तुलाकारं उष्णं तेजः
तपति संतापं करोति तत्र तस्मिन्मंडले ता अध्यापकप्रसिध्या अग्निमीळे इत्यादिका ऋचोवर्तते तस्मात्कारणान्मंड
लमृचा निष्पादितमिति शेषः। स मंडलभागः ऋग्भिर्निष्पादितः स ऋचामृगभिमानिदेवानां लोको निवासस्था
नमेवमृगात्मकत्वं मंडलस्य ध्यात्वा नंतरं सामात्मकत्वं तत्र ध्यातव्यं कथमित्युच्यते। एतस्मिन्मंडले य एषोय एतद
र्चिर्दीप्यते भास्वरं तेजः प्रकाशते तान्यर्चिः स्वरूपाणि बृहद्रथंतरादिसामानि इति ध्यायेत्। सोर्चिर्भागः साम्नां
सामाभिमानिदेवतानां लोको निवासस्थानं। अथ सामध्यानानंतरं यजुरात्मकं कथमिदमुच्यते य एष शा
स्त्रप्रसिद्धः। एतस्मिन्दृश्यमाने मंडले तदर्चिः पुरुषो देवतात्मा वर्तते तानि देवतारूपाणि यजूंषि इषे त्वोर्जे त्वेत्यादी
नि यजुर्भागो यजुषां यजुरभिमानिदेवतानां लोको निवासस्थानं सेषा मंडलस्तदर्चिः तत्रत्य पुरुष रूपा त्रय्ये ३३
व ऋग्यजुःसामात्मकैव विद्या तपति प्रकाशते यः पुरुषोत्राभिहितः एषोंतरादित्ये आदित्यमंडलमध्ये हिरण्मयो वर्ण

तेहिरण्मयःपुरुषोदृश्यतेहिरण्मयकेशहिरण्मयश्मश्रुआप्रणखात्सर्वएवसुवर्णइति॥ ॥चतुर्दशोनुवाकः॥ ॥पूर्वोक्तस्यैवादित्यपुरु
षस्यसर्वात्मकत्वलक्षणमवैशिष्ट्यमुपास्यगुणंदर्शयति॥आदित्योवैतेजओजोबलंयशश्चक्षुःश्रोत्रमात्मामनोमन्युर्मनुर्मृत्युः
सत्योमित्रोवायुराकाशःप्राणोलोकपालःकःकिंकंतत्सत्यमन्नममृतोजीवोविश्वःकतमःस्वयंभुब्रह्मैतदमृतएषपुरुष
एषभूतानामधिपतिर्ब्रह्मणःसायुज्यंसलोकतामाप्नोत्येतासामेवदेवतानांसायुज्यंसार्ष्टितांसमानलोकता
माप्नोतियएवंवेदेत्युपनिषदिति॥योयमुपास्यत्वेनोक्तआदित्यःसएवतेजआद्यधिपत्यंतसर्वजगदात्मकस्तेजोदी
प्तिःओजोबलकारणंबलंशरीरशक्तिःयशःकीर्तिश्चक्षुःश्रोत्रेबाह्येंद्रियेआत्मादेहःमनोंतःकरणंमन्युस्तद्धर्मःकोपः
मनुर्वैवस्वतादिःमृत्युर्यमःसत्यःमित्रःदेवविशेषःवायुःआकाशःभूतविशेषःप्राणःपंचवृत्तिःलोकपालःइंद्रादिःकः
प्रजापतिःकिंअनिर्वचनीयंकंसुखंतत्परोक्षंसत्यंयथार्थभाषणंअन्नमोदनादिअमृतोदेवसमुदायःमोक्षोवाजीवःस
मस्तजीवकोटिःविश्वंसर्वजगत्विश्वेतेजसावाकतमःअत्यंतंसुखंस्वयंभुउत्पत्त्यादिवर्जितंब्रह्मएतत्सर्वआदित्यएवेत्य
र्थःकिंचामृतोनित्यएषआदित्यःपुरुषःपूर्णत्वात्एषआदित्यःसर्वेषांभूतानांअधिपतिःप्रभुःइतःपरमेतत्परिज्ञातुःफल

माह॥यः पुमानेवमुक्तप्रकारेण वेदोपास्ते स पुमान्सायुज्यादिफलं प्राप्नोति द्विविधमुपासनं हिरण्यगर्भोपासनं तदवयवभूतदे
वतोपासनं चेति तत्र हिरण्यगर्भोपासनात् भावनाधिक्ये सति ब्रह्मणो हिरण्यगर्भस्य सायुज्यं सहभावं तादात्म्यं प्राप्नोति
भावनामांद्ये सलोकतां हिरण्यगर्भेण सहैकलोकनिवासं प्राप्नोति देवतोपास्तावपि भावनाधिक्ये सत्येतासामेवमहरा
दीनां देवतानां सायुज्यं प्राप्नोति भावनायां मध्यमत्वे सति सार्ष्टितां समानैश्वर्यतां प्राप्नोति मांद्ये तु समानलोकतां प्रा
प्नोति उत्तरमंत्रजपविवक्षयोपास्तिप्रकारमुपसंहरति इत्येवं पूर्वोक्तैरनुवाकैरुक्तोपनिषद्रहस्यभूता विद्या समा
प्तेति शेषः॥इति पंचदशोऽनुवाकः॥इतःपरं नूतनशिवाख्यादिकं कृत्वा तत्र लिंगप्रतिष्ठापनावसरे प्रत्यहं पार्थि
वलिंगप्रतिष्ठापनावसरे चाविनियुक्ताः जपमात्रेण पापक्षयार्थाश्च पार्वतीपतिनमस्कारार्था मंत्रा उच्यंते॥सर्वलिंगः स्था
पयतिपवित्रमितिचलिंगात्॥ निधनपतयेनमः॥निधनपतांतिकायनमः॥ऊर्ध्वायनमः॥ऊर्ध्वलिंगायन
मः॥हिरण्यायनमः॥हिरण्यलिंगायनमः॥सुवर्णायनमः॥सुवर्णलिंगायनमः॥दिव्यायनमः॥दिव्यलिंगाय

नमः॥भवायनमः॥भवलिंगायनमः॥शर्वायनमः॥शर्वलिंगायनमः॥शिवायनमः॥शिवलिंगायनमः॥ज्वलायनमः॥ज्व
ललिंगायनमः॥आत्मायनमः॥आत्मलिंगायनमः॥परमायनमः॥परमलिंगायनमः॥एतत्सोमस्यसूर्यस्यसर्व
लिंगंस्थापयतिपाणिमंत्रंपवित्रं॥पार्वतीपतयेनमोस्तु कथंभूतायनिरंतरांबहूनिधनानितेषांपतिःकुबे
ररूपेणतस्मैपुनःकथंनिधनानिपातीतिनिधनपःभक्तेभ्यःतनोतिविस्तारयतीतिइतितः निधनंपश्चात्सोतस्थेतिपुनःकर्मधा
५ रयस्तस्मैऊर्ध्वायऊर्ध्वलोकेषुदेवतारूपेणविद्यमानोइत्यर्थः ऊर्ध्वलिंगायऊर्ध्वलोकेष्वपिगीर्वाणैर्लिंगरूपेणस्थापयित्वा
पूज्यमानायेत्यर्थः॥हिरण्यायसर्वात्मकत्वात्कनकरूपायहिरण्यलिंगायकनक निर्मितलिंगाकाराय शोभनोवर्णः
कांतिर्यस्यतत्सुवर्णोरजतहिरण्यस्योक्तत्वात्सुवर्णशब्दोरूढिमुत्सृज्ययोगेनरजतंवदतिसुवर्णलिंगायरजतनि
र्मितलिंगाकाराय दिव्यायद्युलोकसुखरूपाय दिव्यलिंगायइंद्रादिसंस्थापितद्युलोकलिंगाकारायभवायसंसा
ररूपायभवात्युत्पत्तेर्ब्रह्मांडंयस्मादितिभावः तस्मैभवलिंगायभवशब्देनभवंतःसंसारिणोलक्ष्यंतेतैर्भूर्लोकेपूज्यमानशिलाम
यादिलिंगाकारायशृणातिप्रलयेब्रह्मांडंहिनस्तिइतिशर्वःतस्मैशंमहत्सुखंवातिगच्छतिप्राप्नोतीतिशर्वःसर्वरूपंचतल्लिंगंशर्वलिं

गंतस्मै विशति चैतन्यरूपेण सर्वं जगदिति शेषः॥ शिवःषष्ठ्यादशादित्याद्वर्णव्ययः शिवस्य कल्याणस्य लिंगं ज्ञापकं शिवलिंगं पू
जकस्य कल्याणकारकत्वात् ज्वलाय ज्योतिर्मयत्वात् उज्वललिंगाय भूलोके विद्यमानद्वादश ज्योतिर्लिंगरूपाय आत्माय नि
खिलजगदात्मकाय लीनं सुरनरादिसर्वप्राणिगुहासु सूक्ष्मं गोपितं ब्रह्मरूपेण गमयति विज्ञापयतीति लिंगः आत्मा सर्वजंतु
रूपश्चासौ लिंगश्चेत्यात्मलिंग आत्मरूपस्तस्मै यस्मादुत्कृष्टो नास्ति स परमस्तस्मै पाति जगदिति पः रमते मोक्षसाम्राज्य
इति रमः स चासौ सश्चेति कर्मधारयः लीनं विलीनमपि सर्वज्ञत्वाज्झटित्यवगच्छति जानातीति लिंगः परमश्चासौ लिंगश्चेति पर
मलिंगस्तस्मै परमलिंगाय नमः एतदिति विभक्तिवचनव्यत्ययः एतैः पूर्वोक्तैर्मंत्रैः सर्वो लिंगं रससुवर्णाद्यन्यतरनिर्मितं
लिंगमात्रं स्थापयति सर्वोपि त्रैवर्णिको लोकः प्रतिष्ठापयति लिंगं कथंभूतं सोमस्य सूर्यस्योपलक्षण्येन समस्तानां देव
तानां कारणभूतमिति शेषः प्राण्युपलक्षितसर्वावयवायमानाः मंत्राः वेदवाक्यविशेषा यस्य तस्य च पाणिमंत्रं त्रयी
मयशरीरमिति यावत् पवित्रयति पापिनः स्मरणमात्रेणेति पवित्रं॥ इति षोडशोनुवाकः॥ ॥अथ त्रैवर्णिकानां शा
स्त्राधिकारिणां ज्ञानोत्पादनाय महादेवसंबंधिषु पंचवक्त्रेषु पश्चिमवक्त्रप्रतिपादकं मंत्रमाह॥ सद्योजातं प्रपद्यामिस

द्योजाताय वै नमो नमः॥ भवे भवे नातिभवे भवस्व मां॥ भवोद्भवाय नमः॥ सद्योजातनामकं यत्पश्चिमवक्त्रं तद्रूपं परमेश्वरं प्रपद्या मि प्राप्नोमि तादृशाय सद्योजाताय वै नमोस्तु॥ द्विरुक्तिरादरार्था इति तस्य द्योतनार्था हे सद्योजात भवे भवे तत्तज्जन्मनि मि त्तं मां नभवस्व न प्रेरयेत्यर्थः किं तर्हि अतिभवे जन्मातिलंघन निमित्तं भवस्व तत्वज्ञानाय प्रेरय भवोद्भवाय संसारादुद्धर्त्रे सद्यो जाताय नमोस्तु इति सप्तदशोनुवाकः उत्तरवक्त्रप्रतिपादकमंत्रमाह॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमना य नमो मनोन्मनाय नमः॥ उत्तरवक्त्राय नमोस्तु कथंभूताय वामं सुंदरं च तत्तद्देवं दीप्यमानं चेति वामदेवस्तस्मै सर्व जगदुत्पत्तेः पूर्वं भावित्वात् ज्येष्ठाय प्रशस्ततमत्वात् श्रेष्ठाय प्रलये रोदनहेतुत्वात् रुद्राय अतएव सर्वप्राण्यायुषः क्षीणहेतुत्वात्तु कालाय कं सुखं लातिस्वीकरोतीति कलं विविधं जगत्क्रियते येन तद्विकरणं कलं च तद्विकरणं चेति कलविकरणं तस्मै रक्षसां बलं विकीर्यते हिंस्यते येन स बलविकरणस्तस्मै सर्वाणि भूतानि दमयति शिक्षयतीति स र्वभूतदमनं स्तस्मै मन्यते सर्वं जानातीति मनं सर्वज्ञं उत्कृष्टं मनमुन्मनं सर्वज्ञतममनं च तदुन्मनं च तस्मै॥ इत्यष्टादशो

नुवाकः॥दक्षिणवक्त्रप्रतिपादकं मंत्रमाह॥अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥अघो
रनामको दक्षिणवक्त्ररूपो देवस्तस्य विग्रहः अघोराः सात्विकत्वेन शांताः सौम्याः अन्ये तु घोराः राजसत्वेनोग्राः अपरे तु तामसत्वेन घो
रादपि घोरतराः हे सर्व सर्वात्मक परमेश्वर त्वदीयेभ्यः पूर्वोक्तेभ्यः त्रिविधेभ्यः शर्वेभ्यो रुद्ररूपेभ्यः हिंसकेभ्यः रुद्राध्यायप्रतिपादिते
भ्यो रुद्रेभ्यः सर्वेभ्यः सर्वेषु देशेषु सर्वेषु कालेषु च वर्तमानेभ्यो नमोस्तु॥ इत्येकोनविंशोनुवाकः॥प्राग्वक्त्रप्रतिपादकं मंत्रमा
ह॥ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ प्राग्वक्त्रो देवस्तत्पुरुषनामकः द्वितीयार्थे चतुर्थी तत्पुरुषं दे
वं विद्महे गुरुशास्त्रमुखाज्जानीमः ज्ञात्वा च महादेवाय तं महादेवं धीमहि ध्यायेम तत्तस्मात्कारणा रुद्रदेवो नोस्मान्प्रचोदयात्
ध्यानज्ञानार्थं प्रचोदयतु॥ इति विंशोनुवाकः॥ ॥ऊर्ध्ववक्त्रप्रतिपादकं मंत्रमाह॥ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥ योयमूर्ध्ववक्त्रो देवः सोयं सर्वविद्यानां वेदशास्त्रादीनां चतुःष
ष्टिकलाविद्यानामीशानो नियामकस्तथा सर्वभूतानामखिलप्राणिनामीश्वरो नियामकः ब्रह्माधिपतिः वेदस्याधिपतित्वेन पालकः तथा ब्रह्मणो
हिरण्यगर्भस्याधिपतिस्तादृशो यो ब्रह्मा श्रेष्ठः परमात्मा सोयं मे मम अनुग्रहाय शिवः शांतोस्तु सदाशिवोम् स एव सदाशिवः ओं अहं भवामि इत्येकविं ३७

शोऽनुवाकः॥ ॥पुनरपितद्दैवताकंमंत्रांतरमाह॥ नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्यरूपायांबिकापतयउमापतयेपशुपतये हिरण्यपतये
नमोनमः॥शिवायनमोस्त्वकथंभूतायपशूनांआब्रह्मस्तंबपर्यंतानांपतिर्नायकःपशुपतिस्तस्मै॥ब्रह्माद्यास्तंबपर्यंताः
पशवःपरिकीर्तिताः॥तेषांहिनायकोयस्माच्छिवःपशुपतिःस्मृतः॥उमायाःपतिरुमापतिस्तस्मैउमाशब्दःकविभिर्व्याख्यातः
उमेतिमात्रातपसोनिषिद्धापश्चादुमाख्यांसुमुखीजगामेति॥अंबिकायाःपार्वत्याःपतिःअंबिकापतिस्तस्मैहिरण्योपलक्षि
तनवनिधिपालकत्वाद्धिरण्यपतिस्तस्मै हिरण्यरूपायतेजोमयायहिरण्यवत्अंतर्बध्याःवर्णाःवेदाक्षराणियस्माद्दुर्लभाः
यंतेसहिरण्यवर्णःयथादरिद्राणांहिरण्यंदुर्लभंतद्वत्सापिनांगुरुकुलेस्थित्वाऽभ्यसनीयानांवेदाक्षराणांदुर्लभत्वादितिभावः
हिरण्यबाहवेकनकवत्कमनीयमानबाहूपलक्षितसर्वावयवायनमः॥ इतिद्वाविंशोऽनुवाकः॥ ॥पूर्वोक्तप्रका
रेणोपासनीयस्यपुरुषस्यउपास्यनमस्कारार्थामेकामृचमाह॥ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं॥ऊर्ध्वरेतंविरूपाक्षंविश्वरूपायवै
नमोनमइति॥यदेतत्परंब्रह्मतत्सत्यमवध्यंसत्यंत्वंचाद्विविधंव्यावहारिकंपारमार्थिकंचेति हिरण्यगर्भरूपंव्यावहारिकंसत्यंतन्नि
राकरणेनपारमार्थिकंसत्यंप्रतिपादयितुंऋतंसत्यमितिविशेष्यते अस्यंतंसत्यमित्यर्थः तादृशंब्रह्मभक्तानुग्रहायामाम

ना॰रु॰भा॰ हेश्वरात्मकपुरुषरूपंभवति तत्रदक्षिणेमहेश्वरभागे कृष्णवर्णउमाभागेवामेपिंगलवर्णः सचयोगेनस्वकीयंरेतोब्रह्मरंध्रेधृत्वाऊर्ध्वरे
३७ ताभवतित्रिनेत्रत्वात्।वि[illegible]रूपाक्षस्तादृशंपरमेश्वरमनुश्रुत्येतिशेषः विश्वरूपायजगत्कारणत्वेनसर्वजगदात्मकतया।विरूपा
क्षायपुरुषायेषनमस्कारोस्तु॥इति।त्रयोविंशोनुवाकः॥रुद्रदेवताकंमंत्रमाह॥सर्वोवैरुद्रस्तस्मैरुद्रायनमोअस्तु॥पुरुषोवैरु
द्रःसन्महोनमोनमः॥विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत्॥सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु॥योरुद्रःपार्व
तीपतिःपुराणेषुप्रसिद्धःसएवसर्वरूपेणसर्वशरीरेषुप्रविष्टत्वात् तस्मैसर्वात्मकायरुद्रायनमोस्तु प्रकृतिपुरुषयोर्मध्ये
जडात्मिकांप्रकृतिमपोह्यचिदात्मकःपुरुषोयोविद्यतेसएवभक्तानुग्रहायरुद्रमूर्तिरूपेणावभासतेतस्माद्यतःसन्महःसदेवसोम्ये
दमग्रआसीदितिश्रुतिप्रतिपाद्यमबाध्यंतत्सद्रूपंतेजःतादृशायरुद्रायपुनःपुनर्नमस्कारोस्तु यज्जडंविश्वमस्तियच्चभूतंचेतनं
प्राणिजातमस्तिइतिचेतनाचेतनरूपेणविचित्रंयद्भुवनंजगत् तत्रापिजगज्जातंपूर्वमेवासन्नंयच्चेदानींजायमानंसर्वोपि
प्रपंचएषरुद्रोहितद्व्यतिरेकेणवास्तवस्यजगतोनिरूपयितुमशक्यत्वात्तादृशायसर्वात्मकायरुद्रायनमस्कारोस्तु॥
इतिचतुर्विंशोनुवाकः॥कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे॥वोचेमशंतमंहृदे॥सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु॥
कथश्लाघायामितिधातोरुत्पन्नकच्छब्दःप्रशंसामाह॥ततःकद्रुद्रःप्रशस्तोरुद्रःतस्मैप्रचेतसेप्रकृष्टज्ञानयुक्तायमिढुसेच २७

नइति धातुः अभीष्टानां कामानामतिशयेन सेचकाय स्तोतुः कामप्रदायेत्यर्थः ॥ तव्यसे अत्रादिसकारस्य छांदसो लोपः स्तव्याय
स्तोतुं योग्यायेत्यर्थः हृदयवर्त्तित्वेन तद्रूपाय शंतमं अतिशयेन सुखकरं स्तुतिरूपं वाक्यं वोचेम कथयेम स र्वोहीति पूर्ववं
त॥ ॥इति पंचविंशोनुवाकः॥ ॥अथाग्निहोत्रकर्मणि होमसाधनद्रव्यस्य कारणभूतं वृक्षविशेषं विधत्ते॥ यस्य वैकंकत्य
ग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठंत्यथो प्रतिष्ठित्यै॥ अग्निहोत्रेह विर्द्रूयते यया दर्व्या सेयमग्निहोत्रहवणी सा च
वैकंकती विकंकताख्येन वृक्षेण निष्पादिता यस्याग्निहोत्रिणो भवति अस्याग्निहोत्रिण आहुतयस्तिष्ठंति तयाग्निहोत्रह
वण्या प्रक्षिप्ताः सत्यः प्रतितिष्ठंत्येव फलप्रदा भवंत्येव अथो अपि च प्रतिष्ठित्यै अनुष्ठातुश्चित्तशुद्धिद्वारा तत्त्वज्ञान प्रतिष्ठा
र्थं संपद्यंते मुमुक्षोश्चित्तशुद्धिद्वारा वेदोक्तानां कृत्स्नकर्मणां मोक्षं साधयितुं उपलक्षणत्वेन कर्मांगभूतो विकंकतवृक्षो वि
हितः॥ इति षड्विंशोनुवाकः॥ चित्तशुद्धिहेतूनां कर्मणां संग्रहेणोपयोगमस्मिन्मोक्षप्रकरणे सूचयित्वा प्रतिबंधनिवार
कान् राक्षोघ्नान्मंत्रान् जप्यत्वेनाभिधत्ते॥ कृणुष्व पाज इति पंचेति॥ अनुष्टुप्छंदस्काः॥ अग्निदेवताकाः॥ अस्मिन् त्र्यृक्रूपं स
के भगवानग्निरभिष्टूयते॥ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन॥ तृष्वीमनु प्रसितिं द्रूणानोस्तासि विध्य रक्ष

ना॰उ॰भा॰ सस्तपिष्ठैः॥ हे अग्ने अस्मदीयकामक्रोधादिशत्रूणां संहारार्थं पाजो बलं अस्मभ्यं कृणुष्व कुरुष्व तत्र दृष्टांतः पृथ्वीं विस्तीर्णं
३८ प्रसितिं न प्रसितिमिव जालमिव नकार उपमार्थः सीयंते बध्यंते पक्षिणो यया प्रकर्षेण सा प्रसितिः जालं षिञ् बंधने इति
धातुः यथा पक्षिभक्षकाः निषादाः तद्बंधनार्थं जालं विस्तीर्णं प्रसारयंति तथा भो भगवन्नग्ने बलं प्रसारयेत्यर्थः ततः राजा इव
नृप इव अमवान् सहायवान् सन् इभेन गजेन तदुपलक्षितचतुरंगबलेन शत्रून् प्रति याहि गच्छ अमंति भजंति स्वामिन
मिति अमाः सेवकाः तद्वान् अमवान् यथा राजा चतुरंगबलसहितः सन् शत्रून् संहर्तुं गच्छति तथा त्वमपि भो भगवन्न
ग्ने अस्मदीयशत्रून् संहरेत्यर्थः त्वं कथंभूतः तृष्वीं प्रसितिं अनु द्रूणानः अत्र विभक्तिव्यत्ययः तृष्व्या शीघ्रसंहार
साधनया प्रसित्या शत्रून् अनु पलायनकाले पश्चात् द्रूणानो हिंसयन् द्रू हिंसायां इति धातुः अस्तासि असु क्षेपणे इति
धातुः बाणानां प्रक्षेपकोसि यस्मादेवं तस्माद्रक्षसो दैतेयान् तपिष्ठैः अतिसंतापहेतुभिः आयुधैः विध्य ताडय अ
स्मिन्मंत्रे बाह्याभ्यंतरशत्रुनिवृत्तिरग्निप्रार्थनायाः फलं॥ तव भ्रमास आशुया पतंत्यनु स्पृश धृषता शोशुचानः॥ तपूं
ष्यग्ने जुह्वा पतंगानसंदितो विसृज विष्वगुल्काः॥ भो भगवन्नग्ने भ्रमासः सर्वत्र प्राणिनः पीडयितुं भ्रमणशीलाः आशु
या आशु शीघ्रं यांति इति तस्ततः संचरंतीति आशुयाः जसो लोपश्छांदसः एवंविधा ये पिशाचाः पतंति पतॢ गतौ इतस्ततो ३८

गछंतितानू पतंगानधःपतनशीलानू पिशाचानू तपूंषि प्रपंचतपनशीलानि रक्षांसि च धृषता प्रगल्भेन ञिधृषा प्रागल्भ्ये इति धातुः
तव तेजसेति शेषः अनुस्पृश दहेत्यर्थः त्वं कथंभूतः शोशुचानः अंतर्बहिः शत्रून् अतिदुःखयन् यद्वा शोशुचानो दीदीप्यमानः शुच दी
प्ताविति धातुः पुनः कथंभूतः जुह्वा स्रुचा हूयमानघृतपुरोडाशादिरूपहविष्या नितिशेषः पुनः कथंभूतः दो अवखंडने धातुः रा
क्षसैः सम्यक् न संदितः खंडितः असंदितः एवंविधस्त्वं शत्रूणां च विष्वकू उपर्यधस्तिर्यकू सर्वतः उल्काः अलातज्वालाः विसृज प्रसा
रयेत्यर्थः ।। प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।। यो नो दूरे अघशंसो यो अंत्यग्ने माकिष्टे व्यथिरा दधर्षी
दिति ।। भो भगवन्नग्ने तूर्णितमः अतिक्षिप्रतमः त्वं स्पशः स्पश बंधने इति धातुः शाकारांतो द्वितीयाबहुवचनं बंधकान् पाशा
१ या.४ न् शत्रून् प्रति विसृज पाशैर्बध्वा नयेत्यर्थः किंचास्याः अस्मदीयायाः विशः पुत्रादिप्रजायाः पायुः पाति रक्षतीति पायुः रक्षको ध या:
भव किंच नो स्माकं दूरे अंति अंतिके अघशंसः सः अघं पापं शंसति इच्छतीत्यघशंसः सः शंसु इच्छायां तमपि पराकुर्विति शेषः अह
मपि अदब्धः शत्रुभिरनुपहिंसितः भवामि दंभु हिंसायां धातुः किंच माकिः कोपि छांदसोयं प्रयोगः व्यथिः व्यथकः राक्षसः तेत
५ व पुरस्तात्त्वमादधर्षीत् मा धृष्टोभूदित्यर्थः अग्निदर्शनस्य राक्षसपिशाचादिपलायनहेतुत्वात् ।। तथा च नीतिशास्त्रे ।। दिवा
सूर्यप्रतापेन रात्रौ वन्हिप्रतापतः ।। पिशाचराक्षसादीनां दूरतस्त्वपलायनं ।। तस्माद्रात्रौ मनुष्याणां वने मार्गे गृहेपि वा ।। व
न्हिसेवनमाहात्म्यात्पिशाचादिपलायनमिति ।। उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्रां ओषतात्तिग्महेते ।। यो नो अरातिं स

मिधानचक्रे नीचानंधस्यतसंनशत्रुकं॥ भोभगवन्नग्ने अस्माननुग्रहीतुं उत्तिष्ठ अस्मा अभितिद्रयं आततनुष्व आमित्रान्का मारीन् नितरां ओषतात् भस्मी
कुरु उषदाहे किंच भो तिग्मदे तेभो तीक्ष्णायुध नोस्माकमुपरियः कश्चिदरातिस्त्वं चक्रे कृतवान् तंअस्म द्रोहिणंशत्रुकं अतसंनकक्षवृक्षादिकमिव यथशि
दग्धं कुरु नीचानीचैः अधोनरकमार्गं च कुरु भो समिधानदेदीप्यमान वन्हे इंधीदीप्तोसर्वमेनदस्मदीयं कार्यं साधयेत्यर्थः॥ ऊर्ध्वोभव प्रतिविध्या
ध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने॥ अवस्थिरातनुहियातुजूनां जामिमजामिं प्रमृणीहिशत्रून्॥ भोभगवन्नग्ने अस्मत् विभक्तिव्यत्ययः अस्माकं
कामादीन्शत्रून् अधिविध्य अधिकंताडय अतएव दैव्यानि देवतासंबंधिसत्कर्माणि सदुपासनानि च आविष्कृणुष्व प्रकटय अतएवऊर्ध्वः
ऊर्ध्वलोकः सत्यलोकप्रभृत्यूर्ध्वलोकप्रदोभव किंचयातुजूनां यातुधानानां पुण्यलोकविरोधिनां रक्षसां स्थिराणि धनूंषि अवतनुहि
अवतीर्णमौर्वीकानि कुरु किंच जामिमालस्यादिकं परित्यज्य प्रमृणीहि विनाशय किंच अजामिं अनालस्यं यथाभवतितथा जगत्संहर्तुमु
द्युक्तान् शत्रून्प्रमृणीहि मृणु हिंसायां जामिरालस्यपीजदावित्यभिधानात् पंचानामृचामयमभिप्रायः भोभगवन्नग्ने त्रैलोक्यनाथ
मह भुक्तिं दत्वा मरणादूर्ध्वं सकुटुंबाय मह्यं मुक्तिं प्रयच्छेति॥ इतिनारायणीयोपनिषद्भाष्ये सप्तविंशोनुवाकः॥ ॥जीवनदे
तुसिंचलाभादिद्वारमुक्तिहेतुं पृथिवीदेवताकं मंत्रमाह॥ अदितिर्देवागंधर्वामनुष्याः पितरोसुरास्तेषाᳪं सर्वभूतानांमाता
मेदिनीमहत्तामहीसावित्रीगायत्रीजगत्युर्वीपृथ्वीबहुलाविश्वाभूताकतमाकायासासत्यामृतेतिवसिष्ठः॥ ॥
अदितिशब्दो खंडनेति व्युत्पत्त्या भूमिमाचष्टे॥ [illegible] अतएवनिघंटुकारेणशथि ३९

म वीनौरूपत्वं वितं। देवाद्य: पंचजाति विशेषा: अदितिरूपसेोऽपलेसर्वप्राणिदेहानामुपलक्षका: अतोऽतेषां सर्वभूतानां देहोपादानत्वादिय
मदितिर्मातृजननी मेदिनीमधुकैटभमेदसाजाता अथवा मेदिनीकठिनेत्यर्थ:। महतागुणाधिका धैर्ययुक्ता वा तच्च सर्वप्राणिकृतोपद्रव
सहिष्णुत्वेनावगंतव्यं। इकारस्थाने आकारश्छांदस:। महीपूज्या। सावित्रीसवितु: प्रेरकस्यांतर्यामिण: संबंधिनी गायत्री गायकान्
स्वोपासकान्त्रायते रक्षतीत्यर्थ:। जगती जगदाश्रयभूता उर्वी अनेकै[illegible] पृथ्वी अनेकविस्तारवती बहुला निबिडावयवा। वि
श्वा सर्वात्मिका। प्राणिदेहोत्पत्ते: पूर्वमेव विद्यमानाऽकृतमा अतिशयेन स्वरूपा काम्या सर्वप्राणिदेहरूपेण परिणता साप्रसिद्ध्या
सत्याव्यवहारदशायां बाधरहिता इत्येवं वसिष्ठो महामुनिराह। तथैवामृता मरणरहिता चतुर्युगपर्यावर्तनेप्यव्यवस्थिता इत्येवमर्थं वसि
ष्ठ एवाह अतोऽस्य मंत्रस्य वसिष्ठ ऋषिरित्यर्थ:। इत्यष्टाविंशोऽनुवाक:। दुष्यभावकृतोपद्रवपरिहारेणोपकारिणम ब्देवताकं मंत्रमा
ह। आपोवाइदं सर्वं विश्वाभूतान्याप: प्राणावाआप: पशवआपोऽन्नमापोऽमृतमाप: सम्राडापोविराडाप: स्वराडापश्छंदांसा
पो ज्योतींष्यापो यजूंष्याप: सत्यमाप: सर्वा देवता आपोभूर्भुव: सुवराप ओमिति। यदिदं जगदस्ति तत्सर्वमापो वै जलमेव। कथ
मिति प्रपंच्यते विश्वाप्कृतानि सर्वाणि प्राणिशरीराणि आप: जलरेतोरूपेण तदुत्पादकत्वात् प्राणा वै शरीरवर्तिवायवोऽप्याप: उ
दकेन प्राणानामाप्यायनात्। अतएव छंदोगा आमनंति। आपोमय: प्राणान्पिबतो विच्छेत्स्यंत इति पशवोगवादयोऽप्याप: क्षीररूपेण तत्र

परियातत्वात्। अन्नंब्रीहियवादिकमापः। जलस्यान्नहेतुत्वंप्रसिद्धं। अन्नमापः सम्यग्जायत इतिस्मृत्यात्मा हिरण्यगर्भः सम्राट् विस्पष्टं राज
त इतिब्रह्मांडदेहः पुरुषो विराडिंद्रियादिनैरपेक्ष्येण स्वयमेव राजत इत्यव्याकृताभिमानीश्वरः स्वराट् छंदांसि गायत्र्यादीनि ज्योतींषि व्या
दित्यादीनि। यजूंषि। अनियताक्षरा मंत्राः सत्यं यथार्थकथनं। सर्वदेवताः ईश्वरादयः भूर्भुवः स्व स्त्रयो लोकाः सम्राडादि लोकत्रयांता
र्थरूपेणापस्तूयंते। अतश्चापो भूतकारणं परमात्मरूपेणाप्याप्रनिपाद्याः इतिवक्तुमोंकारः पवित्रः॥ इत्येकोनत्रिंशोनुवाकः॥ माध्या
ह्निकसंध्यानुष्ठाने भिमंत्रितजलपानार्थं मंत्रमाह। आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां। पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुना
तु मां। यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनंतु मामापोसतां च प्रतिग्रहं स्वाहेति। या आपस्ताः पृथिवीं पुनंतु प्रक्षालनेन
न शोधयंतु। सा च पृथिवी पूता तादृशाद्भिः संती मामनुष्ठातारं पुनातु शोधयतु। तथा ब्रह्मणो वेदस्य पतिः पालकमाचार्यं एताः आपः पु
नंतु। तेनाचार्येणोपदिष्टं ब्रह्मस्वरूपं पूतं सत्। मां पुनातु। अन्यभुक्तावशिष्टरूपमुच्छिष्टं यदस्ति यदभोज्यं भोक्तुमयोग्यं तादृशं कदाचिन्म
या भुक्तं यद्वा दुश्चरितं अन्यदपि प्रतिषिद्धाचरणरूपं मम किंचित्संपन्नं तत्सर्वं परिहृत्येति शेषः ततो मामापः पुनंतु। तथा असतां
श्रेष्ठादीनां प्रतिग्रहं मया कृतं पुनंतु। तदर्थमिदमभिमंत्रितमुदकं स्वाहा मदीयवक्त्राग्नौ सुहुतमस्तु। इति त्रिंशोनुवा ४०
कः॥ सायं संध्याकाले जलपानार्थं मंत्रमाह। अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षंतां। यदह्ना पाप
मकार्षं। मनसा वाचा हस्ताभ्यां। पद्भ्यामुदरेण शिश्ना। अहस्तदवलुंपतु। यत्किंच दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि

जुहोमि स्वाहा। योऽस्मदग्निरस्ति यश्च मन्युः क्रोधाभिमानी देवः ये च मन्युपतयः क्रोधस्वामिनः तस्मिन्नियामका देवाः संति ते सर्वेऽपि
मन्युकृतेभ्यः मदीयकोपनिष्पादितेभ्यः पापेभ्यः रक्षंतां। पापिनं मां तत्पापविनाशनेन पालयंतु। किंचातीतेनान्हा तस्मिन्नहनि य
त्पापमकार्षं कृतवानस्मि केन साधनेन मनआदिभिः त्रिभिस्तावयवैस्तत्सर्वं पापं अहः अवलुंपतु। अहरभिमानी देवो विनाश
यतु। परहिंसादिचिंतनं मानसं पापं अनृतादिभाषणं वाचिकं। अभिचारहोमादिकं हस्तकृतं पादेन गोब्राह्मणस्पर्शादिकं। यदंह
तं अभोज्यभोजनमुदरकृतं अगम्यागमनं शिश्नकृतं। अथवा किमनेन परिमितगणनेन यत्किंचदुरितं निष्पन्नं इदं पापजा
तं सर्वं तत्कर्तारं मां च लिंगशरीररूपममृतयोनौ मरणरहिते जगत्कारणे। सत्ये बाधरहिते ज्योतिषि स्वयंप्रकाशे च ब्रह्मणि जुहो
मि प्रक्षिपामि। अहमनेन होमेन तत्सर्वं भस्मीकरोमि। तदर्थमिमं मंत्रितं जलं स्वाहा मदीयमुखाग्नौ आहुतं अस्तु॥ इत्येकत्रिंशतमो
नुवाकः॥ प्रातः संध्याकाले जलपानार्थं मंत्रमाह। सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षंतां। यद्रात्र्यापा
पमकार्षं। मनसा वाचा हस्ताभ्यां। पद्भ्यामुदरेण शिश्ना। रात्रिस्तदवलुंपतु। यत्किंच। दुरितं मयि। इदमहं माममृतयोनौ। सूर्ये ज्यो
तिषि जुहोमि स्वाहेति। सूर्यः अहर्निष्पादकः सूर्योपाधिके अन्यत्सर्वं पूर्ववद्व्याख्येयं। इति द्वात्रिंशोनुवाकः। ओमित्येकाक्षरं ब्र
ह्म। अग्निर्देवता ब्रह्म इत्यार्षं। गायत्रं छंदः परमात्मसरूपं सायुज्यं विनियोगमिति। प्राणायामादिषु सर्वत्रावश्यकस्य ओंकारस्य
प्रसंगात् ऋष्यादिकमुच्यते। ओमिति यदेकाक्षरमस्ति तद्ब्रह्म। समस्तब्रह्मांडोत्पत्तिस्थितिभंगकारणं तस्य देवतावाच्यभूतं वस्तु अ

ग्निः अग्निशब्दोत्र रूढ्या देवताविशेषवाचको न भवति अपितु योगेन परमात्मवाचकः। अगति सर्वं जगद्व्याप्नोतीत्यग्निः। अ
ग्निशब्दोपलक्षितं ब्रह्मैवेदमिति यत्तदार्षं ऋषिः मंत्रोपि। ब्रह्म ऋषिरपि। ब्रह्म देवतापि ब्रह्म सर्वं स्वयमेवेत्यर्थः। गायत्री देवी गाय
त्रीछंदः। विनियोगं विनियोगः। सायुज्यं सायुज्ये परब्रह्मप्राप्तौ। कथंविधे सायुज्ये परमात्मलक्षणे तथा सरूपं सरूपे सर्वसमान
रूपे सर्वात्मकइति यावत्। सर्वत्र व्यत्ययो बोध्यः॥ इति त्रयस्त्रिंशोनुवाकः॥ संध्यात्रय मार्जनादूर्ध्वं गायत्र्यावाहनमंत्रमाह।
आयातु वरदा देवी अक्षरं ब्रह्मसंमितं। गायत्रीं छंदसां मातेदं ब्रह्म जुषस्व मे। यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते। यद्रात्रियात्कुरुते
पापं तद्रात्रियात्प्रतिमुच्यते। सर्ववर्णे महादेवि संध्याविद्ये सरस्वति। इति। वरदा अस्मदभीष्टवरप्रदा देवी गायत्री छंदोभिमानिनी दे
वता अक्षरं विनाशरहितं संमितं सम्यग्वेदांतप्रमाणेन निश्चितं तद्ब्रह्म जगत्कारणं परं तत्वमुद्दिश्य आयातु आगच्छतु अस्माकं ब्रह्मत
त्वं बोधयितुं आगच्छत्वित्यर्थः। अयमेवार्थः उत्तरार्धेन स्पष्टीक्रियते। छंदसां गायत्री त्रिष्टुबादीनां वेदानां वा माता जननी देवता गाय
त्री गायत्री छंदोभिधया न्मे मम इदं ब्रह्म वेदांतप्रतिपाद्यतत्वं जुषस्व जोषयतु उपदेशात्विति अर्थः। किंच हे संध्याविद्ये सायंप्रातः संध्यो भ
वा संध्याविद्ये सरस्वति वद्रूक्ष रूपात् तृतीयो विद्या अनुष्ठानरूपात् त्संदुष्टौ संध्याविद्ये सरस्वति त्वद्रूक्षः। यदह्नाद्यस्मिन्नहनि पापं कु
रुते स तदह्नात् तस्मिन्नहनि तेन पापेन प्रतिमुच्यते मुच्यतां रुद्रो भूयादिति भावः। यद्रात्रियात् यस्यां रात्रौ तद्रात्रियात्तस्यां रात्रौ ५१

अन्यत्समानं। एतेछांदसाः प्रयोगाः। इतिचतुस्त्रिंशोनुवाकः। गायत्र्या आवाहन मंत्रमाह। ओजोसिसहोसिबलमसिभ्राजोसि
देवानांधामनामासिविश्वमसिविश्वायुः सर्वमसिसर्वायुरभिभुरोंगायत्रीमावाहयामिसावित्रीमावाहयामिसरस्वतीमा
वाहयामिछंदर्षीनावाहयामिश्रियमावाहयामिगायत्रियागायत्रीछंदोविश्वामित्रऋषिः सवितादेवताग्निर्मुखंब्रह्माशि
रोविष्णुर्हृदयंरुद्रःशिखापृथिवीयोनिः प्राणापानव्यानोदानसमानासप्राणाश्वेतवर्णासांख्यायनसगोत्रागायत्रीच
२४ तुर्विंशत्यक्षरात्रिपदाषट्कुक्षिः पंचशीर्षोपनयनेविनियोगइति। हेगायत्रीत्वंओजोसिबलहेतुभूताष्टमधातुभूतासिस
होसिशत्रूणामभिभवनेशक्तिरसिबलमसिशरीरगतव्यवहारसामर्थ्यरूपासि। भ्राजोसिदीप्तिरूपासिदेवानामग्न्यादी
नांधामतेजोयदस्तितन्नामासितद्देवत्वंनामेत्यर्थः। देवानांनामासि इत्यर्थः। विश्वंसर्वंजगद्रूपत्वमेवासिविश्वायुःसंपू
र्णायुःस्वरूपासिउक्तस्येवव्याख्यानंसर्वमसिसर्वायुरिति अभिभूःसर्वस्यपापस्यतिरस्कारहेतुः। ॐ प्रणवप्रतिपाद्यप
रमात्मासिताद्रशीगायत्रीमदीयमनस्येवावाहयामि अन्यत्स्पष्टं। गायत्र्या आवाहनानंतरं प्राणायामार्थंमंत्रमाह। ॐ
भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ओंतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि। धियोयोनःप्रचोदयात्।
ॐ मापोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोमिति। भूरादिसत्यांतलोकप्रतिपादिकाःसप्तव्याहृतयःतेषांचलोकानांप्रणवे

ना॰ उ॰ भा॰ प्रतिपाद्यब्रह्मस्वरूपत्वविवक्षयात्तद्देशोपचारेण वरेण्यं तत्सवितुरित्यादिको गायत्रीमंत्रः तत्प्रतिपाद्यस्य ब्रह्मतत्त्वविवक्षयात्
४२ द्दारोपंशो वा आरणमंत्रस्य चायमर्थः । सवितुः प्रेरकस्यांतर्यामिणो देवस्य वरेण्यं वरणीयं श्रेष्ठं तद्भर्गः तेजो धीमहि ध्या
यामः सविता परमेश्वरः नोऽस्माकं धियो बुद्धिवृत्तीः प्रचोदयात् प्रकर्षेण तत्त्वबोधे प्रेरयति तस्य तेजो ध्यायेमेति
पूर्वेणान्वयः । आपो ज्योतिरित्यादिगायत्र्याः शिरोमंत्रः तस्यायमर्थः प्रणवहूसंपूर्ववदुच्चार्यते या आपो नदीसमुद्रा
दिगताः संति यच्च ज्योतिरादित्यादिकमस्ति यो रसो मधुराम्लादिः षड्विधोस्ति तदप्यमृतं देवैः पीतमस्ति त
त्सर्वं प्रणवप्रतिपाद्यं ब्रह्म भूर्भुवः स्वरोमिति पूर्ववद्व्याख्येयं । अस्य मंत्रस्य प्राणायामांगत्वं मन्वंतनादोपनिब
द्भिरुच्यते । सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते इति । इति पंच
प्र त्रिंशोनुवाकः । जपादूर्ध्वं गायत्री विसर्जनमंत्रमाह । उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योभ्य
नुज्ञाता गच्छ देवि यथासुखमिति । भूम्यामवस्थितो यः पर्वतो मेरुनामकः तस्य मूर्धनि उपरिभागे यदुत्तमं शि ४२
खरं पुराणेषु प्रसिद्धं तदुपलक्षितं यथादित्यमंडलमस्ति हे देवि गायत्रि तत्र गच्छ कदा जाते त्वदुपासनात्मके सं
ध्याख्ये कर्मणि समाप्ते सति कीदृशी त्वं ब्राह्मणेभ्यः ब्राह्मणैः विभक्तिव्यत्ययः तदुपासकैः अभ्यनुज्ञाता अभिमु

स्येन अंजलिकरणपूर्वकं अनुज्ञाता गंतव्यमिति कथं यथास्मरणं यथेदं । स्तुता मया वरदा वेदमाता प्रचोदयंती पवने द्विजाता ।
आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रजातुं ब्रह्मलोकं इति । पूर्वस्मिन्मंत्रे अपरोक्षतया कोर्थो स्मिन्मंत्रे परोक्षत
या स्पष्टीक्रियते । अत्रेदं वैदिकं रहस्यं । ब्रह्मलोकः आदित्यमंडलं यो भर्गमपि गायत्र्या स्थाने विकल्पेनान्यतरत् इति केचि
द्वाचक्षते ॥ तएवास्माभिः पूर्वस्मिन्मंत्रे उक्तमप्यादित्यमंडलं गायत्री निवासत्वेन मत्वाध्याहृत्य व्याख्यानं । एतस्मिन्स्तु मं
त्रे स्वयमेव भगवत्या गायत्र्याः वसतित्वेन ब्रह्मलोकं ब्रवीति । तथा नेत्थं व्याख्या । तत्र भवति भगवती गायत्री ब्रह्मलो
कं ब्रह्मणो भारतीपतेर्लोकं प्रयात्विति वाक्यशेषः । कीदृशं ब्रह्मलोकं । अमलादिभ्यो धामनेभ्यः भूरादिभ्यऊर्ध्वे तने
भ्यः समस्तेभ्यो लोकेभ्यः प्रकृष्टत्वेन जातं परमात्मनः सकाशादुत्पन्नं इति । प्रजातुमितिप्रयोगश्छांदसः ॥ किं कृत्वाद
त्वा किं किं आयुः शताब्दात्मकमुपजीवनं पुनर्द्रविणं स्ववर्णमणियुक्तं पुनः ब्रह्मवर्चसं स्वाध्यायाध्ययनतदर्थविचारत
दर्थानुष्ठानैः जनितं मुखस्थं तेजः यत्तद्ब्रह्मवालोका आचक्षते । देदीप्यमानो यं साक्षाज्ज्वलन्निव पावक इति कस्मै मह्यं
कथंभूताय पृथिव्यां विद्यमानाय । कथंभूता गायत्री द्विजाता द्विजातिभिस्त्रैवर्णिकैरुपास्यमाना । यद्वा द्वयोः सूर्यमंड
लब्रह्मलोकयोर्जाता प्रादुर्भूता जनेप्रादुर्भावे अस्मान्निष्ठाप्रत्ययः । पुनः कथंभूता प्रचोदयंती अंतर्यामिरूपेण प्राणिमात्रस्य प्रेरयि

ना॰उ॰भा॰ श्रीअन्नलुप्तोपमावादामंपवते व्यत्ययेन पवनः। यथाप्राणवायुश्च्युर्विधमाप्यिजालंप्रेरयति इत स्ततोगमनागमनादिकं का
४३ रयति तथेति तल्पदे वेदमाताचतुर्णां वेदानां जननीवरा न्स्वोपासके भ्यो वांछितार्थान्ददा ति इति वरदा। कथंभूता सतीमयोपस
केन स्तुता। अक्षरलघ्वहरणाद्यत्ययेन स्तुतासतीत्यर्थः। इति षट्त्रिंशोनुवाकः॥ पूर्वोक्तोपासनास्वसमर्थस्यादित्यदेवताविष
यं जप्यं मन्त्रमाह। घृणिः सूर्य आदित्योनप्रभावात्सक्षरं। मधुक्षरंति सिद्धं सं। सत्यं वै तद्रसमापोज्योती रसोमृतं ब्रह्म
भूर्भुवः स्वरोम् इति। भगवानादित्यो वाति वै हयसेन मार्गेण हरिर्वं गच्छति लोकानुपकर्तुं। किंविधः जगत्प्रसवहेतुत्वात्सू
र्यः दीप्तिमत्वात् घृणिः क्षरराहित्येन नित्यत्वादक्षरमक्षरः केवप्रभानकारउपनार्थः। आदित्यसंधिनीप्रभेव आदित्यस्योप
मानांतराभावात्स्वप्रभा गोलकी भूत्स व्योममार्गेण गच्छती त्येवमथातथाप्रभावानयमित्यभूतार्थमुपमानं। अपिचतद्र
स तस्मात्सूर्योकादित्याज्जन्मांतरसमुदकं मधुमधुरं यथातथाक्षरं ति नद्यो वहंति आदित्यलब्धवृष्ट्युदकमेव नद्योवहंति अन्य
था भूमावुदकाभावइति भावः उत्तरार्धे आदित्यब्रह्मणः सर्वात्मकत्वमुच्यते तदादित्यलक्षणं ब्रह्म। सत्यं यथार्थभावयं
रसं मधुरादिरसजातं। आपः सिंधुनद्यादिगतमुदकं ज्योतिश्चंद्राग्न्यादिरसः पदार्थमात्रसारः अमृतं स्वधाब्रह्म त्रयी
विद्या भूर्भुवः स्वः त्रयो लोकाः ओंकारः वै एतत्सर्वं आदित्य एवेति मनसा विभावयेदिति [illegible] भावः। इति सप्त ४२

त्रिंशोऽनुवाकः ।। अथ ज्ञान प्रतिबंधक ब्रह्महत्यादि पापनिवृत्तिहेतवस्त्रिसुपर्ण नामका मंत्रा उच्यंते । तत्र प्रथमं मंत्रमाह । ब्रह्म
मेतु मां । मधुमेतु मां । ब्रह्ममेव मधुमेतु मां । यास्ते सोम प्रजा वत्सोऽभि सो अहं । दुष्वप्नहं दुरुष्वह । यास्ते सोम प्राणाꣳ स्तां जुहो
मीति । ब्रह्मपरं तत्त्वं मां मेतु प्राप्नोतु मधुपरमानंद माधुर्योपेतं वस्तु मामेतु प्राप्नोतु । तदेव पुनः प्रार्थ्यते । मधुरं ब्रह्ममेव मामेतु नतत्
त्यत् क्षुद्र देवतादिकमिति भावः । हे सोम उमासहित ब्रह्मविद्यालया सह वर्तमान परमात्मन् तव याः प्रजाः देवमनुष्यादयः संति ता अभिलक्ष्य
सोऽहं तादृशास्तु सेवकोऽहं वत्सो बालकः । एतासां त्वदीय प्रजानां मध्ये बालक वदत्वं त्वदीयकरुणायोग्यः अतो हे दुःस्वप्नह दु
संसाररूपस्य दुःस्वप्नस्य घातक परमेश्वर दुरुष्वहदुः स्वहं भव विनाशायेत्यर्थः । हे सोम परमात्मन् । या ते त्वदीयाः प्राणा यास्त्व
न्निर्मितत्वात्त्वदीयाः अतस्त्वय्येव उपसंहरामि विषयेभ्यः । इंद्रियाणि निरुध्य त्वय्येकचित्तो भवामीत्यर्थः । उक्तस्य त्रिसुपर्णमं
त्रस्य महात्म्यं ब्राह्मण रूप पाठ दर्शयति । त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा एते घ्नंति । ये ब्राह्मणास्त्रिसुपर्णं पठं
ति । ते सोमं प्राप्नुवंति । आसहस्रात्पंक्तिं पुनंतीति । ओमिति विद्यांतरात्मिनाएषः कस्यचित् ब्रूयादिति शास्त्रमनुसृत्य शिष्येण याञ्
यां कृतायां पश्चादुपदिशंति । इमं त्रिसुपर्णमंत्रं शिष्ययाचमानेनरेण्यो ब्राह्मणायोपदिशेत् । तेनोपदेशेन ब्राह्मणाः त्रिसुपर्णं पठंति
सर्वदा त्रिसुपर्णमंत्रं पठंति ये ते पुरुषा ब्रह्महत्यां विनाशयंति ते सोमं प्राप्नुवंति ये ते आपंक्तावर्तंति । तां पंक्तिं सहस्रपर्यंतं पुनंति शुद्धां

कुर्वंति तस्मादयं प्रणवप्रतिपाद्यः परमात्मैव त्रिसुपर्णमंत्रस्य देवतेत्यर्थः। इत्यष्टत्रिंशत्तमोनुवाकः॥ द्वितीयं त्रिसुपर्णमाह। ब्रह्ममे
धया॥ मधुमेधया। ब्रह्ममेव मधुमेधया। अद्यानो देव सवितः प्रजावत्सावीः सौभगं। परादुःष्वप्नियं सुव। विश्वानि देव सवि
तर्दुरितानि परासुव। यद्भद्रं तन्म आसुव। मधुवाता ऋतायते मधुक्षरंति सिंधवः। माध्वीर्नः संत्वोषधीः। मधुनक्तमुतोषसि
मधुमत्पार्थिवं रजः। मधुद्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवंतु नः इति। यद्ब्रह्म सर्वजगत्का
रणं सर्ववेदांतवेद्यं तत्। मेधया गुरूपदिष्टमहावाक्यतदर्थधारणशक्त्या लभ्यतामिति शेषः। मधुमेधयेत्यादि पूर्ववत्। हे सवितः प्रेरक
देव अद्य अस्मिन्दिने नोऽस्माकं विद्यार्थिनां। प्रजावच्छिष्यप्रशिष्यादि संपन्नं सौभगं आचार्यरूपं भाग्यं सावीः प्रेरय प्रयच्छेत्यर्थः
दुःष्वप्नियं दुःस्वप्नादुत्पन्नं स्वप्नसदृशं द्वैतप्रतिभासं परासुव निराकुरु। अपि हे सवितः प्रेरक देव दुरितानि ज्ञानप्रतिबंधकानि पापा
नि विश्वानि परासुव निराकुरु। भद्रं कल्याणं असंभावनाविपरीतभावनारहितं तत्त्वज्ञानं यदस्ति तन्मम तत्त्वमुपासकाय आसुव सा
कल्येन प्रयच्छ। वाताः वायवः मधु माधुर्योपलक्षितं सुखं यथा भवति तथा वांत्विति शेषः। प्रबलेन तु वायो रोगोत्पत्त्या तत्त्वज्ञानविघ्नः
संपद्यते ऋतः समाभूत इति वा योतानुकूल्यं प्राप्स्यते। एवमुत्तरत्रापि तत्तदानुकूल्यं द्रष्टव्यं सिंधवो नद्यः मधुक्षरंति मधुरमारोग्य
करमुदकं संपादयंतु इत्यर्थः। ओषधीः व्रीहियवादयोपि नोऽस्माकं माध्वीः मधुराः पथ्यरूपाः संतु नक्तं रात्रौ उतापि च। उषसि प्रभाते दिवसे ४४

पिपिपासार्थिनो मधुमधुरमनुकूलं करवमस्तु । कालतो विप्रोमा भूदित्यर्थः । पार्थिवं रजः । पृथिव्यामवस्थितं ग्रामनगरादिस्थानगतं रजोऽपि मधु
मन्माधुर्योपेतं कण्टकपाषाणादिरहितत्वेनानुकूलमस्तु । नोऽस्माकं पिता पितृसमा द्यौरपि मधुरस्तु । अतिवृष्ट्यादिप्रातिकूल्यरहितास्तु । द्यौः पि-
ता पृथिवी मातेति मन्त्रान्तराद्द्यौः पितृत्वं वनस्पतिरपि चूतपनसादिर्नोऽस्माकं मधुरफलोत्पत्त्या जीवनहेतुरस्तु सूर्य अस्तु तं संतापं कृत्वा
मधुमान्माधुर्येणानुकूल्यं वर्ततां प्रकाशेन युक्तोऽस्तु । गावोऽपि नोऽस्मान्प्रति माध्वीः जीवनहेतुमधुरक्षीरोपेता भवन्तु । अस्य त्रिसु-
पर्णमन्त्रस्य महिमानं दर्शयति । य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति
ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओमिति । ब्राह्मणगर्भस्य राजगर्भस्य वा हननं भ्रूणहत्या । अन्यत्पूर्ववत् । इत्यूनच-
त्वारिंशत्तमोऽनुवाकः । तृतीयं त्रिसुपर्णमाह । ब्रह्ममेधवा । ब्रह्ममेव मधुमेधवा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो
मृगाणां । श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन् । हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दु-
रोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदिति । मेधवा मेधो यज्ञः सोऽस्यास्तीति मेधवान् । यज्ञदाना-
दिसाध्ये विविदिषापूर्वकत्वात् । ब्रह्मज्ञाने[illegible]स्य ब्रह्ममेधवदित्युच्यते । ब्रह्मा देवानां हꣳसः शुचिषदित्यणोरणीयानित्यस्मिन्ननुवाके
व्याख्याते । ऋचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः । अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमीति । त्रयः सुपर्णाः पक्षस्था

मधुमेधवा ॥१

नीमाः ब्रह्मविष्णुमहेश्वरा विश्वतैजसप्राज्ञा वा विराट् हिरण्यगर्भेश्वरा वा यस्मादुत्पन्नास्स त्रिसुपर्णाः सर्वदेवतासमष्टिः परमात्मम्
हिमप्रतिपादकत्वादयं ग्रंथोपि त्रिसुपर्णशब्देनोपचर्यते। तथाचायमर्थः हे भगवन् ऋचे ऋग्वेदरूपाय त्वा व्यत्ययेन तुभ्यमित्यं
संमितः अग्नौ निक्षिप्य तदिति शेषः। त्वा त्वामुद्दिश्य ऋचे आकुतिफली भूत उपलक्षित त्रयीप्राप्य र्थंइयं व्याख्या किं चा
ग्नौ मयान्वाहुताः घृतस्य धाराः त्वां प्रति स्रवंति। कांइव सरितो न यद्वत् कुथेभूताः धाराः। धोपंते पीयंते देवैरिति धेनाः धेटपा
ने यमानाः केन साधनेन किं विधेन अंतर्हृदा हृत्कोशपं क्तिनः अंतरंगपूर्वकं कुतत्वोत्पवित्राः अन्यथात्वपवित्रा भवंतीति भावः
किं चैवं विधा आज्यधारा अभिचाकशीमि समस्ताभ्यो देवताभ्यो दास्यामीति भावः। हिरण्ययो वेतसो मध्य आसां। तस्मिन्सुपर्णो
मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः। तस्यासते हरयः सप्ततीरे स्वधां दुहाना अमृतस्य धारा मिति आसां पूर्वोक्ताज्यधाराणां
मध्ये मध्यभागे तस्मिन्नाहवनीये सुपर्ण आस्ते। किं कुर्वन् सर्वाभ्यो देवताभ्यो मधु मधुरं हविर्भजन् विभजन् विभज्य ददानः सन् क
थंभूतः त्रिसुपर्णः हिरण्ययो ज्योतिर्मयः वेतसः वर्यन्यस्य येन वेतस्वान् वज्रद्रव्यवान् मधु मधुरं स्वर्गादिसुखं करोतीति मधुकृ
त्सर्वं प्राणिहृदानीडं भयत्वेन कुलायी एवं विधस्य परमात्मनः तीरे परतः प्रदेशेषु सप्त ऋषयः आसते कथं भूताः हरंति पापानि स्म
रणमात्रेणेति हरयः। तथा अमृतस्य धारा स्वधा आराध्यमाणा स्वधा हव्यकव्यपरंपरां दुहानः तत्तद्देवेभ्यः पूरयमाणाः। एवं विधर्षि ५८

मंडलमध्यासीनो भगवानिति यावत् । अस्मिन्त्रिसुपर्णे वसिष्ठपदव्याख्यानं पूर्ववत् । अस्य त्रिसुपर्णमंत्रस्य महिमानं दर्शयति । य इदं
त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । वीरहत्यां वा एते घ्नंति । ये ब्राह्मणास्त्रिसुपर्णं पठंति ते सोमं प्राप्नुवंति । आसहस्रात्पंक्तिं पुनंति ।
ॐमिति । वेदशास्त्रसंपन्न तदर्थानुष्ठानपरो ब्राह्मणोऽभिषिक्तो वा राजा वा वीरः अन्यत्सर्वं पूर्ववत् ॥ इति चत्वारिंशोनुवाकः । ब्रह्मज्ञान
प्रतिबंधकानि महापातकानि तन्निवृत्तये जप्यास्त्रिसुपर्णमंत्रास्त्रयोभिहिताः । तत्र ब्राह्मणजातीयमात्रवधो ब्रह्महत्या पंचसु महापातके
षु मध्ये प्रबलं महापातकं ततोप्यधिकं भ्रूणहननं तस्मादप्यधिकं वीरहननं ईदृशानामपि निवर्तको यावज्जीवं त्रिसुपर्णजपः तत्रावांची
मि नानां सुरापानादीनां वर्तक इति किमु वक्तव्यमस्ति प्रतिबंधकनिवृत्त्युपायमुक्त्वा जीवात्मन ईश्वरेणाभेदज्ञानं यदस्ति तस्य ज्ञानस्य नैरंतर्ये
प्रसाधनं मेधादीनां अतो मेधाभिधानिनीं देवतां प्रार्थयितुमेकामृचमाह । मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना ।
त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीरा इति । ग्रंथतदर्थयोर्धारणशक्तिर्मेधा देवी जुषमाणा सती नोऽस्मान्प्रत्यागच्छतु की
दृशी देवी विश्वमंचतीति विश्वाची सर्वावगाहनसमेत्यर्थः । अतएव भद्रा कल्याणी सुमनस्यमाना शोभनं मनोऽस्मदनुग्रहार्थं इच्छंती
हे देवि त्वया जुष्टा अनुगृहीता वयं दुरुक्तान्पुरुषार्थानुपयोगिनो वेदबाह्यान्नुदमानाः क्षिपमाणोऽस्तदव्यां त्से वमाना वैदिकनिष्ठाः सु
वीराः शोभनपुत्रशिष्यादिभिरुपेताः । विदथे यज्ञेऽनुष्ठिते सति कृतार्थाः करणाभूत्वा बृहद्वदेम परब्रह्मतत्त्वं तथयाम । द्वितीयामृचमाह
त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विंदते वसु सा नो जुषस्व द्रविणो न मेधे इति । हे देवि मेधे आरंभेत्व

ना॰ उ॰ भा॰ याजुष्टः सेवितोनुगृहीत ऋषिरतीतानागतदर्शी भवति तथा त्वया जुष्टः पुरुषोऽसौ हिरण्यगर्भो भवति उतापि च त्वया जुष्टः पुरुषः गतश्रीः धनसंप
४६ न्नो भवति अत एव त्वया जुष्टः पुरुषः चित्रं गवाश्वहिरण्यधान्यादिकं वसु धनं विंदते लभते हे मेधे देवि सततादरी त्वं नो अस्माद् द्रविणोनः द्रविणपति
रिव द्रविणदात्रेन तत्पतिर्लक्ष्मी तेजस्वस्व सेवस्व अनुगृहाणेत्यर्थः। यथा धनपतिरनुगृहीतो दरिद्रः कृतो भवति तद्वत्त्वयानुगृहीतोऽहमिति भावः। इति चतु
र्थोऽनुवाकः॥ मेधाप्रदानिंद्रादीन्प्रार्थयितुं मंत्रांतरमाह। मेधां म इंद्रो ददातु मेधां देवी सरस्वती। मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजाविति। योऽयमिंद्रो
या च सरस्वती देवी यौ च पुष्करस्रजौ पद्ममालायुक्तावुभावश्विनौ देवौ ते सर्वे मह्यं मेधां प्रयच्छंतु। मेधाप्रदं मंत्रांतरमाह। अप्सरासु च या मेधा गं
धर्वेषु च यन्मनः। दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहेति। अप्सरोरूपदेवस्त्रीषु या मेधा प्रसिद्धा वर्तते। गंधर्वेषु देवगायकेषु य
न्मनो मेधात्मकमस्ति चकारद्वयं परस्परसमुच्चयार्थं दैवी प्रत्ययेन। दैवी हिरण्यगर्भादिदेवतास्थिता या मेधा वर्तते सरस्वती वेदशास्त्ररूपा
यास्ति सा सर्वा मेधा सुरभिः शोभनगंधा सर्वकामदुघा वा भूत्वा मां जुषतां सेवतां। तस्यै देव्यै स्वाहा स्वीयावाक्स्तु इतिमाह। इत्येकचत्वारिंशः
पुनरपि मेधार्थं मंत्रमाह। आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका
जुषंतामिति। मेधा शक्तिर्मां प्रति आ समंतादागच्छत्विति शेषः। तादृशी मेधा सुरभिः शोभनगंधा कामदुघा वा विश्वरूपा सकलवेदशास्त्र
धारणसमर्थत्वेन बहुरूपा। हिरण्यवर्णा देवताशरीरे हिरण्यसमानवर्णा जगती सर्वत्र वर्तमानत्वेन जगदात्मिका जगम्या पुरुषार्थकामैर् ४६
गंतुं योग्या ऊर्जस्वती बलवती पयसा क्षीरादिरसेन पिन्वमाना स्मान्प्रीणयंती सा तथाविधगुणयुक्ता मेधा सुप्रतीका सुमुखी भूत्वा मां जु
षतां व्यत्ययः। सेवतां॥ इति द्विचत्वारिंशत्तमोऽनुवाकः। पुनरपि मेधादिसिद्धये अग्नींद्रसूर्यान्प्रार्थयते। मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधा

दधातु मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधात्विति। मेधां वेदशास्त्रादिग्रंथग्रहणधारणपटुत्वं प्र
जामपत्यसंततिं। तेजो ब्रह्मवर्चसं अग्निर्मयि दधातु। इंद्रियं दधातु। श्यादिराहित्येन वीर्यं पुष्टिं भ्राजः दर्शनमात्रेण शत्रुसाध्वसकरं मु
खतेजः निगदव्याख्यातमन्यत् आदरातिशयद्योतिका मयि पदाद्यावृत्तिः॥ इतिं चत्वारिंशोनुवाकः। अपेतु मृत्युरमृतं न आगन्वैवस्व त्रि
तो नो अभयं कृणोतु। पर्णं वनस्पतेरिवाभि नः शीयतां रयिः सचतां नः शचीपतिरिति। अनया च परमात्मनः सकाशात्स्वाभीष्टं याचते।
हे परमात्मन् मृत्युरस्मत्तः अपेतु दूरीभूयात्। अतएव नोऽस्मान् अमृतं मोक्ष आगन् आगच्छतु अतएव वैवस्वतो यमो नोऽस्मभ्यं अभयं
नरकदुःखाभावं कृणोतु करोतु। अपि च नः अस्मदीयं पापं वनस्पतेर्वृक्षस्यादेः पक्वपर्णमिव अभिशीर्यतां। अभितः शीर्यनश्यतु
अपि च नोऽस्मान् रयिः महदैश्वर्यं सचतां भजतु रयिः कीदृशः शचीपतिः शचीपतिः इंद्रोपभोग्य इत्यर्थः। इति चतुश्चत्वारिंशो
नुवाकः। परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरानिति। हे मृत्यो देव
यानादर्चिरादिमार्गात् पितृयाणो मार्गो यः इतरः अन्यः ते न च स्वः स्वभूतः पंथाः अस्ति तं पंथां पंथानं अनु अनुसृत्य परेहि गच्छ न
तु देवयानपितृयाणमार्गौ प्रति आगच्छ अहं त्वेतान्यां अन्यतरेण वा गमिष्यामि न त्वां इत्थं त्वन्मार्गे त्वं तिष्ठेत्यभिप्रायः। कीदृशं परं
पूर्वोक्तमार्गद्वयादन्यं उत अपि च नोऽस्माकं प्रजां मा रीरिषः मा हिंसय वीरान् अस्मानपि मा रीरिषः न त्वहं अंधो बधिरश्च कथं प्रार्थयमा
नं त्वामवलोकये कथं वा नत्प्रार्थनां शृणोमीत्यत आह। चक्षुष्मते शृण्वते श्रोत्रवते तेतुभ्यं ब्रवीमि इति अतो मामवलोकय मत्प्रा
र्थना सफलेति भावः॥ इति पंचचत्वारिंशोनुवाकः॥ वाते प्राणं मनसान्वारभामहे प्रजापतिं यो भुवनस्य गोपाः। स नो मृत्योस्त्रा

वा॰उ॰भा॰ ४७

यतो पात्वं॰हसो ज्योग्जीवा जरामशीमहि इति। वयं तं प्रजापतिं परमात्मानं मनसांतरंगेणान्वारभामहे। कथंभूतं प्रजापतिं प्राणं सम
स्तपिंडांडस्थप्राणापानादिरूपं वातमंतरिक्षस्थवायुरूपं एतेन पिंडांड ब्रह्मांडोभयविधारकत्वं प्रजापतेरुक्तं भवति तं कं यः प्रजापतिः
भुवनस्यगोपाः भुवनस्य ब्रह्मांडस्य गोपाः रक्षकः प्रजापतिर्नोऽस्मान्मंहसः सकाशात्त्रायतां अंहसः पापाच्च पातु किंच ज्योग्जी
वाभिरंजीविनः संतो वयं वार्धकावस्थां अशीमहि प्राप्नुमः पूर्णपुरुषायुषा भवेमेत्यर्थः। इति षट्चत्वारिंशः॥ अमुत्रभूयाद
धेय यमस्य बृहस्पते अभिशस्तेरमुंचः। प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिरिति। बृहतां वेदवाचां पतिः पा
लकः बृहस्पतिः तत्संबुद्धौ हे बृहस्पते परमात्मन् यमस्य संबंधि यद्भयं तस्मान्मामुमुंचः मोचय अभिशस्तेरपयशसोपि मामुमुंचः एत
द्भयान्मां। च्यावयित्वाऽथानंतरं अमुत्रभवेन परलोकभवेन सुखेन मां संयोजयेति शेषः॥ किंचाश्विनाऽश्विनौ देववैद्यौ अस्मान्मृ
तः सकाशात् मृत्युं प्रत्यौहतां दूरीकुर्वतां। हे अग्ने देवानां संबंधि नाभिषजा वैद्यभूतेन त्वयाहं रक्षणीयोस्मि इति शेषः। शचीभिः
इंद्रपत्नीभिः संयोजयेस्यपि शेषः। हविर्नयनद्वारा देवतातृप्तिकारकत्वादग्ने भिषक् त्वं द्रष्टव्यं। इति सप्तचत्वारिंशोनुवाकः॥
हरिं॰हरंतमनुयंति देवा विश्वस्येशानं वृषभं मतीनां। ब्रह्मसरूपमनुमेदमागादयनं मा विवधीर्विक्रमस्वेति हे परमात्मन् त्वां
सर्वदेवा अनुयांति भक्तस्वभावेनानुसरंति। त्वां कथंभूतं हरिं विष्णुरूपं हरंतं विश्वस्य जगतः ईशानं मतीनां सर्वप्राणिबुद्धीनां वृषभं श्रेष्ठं त्वेनाति ४७
यंतारं

पुण्यापुण्ययोः सर्वप्राणिबुद्धिप्रेरक इति यावत् ॥ तदुक्तं धियो यो नः प्रचोदयादिति ॥ किंच तदनुग्रहात् ॥
ब्रह्मवेदचतुष्टयं ॥ मामां ॥ अन्वागाद् अनुगच्छतु ॥ कथंभूतं ब्रह्म ॥ समानानि प्रयच्छद्वादिवैषम्यरहितं
निरूपाधिप्रकृतिप्रत्ययादीनि यस्य तत्स्वरूपं ॥ पुनः कथंभूतं इदं सर्वैर्ब्रह्मवर्णिकैः प्रत्यक्षत्वेनाधी
यमानं ॥ किंच ॥ अयनमस्माभिः संपादितं मोक्षमार्गं ॥ मा विवधीः मा हिंसय ॥ किंतु दातुं विक्रमस्व परा
क्रमं कुरु दातुमुद्यमं कुर्वित्यर्थः ॥ ॥ इत्यष्टाचत्वारिंशः ॥ ॥ त्वाल्कैरग्निमिंधान उभौ लोकौ सने
महं ॥ उभयोर्लोकयोर्ऋद्ध्वाति मृत्युं तराम्यहं इति ॥ हे भगवन् ॥ त्वाल्कैः समिद्रूपैः रूक्षकाष्ठैः ॥ अ
ग्निमाहवनीयादिकं ॥ इंधानो दीपयन् ॥ अहं ॥ उभौ लोकौ इहपरलक्षणौ ॥ सनेम प्राप्नुयां त्वदनुग्रहा
त् ॥ एतेन लोकद्वयं सत्कर्मणा फलतीत्युक्तं भवति ॥ अत एवोभयोर्लोकयोः इहामुत्र च ॥ ऋद्ध्वा ऋ
द्धिल ब्ध्वा ॥ मृत्युं ॥ अतितरामि अमृतो भवामि ॥ यावदायुरैहिकामुष्मिकान् भोगान् भुक्त्वा अंते

ना·उ·भा· देवोभवामीत्यभिप्रायः॥ ॥इत्येकोनपंचाशतमोनुवाकः॥ ॥माछिदोमृत्योमावधीर्मामेबलं
४९ विवृहोमाप्रमोषीः॥प्रजांमामेरीरिषआयुरुग्रनृचक्षसंत्वाहविषाविधेमइति॥हेमृत्यो॥
हेउग्रक्रूर॥त्वमस्मत्सहुधिंमाछिदोमाविछेदय॥अस्मत्सत्कर्मानुष्ठानंमावधीःमाहिंस
य॥मेमम॥शारीरंबलंमाविवृहःमापीडय॥अस्मदीयपरलोकसाधनंमाप्रमोषीःमाचोरय॥
मेप्रजामायुश्चमारीरिषःमाहिंसय॥एतदर्थं॥त्वात्वां॥हविषाहविःप्रदानैः॥विधेमपरि
चरेम॥त्वांकथंभूतं॥नृन्प्राणिनश्चेष्टंपुण्यपापपरीक्षायैपश्यतीतिनृचक्षास्तंनृचक्षसं॥ ॥
॥ ॥इतिपंचाशतमोनुवाकः॥ ॥मानोमहांतमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं॥
मानोवधीःपितरंमोतमातरंप्रियामानस्तनुवोरुद्ररीरिषइति॥ ॥हेरुद्रदुष्टरोदनकर्त्तः॥अ

स्माकं गुरुप्रभृतिपूज्यवर्गं ॥ मा वधीः मा हिंसीः ॥ वधबंधन उक्षितं योनिष्का सिक्तं गर्भस्थं पिंडं मातरं मा वधीः ॥
उत त्वा द्वा अपि पर्याया उक्तानुक्तसमुच्चयद्योतिनः ॥ किंच ॥ हे वृषभवाहन ॥ प्रियाः अभिलषिताः ॥ नस्तनुवः
तनूः ॥ मा रीरिषः रिष हिंसायां अस्माद्घङ्मध्यमपुरुषैकवचनं ॥ सर्वेनस्मानस्मदीयांश्च सुखयेति भावः
॥ ॥इति पंचाशत्तमोनुवाकः॥ ॥मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ॥ वीरा
न्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते इति ॥ ॥हे महारुद्र ॥ तोकं अर्भकं ॥ तनयं तरुणंपुत्रं ॥
आयुर्जीवनं ॥ गाः अश्वान्वीरानेतदुपलक्षितं अस्मदीयं सर्वस्वं ॥ मा रीरिषः रिष हिंसायां मा हिंसीः ॥ त्वं क
थंभूतः सन् भामितः अस्मदपराधैः कारितक्रोधः तदर्थं हविष्मंतो यथाविधिनिष्पादितहविर्युक्तजुहूहस्ता
वयं ॥ नमसा प्रणामेन ॥ ते तव ॥ इज्यां विधेम कुर्याम ॥ ॥इत्येकपंचाशोनुवाकः॥ ॥प्रजापते न त्वदेतान्य
न्यो विश्वा जातानि परिता बभूव ॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां इति ॥ ॥हे प्र

जापते ब्रह्मन् पार्वतीवल्लभ ॥ त्वत्त्वत्तः ॥ जातानि उत्पन्नानि ॥ विश्वा विश्वानि ॥ समस्तानि तानि प्रसि
ध्दानि ॥ एतान्युपलभ्यमानानि स्फुरन्नरतिर्यगादिलक्षणानि पंचभूतानि चतुर्दशभुवनानि नानाविधब्र स्मर
ह्मांडपिंडानि ॥ त्वत्तो न्यो यः कश्चिन्न परिबभूव परिपूर्वो भवतिर्नमस्कारार्थः ॥ नोपसंजहारेति यावत् ॥
औपलक्षण्येन न संजीवयति तस्मात्पितुः सृष्टिकाले त्वमेव सृजसि जीवनकाले त्वमेव जीवयसि प्रलये
त्वमेवोपसंहरसि नान्यः कश्चिदित्यभिप्रायः ॥ यस्मादेवं तस्मात्तेन शिव जगदुत्पत्तिस्थितिलयकर्त्रे भग
वते तुभ्यं ॥ जुहुमः श्रौतस्मार्तानुष्ठानोपयोगि हविस्त्यागं कुर्मः ॥ अत एव यस्मिन्कामो येषामस्माकं ते वयं य
त्कामा ऐहिकामुष्मिकोपभोग्येयद्वा वयं जुहुमः ॥ तद्वांछितं वस्तु नो अस्मभ्यमस्तु श्रौतस्मार्तहोमफलत्वेन सिध्य
तु किंच तव पांगालोके पतितानां वयं रयीणां विद्याविनयसंपदां इहपरोपभोगभोग्यसंपदां च पतयः ॥ अधिपतयः स्या ४९

म॥ अयमेवमंत्रो ब्राह्मणभोजनादौ पार्वतीपतिप्रीतिकृत उदकान्नदाने विनियुज्यते॥ तस्मिन्पक्षे जुहुमः॥ ब्राह्म
णमुखादौ मिष्टान्नरूपहव्यत्यागरूपं होमं कुर्म इति व्याख्येयं॥ अन्यत्सर्वं एतदनुकूलत्वेन व्याख्यायतामिति
दिक्॥ ॥इति त्रिपंचाशोऽनुवाकः॥ ॥स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृषेंद्रः पुर एतु नः स्वस्तिदा
अभयंकरः इति॥ ॥इतस्ततो गच्छतां॥ नोऽस्माकं॥ पुरः पुरस्तादुपलक्षण्येन प्रागपाक् प्रत्यगुदगूर्ध्वाधो दि
क्षु परिपालनाय॥ इंद्रः एतु आगच्छतु॥ सर्वतो दिक्षु वज्रहस्तेन पालिता वयं निर्भयाः स्याम इति भावः॥ इंद्रः
कीदृक्॥ स्वस्तिदाः भूलोकसुखकृत्॥ पुनः स्वस्तिदाः आमुष्मिकसुखकृत्॥ विशो नानाविधप्रजायाः पतिः प्र
भुः॥ वृत्रहा स्फीतं विमृधः रक्षोजंतिमथनकर्ता॥ वशी त्रैलोक्यवशीकरणवान्॥ वृषा प्रावृषि उदकैः सेचकः॥ न
अभयंकरः॥ स्वाश्रितानां॥ ॥इति चतुःपंचाशोऽनुवाकः॥ ॥त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुक
मिव बंधनान्मृत्योर्मुक्षीय मामृतात् इति॥ ॥हे भगवन्पार्वतीपते॥ त्वां यजामहे॥ त्वां कीदृशं॥ त्र्यंबकं त्रिने

ना॰ उ॰ भा॰

५०

त्रे॥ सुगंधिं केतक्यादिसौगंध्यं यथा दूरादाघ्रायते तथा मदीयं दिव्यं देहसौरभ्यं सोयं सुगंधिः॥ सुपूर्वकलादृर्ध्यं नाव्द
स्यैकारः॥ पुनः कीदृशं॥ पुष्टिवर्धनं पुष्टिं लौकिकवैदिकपुष्टिं वर्धयतीति तथोक्तं॥ हे भगवन् त्वां संध्यावंदना
दिसत्कर्मभिः इष्ट्वा॥ यथा उर्वारुकं कर्कट्यादेः फलं फलितं सद्वंधनाद्दनायासेन मुच्यते॥ तथा वयं॥ मृत्योः
सकाशात्॥ मुक्षीय मुक्षीमहि मुक्ता भवेम॥ व्यत्ययो बहुलमिति वचनव्यत्ययः॥ अमृतान्मोक्षात्॥ मामुक्षी
महि न वियुज्यामहे॥ ॥ इति पंचपंचाशोनुवाकः॥ ॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हंतवे॥ तान् य
ज्ञस्य मायया सर्वानव यजामहे॥ इति॥ ॥ हे मृत्यो॥ मर्त्याय व्यत्ययेन प्राणिमात्रं॥ हंतवे हंतुं॥ सहस्रं अयु

राम

५०

तं एतत्संख्याकाः ये तव पाशाः संति॥ तान्सर्वान्पाशान्॥ वयं अवयजामहे निवारयामः॥ अवोपसर्गयोगेन
यजते र्भिन्नार्थतोच्यते॥ केन साधनेन यज्ञस्य सत्कर्मोऽनुष्ठानस्य॥ मायया मिषेण छद्मना पुनर्जन्मछद्मना

अ

पेतकमर्णोपाकरोतीत्याद्विदर्थ प्रयोगोद्रष्टव्यः॥ यद्वा॥ यज्ञस्य सत्कर्मानुष्ठानस्य॥ मायया ज्ञास्त्याबलेन माया

शावरः शक्तिपर्यायः॥ ॥इतिषट्पंचाशोनुवाकः॥ ॥अथेदानीं पापमात्रनिबर्हणार्था मंत्रा उच्यंते॥ तादृग्लिं
गप्रतीतेर्यो नानाविधपातकवान्पापनिबर्हणकामवांश्च तेन स्वगृह्योक्तविधिना भूसंस्काराद्याज्यसंस्कारां पंच
तं कर्मकृत्वा एतैर्वक्ष्यमाणमंत्रैः प्रधानाहुतयः कर्तव्याः स्विष्टकृदाज्येनान्यत्समानं॥ ॥मृत्यवे स्वाहा मृत्य
वे स्वाहा इति॥ ॥अस्यायमर्थः॥ येन म्रियंते प्राणिनः स मृत्युस्तस्मै स्वाहा सकृद्गृहीतमिदमाज्यं स्वाहुतम
स्तु॥ आहुतिद्वयद्योतनार्थो मंत्राभ्यावृत्तिः॥ इदमाहुतिद्वयं मृत्युदैवत्यं॥ ॥इतिसप्तपंचाशोनुवाकः॥ ॥
देवकृतस्यैनसोवयजनमसि स्वाहा॥ मनुष्यकृतस्यैनसोवयजनमसि स्वाहा॥ पितृकृतस्यैनसोवयजनम
सि स्वाहा॥ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा॥ अन्यकृतस्यैनसोवयजनमसि स्वाहा॥ अस्मत्कृतस्यै
नसोवयजनमसि स्वाहा॥ यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा॥ यत्स्वपंतश्च जाग्रतश्चैनश्चकृम
तस्यावयजनमसि स्वाहा॥ यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा॥ यद्विद्वांसश्चाविद्वां

सम्यैनश्चकृमतस्यावयजनमसिस्वाहा॥ एनसएनसोवयजनमसिस्वाहा इति॥ ॥प्राक्तनेष्वेकादशसुमंत्रेषु
हविर्गृहीतदेवतायाअप्रतीतेरग्निर्देवतात्वेनांगीकर्तव्यः॥सर्वदेवताप्रधानत्वादग्नेः॥तत्रक्रमेणपट्ट विधुरवेदव
देवेपिविनियुक्तास्तथाचायमर्थः॥हेआज्यत्वमेव॥एनसः पापस्य॥अवयजनंवारकमसि॥अवपूर्वोयज
तिर्निवारणार्थः॥सर्वत्रतदर्थमिदमाज्यं॥अग्नयेस्वाहासुहुतमस्तु॥यद्वा॥हेअग्नेत्वमेनसोवयजनंनिवार
कोसि॥लिंगव्यत्ययः॥तदर्थमिदमाज्यं॥तुभ्यंस्वाहासुहुतमस्तु॥एवमुत्तरत्रापिवाक्यार्थः॥एनसःकथं
तस्य॥देवायकृतंदेवकृतंतस्यदेवकृतस्यदेवेषुकर्मसुअंगवैकल्यादिरूपस्येत्यर्थः॥देवैर्द्योतनशीलैरस्मदि
द्रियैःकृतस्येतिवा॥ ॥मनुष्यार्थकृतंतस्याधिक्कारान्नप्रधानाद्यभावरूपस्य॥ ॥पितृकृतस्यपैतृकेषुकर्म
स्वंगवैकल्यादिरूपस्य॥ ॥आत्मकृतस्यस्वयंकृतस्यागम्यागमनादेः॥ ॥अन्यकृतस्यास्मद्भार्याकृतस्य॥
अस्मत्कृतस्यज्ञातिवर्गकृतस्य॥ ॥किंच॥दिवानक्तंरात्रिंदिवं॥यदेनः॥चकृमकृतवंतः॥तस्य॥ ॥यत्स्वपंतः

स्वप्नावस्थामनुभवंतो॥ जाग्रतो जागरूकाश्च॥ यदेनो नानाविधं पापं॥ चकृम कृतवंतः॥ तस्य॥ ॥सुषुप्तः
व्यत्ययेन सुषुप्ताः सुषुप्त्यवस्थामनुभवंतः संतो॥ यदेनश्चकृम॥ तस्य॥ जाग्रदवस्थायां पापबाहुल्यस्यसं
भावितत्वान्मंत्रद्वये जाग्रच्छब्दप्रयोगः॥ सुषुप्त्यवस्थायामपि किंचित् सूक्ष्मतरं पापं द्रष्टव्यं॥ ॥विद्वां
सो विद्वांसश्च॥ वयं॥ एनश्चकृम॥ तस्य ज्ञानाज्ञानकृतस्येत्यर्थः॥ ॥एनेसः उपपातकादेरप्यधिकं॥
यदेनो महापातकादि तस्य॥ यद्वा॥ एनसः विनोलोपश्छांदसः॥ एनस्विनः पुरुषात्सकाशात् यदेनो जातं त
स्य तत्संसर्गजं तु पंचम इति शास्त्रसिद्धस्य महापापस्येत्यर्थः॥ ॥इति नवपंचाशोनुवाकः॥ ॥यद्वो दे
वाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेडनं॥ अरावा यो नो अभिदुच्छुनायते तस्मिन् तदेनो वसवो नि
धेतन स्वाहा इति॥ ॥गुरु गंभीरं मनो येषां ते गुरुमनसः हे गुरुमनसः॥ सर्वे देवा वो युष्मानुद्दिश्य॥ यद्देवहे
डनं देवविडंबनं अयमधिकोयं न्यून इत्यादि देवगर्हणं॥ जिह्वया वाचा॥ वयं चकृम॥ तदेनः॥ यूयं तस्मिन्पूर्वो

ना॰उ॰भा॰ क्तेगंभीरे युष्मदीयमनसि॥ निधेतन स्वार्थे तनपुस्थापयत न तु वाचोच्चाटयत अस्मदपराधं सहध्वमिति
५२ हे यावन्तः॥ देवं हेडनं किंदृक्षं॥ प्रयुतसंख्यास्तीति प्रयुति॥ दीर्घश्छांदसः॥ असंख्याकमित्यर्थः॥ वाशब्दो
अ निश्चये॥ गुरुमनस इति वयमित्यस्य विशेषणं वा॥ गुरुषु जगत्पूज्येषु देवेषु भक्तियुक्तं मनो येषां ते गु
रुमनसः न गुरुमनसः अगुरुमनसः एवं विधाः संतो वयं॥ यद्देवहेडनं चकृम अगुरुमनस्त्वाद्देवहेडनप्र
सक्तिः॥ किंच हे वायो सखमस्य प्रधान॥ हे वसवः उपवायवः॥ प्राणा वै वसव इति श्रुत्यंतरात्॥ नो स्मत्संबं
धि॥ यदेनः॥ अभिदुच्छुनायते अभितो दुष्टकृन्नवदाचरंति॥ तदेनस्तस्मिन्नित्यादि पुनर्योजनीयं।
किल दुष्टकृन्नवदपवित्रं॥ कथंभूतमेनः॥ अराव्यत्ययेन अरं रमणनिवर्तकं तदर्थमिदमाज्यलिंगोक्तदे राम
वताभ्यः स्वाहाकृतमस्तु॥ ॥इत्येकोनषष्ठानुवाकः॥ ॥कामोकार्षीन्नमो नमः॥ कामोकार्षी ५२
त्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामः कारयिता नाहं कारयिता एष ते काम कामाय स्वाहा॥

ति॥ ॥ हे त्रयस्त्रिंशत्कोटिदेवताः॥ युष्मभ्यं नमो नमः॥ पूर्वोक्तानि पापानि॥ कामः मकरध्वजः॥ अकार्षीत्
स्वकारात् कामो कार्षीदिति पुनरुक्तिः स्वकर्तृकत्वनिवृत्त्यै कामएव करोति नाहं करोमि॥ कामएव कर्ता
न नाहं कर्ता॥ अत्र हेतुरुच्यते॥ कामएव सर्वाणि जन्मानि वशीकृत्य कारयिता भवति॥ नाहं कारयिता
अस्मात् त्र्यान्मनुष्यामां॥ हे काम तत्पापनिवृत्त्यर्थं ते तुभ्यं एवं आज्यभागः स्वाहा॥ सुहुतोस्तु॥ हा
कथं भूताय तुभ्यं॥ कामाय कमनीयाय अभिषिक्त हाय॥ ॥ इति षष्ठ्यनुवाकः ॥ ॥ मन्युरकार्षीन्
मो नमः॥ मन्युरकार्षीत् मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः कारयिता नाहं का
रयिता एषते मन्या मन्यवे स्वाहा इति॥ ॥ मन्युः क्रोधाभिमानी देवः॥ मन्यवे क्रोधस्वरूपाय॥ अ
न्यत्सर्वं पूर्ववत्॥ अत्र मीमांसा॥ कारयितुरेव पापं न कर्तुरनिच्छतः॥ यदि स्वयमपीच्छत्यन्योपि कारयति॥

ना.उ.भा. तर्ह्युभयोरपि पापलेपः यदि कारयिता शास्त्रानधिकृतः कर्ता च नेच्छति तर्ह्युभयोरपि पापलेपः॥ यथा
५३ कश्चिद्यवनो निरुद्धं तमपि किंचित्पापं अकारयत्॥ न तु बलात्कारितपापस्यापि धर्मशास्त्रेषु प्रायश्चित्तं
त श्रूयते इति चेन्न॥ स्वयंकृतप्रायश्चित्तमपेक्ष्य बलात्कारितपापस्याल्पत्वात्॥ किं त्वाभ्यां मंत्राभ्यां पु
रुषो हस्तमुद्धृत्य [illegible]रोदिति काममन्युर्बलात्पापमकारयतो निरुद्धं तमपि किं करोमि कर्त्ताभ्यां त्रायते
प मामिति तस्माद्रोदनैश्चात्तापाद्विज्ञादेवमवगम्यते कारयितुरेव पापं न कर्तुरिति॥ ॥इत्येकषष्ठ्यनु
वाकः॥ ॥अतः परं सर्वपापनिर्बर्हणार्थाः॥ सर्वोत्कृष्टचतुर्थाश्रमकरणाङ्गभूते विरजाख्यहोमकर्म
णि विनियुक्ता मंत्राः पठ्यन्ते॥ तादृग्लिंगप्रतिभानात्॥ सर्वपापनिर्बर्हणद्वारा संन्यासं करिष्यमाणो य
थाशास्त्रोक्ताधिकारी स्वगृह्योक्तविधिना पंचभूसंस्काराद्याज्यसंस्कारान्तं कर्म कृत्वा एतैर्वक्ष्यमाण
मंत्रैः प्रधानाहुतीः कुर्यात्॥ स्विष्टकृताद्यन्यत्समानं॥ सर्वत्र हविर्ग्राहिणी देवता तु परमात्मैव॥ मंत्राणां ५२

अयमर्थः॥ ॥तिलान्जुहोमिसरसाꣳसपिष्टान्गंधारममचित्तेरमंतुस्वाहाइति॥ ॥गंधउत्तम
देहसौरभ्यमस्यास्तीतिगंधारःतत्संबुद्धौहेगंधारहेपरमात्मन्॥त्वदर्थंतिलान्जुहोमि॥कथंभूता
न्॥सरसान्नतुशुष्कान्॥सपिष्टान्सत्कादिपिष्टांतलेशसहितान्॥किंचेतत्सोमफलत्वेनत्वदीयाः
परमपावनगुणाः॥ममचित्तेरमंतुरमंतांस्वाहाइदंप्रहुतंहविस्त्वामुद्दिश्यस्वाहासत्कृतमस्तु॥एवमे
वस्वाहाशब्दार्थमुत्तरत्रापि॥ ॥गावोहिरण्यंधनमन्नपानꣳसर्वेषाꣳश्रियैस्वाहाइति॥ ॥हेपरमा
त्मन्त्वत्प्रसादात्॥गावोहिरण्यंधनमन्नपानंएतानिममसिध्यंतु॥किंचसर्वेषांभोग्यपदार्थानांप्रा
प्तिरस्तु॥किंच॥श्रियेगजांतलक्ष्मीसिध्यर्थंहविरिदंतुभ्यंस्वाहा॥ ॥श्रियंचलक्ष्मिंचपुष्टिंचकीर्तिं
चानृण्यतां॥ब्रह्मण्यंबहुपुत्रतां॥श्रद्धामेधेप्रजाःसंददातुस्वाहाइति॥ ॥श्रियंराज्यं॥लक्ष्मिंमोक्षल
क्ष्मींशरीरादेः॥कीर्तिंत्रैलोक्यविदितकल्याणगुणावलिं॥आनृण्यंदेवर्षिपितृऋणत्रयमुक्तत्वं॥ब्रह्म

ना·उ·भा· ण्यंसर्वं आत्मणोत्तमत्वं ॥ वङ्कुपुत्रतां ॥ अश्वमेधे ॥ गुरुवेदांतवाक्यविश्वासवेदज्ञानस्यार्थग्रहणधार
५८ णपटुत्वे ॥ उत प्रजा दुहित्राद्याः ॥ भगवान्परमात्मा महां संस्यग्ददातु ॥ ॥ इति चतुःषष्ठ्यनुवाकः ॥ ॥
तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः ॥ तिलाः पुनंतु मे पापं यत्किंचिद्दुरितं मयि स्वाहा इ
ति ॥ ॥ हे परमात्मन् ॥ त्वदाज्ञया यत्किंचिद्दुरितं तत्सापदूरीकृत्य ॥ मेमा ॥ तिलाः पुनंतु ॥ वरर्थमिदं
हविस्तुभ्यं स्वाहा ॥ तिलाः कथंभूताः ॥ केचित्कृष्णाः केचित् श्वेताः ते उभयविधाः सर्वेपि ॥ सौम्याः रोगाद्यु
पद्रवपराः ॥ वशानु गाः ॥ अस्मद्वशवर्तिनः स्वधर्मोपार्जितद्रव्यं दत्वा विक्रीय आनीताः ॥ न त्वनुचौ
सन चौर्यादिना आनीता इत्यर्थः ॥ अचेतनानां तिलानां पापनाशनसामर्थ्यं त्वदाज्ञयेति भावः ॥ ॥ चो राम
रस्यान्नेन वष्यास्थं ब्रह्महा गुरुतल्पगः ॥ गोस्तेयं सुरापानं भ्रूणहत्या तिला शांतिं शमयंतु स्वाहा ५८
इति ॥ ॥ हे परमात्मन् त्वदाज्ञया तिलाः ॥ एतेन ॥ मंत्रोक्तानां पापानां ॥ शांतिं विनाशं ॥ शमयंतु कुर्वंतु ॥

तदर्थमिदं हविस्तेभ्यः स्वाहा ॥ नवश्रास्यं एकोद्दिष्टाय न्न भोजनं ॥ ऊर्णौर्भकः गर्भः शिशुः वीरो वा ॥ स्पष्टम
न्यत् ॥ ॥ श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चानृण्यतां ॥ ब्रह्मण्यं बहुपुत्रतां ॥ श्रद्धा मे धेम्र तानु जा
तवेदः संददातु स्वाहा इति ॥ ॥ हे जातवेदः सर्वस्य वेदसा धनस्य वा उत्पादक हे परमात्मन् ॥ नू
सर्वं भवान्मह्यं सम्यक् ददातु ॥ किं तत् ॥ श्रीश्चेत्यादि पदार्था व्याख्याताः ॥ प्रतीकुशाग्रबुद्ध
त्वे ॥ तुरेवार्थी ॥ चः समुच्चये ॥ ॥ प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा
विपाप्मा भूयासं स्वाहा इति ॥ ॥ प्राणादयः पंच वायवः प्रसिद्धाः ते सर्वे पिंडे नान्य ही
मे नमे शुध्यंता भवंतु ॥ ज्योतिरहं विपाप्मा प्रतिबंधरूपपापरहितः ॥ पापकारणीभूत रजोगुणेन ना
पि रहितः सन् ज्योतिर्लिंगत्कारणं परब्रह्मास्मि तद्भूयास्तं ॥ भूयासं तदर्थमिदमाज्यं जुहोमस्तु ॥ ॥

इत्यष्टाषष्ठ्यनुवाकः ॥ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिः संकल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वा
हेति । वागादीनींद्रियाणि रेतो गुह्येंद्रियं मनःशब्दवाच्यस्यैवांतःकरणस्य निश्चयात्मिकांतःकरणवृत्तिर्बुद्धिः । अनिश्चयरूपा
वृत्तिराकूतिः । इदं समीचीनं इदमसमीचीनमिति कल्पनावृत्तिः संकल्पः अन्यत्पूर्ववत् । इत्येकोनसप्तत्यनुवाकः । त्वक्चर्ममां
सरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहेति । अत्र स्थूलशरीरगतानां सप्तधा
तूनां शुद्धिरुच्यते एकस्यैव धातोर्बाह्यांतरभागविवक्षया त्वक्चर्मशब्दौ प्रयुक्तौ अन्यत्पूर्ववत् । इति सप्तत्यनुवाकः । शिरःपा
णिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहेति । अत्रापि स्थूलश
रीरावयवानां शिरःपाण्यादीनां शुद्धिरुच्यते लिंगभेदविवक्षया शिश्नोपस्थशब्दौ द्वौ दृष्टव्यौ । अन्यत्पूर्ववत् । इत्येकसप्तत्य
नुवाकः । उत्तिष्ठ पुरुष हरित पिंगल लोहिताक्षि देहि देहि ददापयिता मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहेति । शु
द्धिहेतुत्वेनात्र सर्वकर्मनिष्पादकलिंगशरीरोपाधिक आर्थ्यते । पुरुषपुरि शरीरे शयान हे परमात्मन्नुत्तिष्ठ औदासीन्यं परि
त्यज्य मदनुग्रहार्थमुद्युक्तो भव समुत्थितपुरुषस्यैव हरितादीनि त्रीणि पदानि विशेषणानि । हे हरित प्रतिबंधहरणकुशल

हे पिंगललोहिताक्षि रक्तनयन ॥ देहि देहि पुनः पुनः इत्यर्थिंमे प्रयच्छ ॥ इदापयिता आचार्यमुखात् ॥ त
त्वविज्ञानस्यातिशयेन दापयिता भवे... ति शेषः ॥ तस्य दापयितुर्ज्ञानस्योत्पत्तये ॥ मेमदीयाश्चि
त्तवृत्तयः ॥ ज्योतिरहमित्यादि पूर्ववत् ॥ ॥ इति द्विसप्तत्यनुवाकः ॥ ॥ पृथिव्यापस्तेजोवायुराका
शामेशुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा इति ॥ ॥ शरीरस्योपादानकारणानिपृ
थिव्यादीनि ॥ पूर्ववदन्यत् ॥ ॥ इति त्रिसप्तत्यनुवाकः ॥ ॥ शब्दस्पर्शरूपरसगंधामेशुध्यंतां ज्यो
तिरहं विरजा विपाप्मा भूयासं स्वाहा इति ॥ ॥ शरीरोपादानपंचमहाभूतेष्वाकाशादिषु वर्तमा
नगुणाः शब्दादयः ॥ पूर्ववदन्यत् ॥ ॥ इति चतुःसप्तत्यनुवाकः ॥ ॥ मनोवाक्कायकर्माणिमेशुध्यंतां
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा इति ॥ ॥ मनोवाक्कायकर्माणि त्रीणि ॥ अन्यत्पूर्ववत् ॥
॥ ॥ पंचसप्तत्यनुवाकः ॥ ॥ अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा इति ॥

ना॰ उ॰ भा॰ हे परमात्मन् त्वत्प्रसादात् ॥ अहंकारेर्ष्यादर्पगर्वैर्विमुक्तो भूयासं ॥ कथंभूतैः ॥ अव्यक्तभावैः लोकानांनि
५६ कटे अप्रकटिताभिप्रायैः ॥ पूर्ववदन्यत् ॥ ॥ षट्सप्तत्यनुवाकः ॥ ॥ आत्मा मे शुध्यंतां ज्योतिरहं वि
रजा विपाप्मा भूयासं स्वाहा इति ॥ ॥ मे आत्मा शुध्यंतां [redacted] शुद्धो भवत्वित्यभिप्रायः ॥ पाठात्से
वेत्र बहुवचनप्रयोगश्छांदसः ॥ ॥ सप्तसप्तत्यनुवाकः ॥ ॥ अंतरात्मा मे शुध्यंतां ज्योतिरहं
विरजा विपाप्मा भूयासं स्वाहा इति ॥ ॥ अंतरात्मा अंतःकरणं ॥ अन्यत्पूर्ववत् ॥ ॥ अष्टसप्तत्य
नुवाकः ॥ ॥ परमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा इति ॥ ॥ परमात्मा
निखिलजगत्प्रभुः ॥ अन्यत्पूर्ववत् ॥ ननु परमात्मनो नित्यशुद्धत्वात्कथं शुद्धिरुच्यते इति चे राम
न्न ॥ अविद्यादोषवशेन परमात्मनोऽप्रतिभानं अशुद्धिरुच्यते ॥ स्वात्मनेन प्रतिभानं शुद्धिरिति ५६
विशेषांगीकारात् ॥ ॥ इत्येकोनाशीत्यनुवाकः ॥ ॥ क्षुधे स्वाहा इति ॥ १० ॥ क्षुधिस्थानदेवतायै स्वा

हा ॥ एतदादिवक्ष्यमाणपंचमंत्रेषु लिंगोक्तदेवता हविर्भुजः ॥ ॥क्षुत्पिपासामायस्वाहा इति ॥ ॥ए
तदधिष्ठानदेवताभ्यः स्वाहा ॥ ॥विविट्यै स्वाहा इति ॥ ॥विष्लृ व्याप्तौ इति धातोरुत्पन्नोयं शब्दः ॥
विशेषेण विष्टिर्व्याप्तिः यस्य ब्रह्मणस्तद्विविट्टिः ॥ छांदसः षकारस्य टकारः ॥ तादृशाय ब्रह्मणे हव्यं
स्वाहाकृतमस्तु ॥ ॥कषोत्काय स्वाहा इति ॥ ॥कष करणधातुः कष्यते क्रियते इति कषो
नाम रूपकर्मात्मकः कार्यः प्रपंचः तस्मिन्नुत्कः उपकर्तुमुत्सुकः कषोत्कः परमेश्वरः तादृशाय
सृष्ट्युत्सुकाय परमेश्वराय ॥ स्वाहा ॥ ॥क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहं ॥
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानं स्वाहा इति ॥ ॥परमा० सन्नहे त्वमसा
दात्क्षुत्पिपासामलं लक्ष्म्या ज्येष्ठा अग्रजां अलक्ष्मीः अलक्ष्मीं अभूतिं अनैश्वर्यं । असमृद्धिं
धनधान्यादिसमृद्ध्यभावं एतान्सर्वान्नाशयामि ॥ किंच त्वं मे मदीयं पाप्मानं निर्णुद नाशय ॥ तद

र्थं स्वाहा तुभ्यं स्वाहुतमस्तु॥ ॥अन्नमय प्राणमय मनोमय विज्ञानमय मानंदमय मात्मा मे शुध्यं
तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा इति॥ ॥अन्नमयादयः पंचकोशा वारुण्यां उ
पनिषदि उक्ताः पूर्ववदन्यत्॥ ॥इतः परं वैश्वदेवकर्मणि विनियुक्ताः षट् होममंत्रा व्याख्या
यंते॥ ॥अग्नये स्वाहा॥ विश्वेभ्यो देवेभ्यः स्वाहा॥ ध्रुवाय भूमाय स्वाहा॥ ध्रुवक्षितये स्वाहा॥
अच्युतक्षितये स्वाहा॥ अग्नये स्विष्टकृते स्वाहा इति॥ ॥अग्निर्विश्वेदेवाः प्रसिद्धाः॥ ध्रुवः
स्थिरः अविनाशी॥ भूमः यो वै भूमा तत्सुखमिति श्रुत्युक्तः॥ ध्रुवं क्षितिरेव स्थितिर्यस्य सोयं
ध्रुवक्षितिः॥ देवजनाः देवानां भृत्यवर्गाः रक्षांसि च तादृशाः॥ एतौ देवविशेषौ॥ कदाचित्प्रमादा
दालस्यादिना दुष्टमपि कर्म स्विष्टं करोतीति स्विष्टकृत् तद्विशेषणोप्यग्निः प्रसिद्धः॥ एताभ्यां ५८

देवताभ्यः प्रकृतमन्त्रादिहविः स्वाहाकृतमस्तु॥ ॥इतः परं बलिहरणकर्मणि विनियु
क्तामंत्रा व्याख्यायंते॥ ॥धर्माय स्वाहा॥ अधर्माय स्वाहा॥ अद्भ्यः स्वाहा॥ ओषधिवनस्प
तिभ्यः स्वाहा॥ रक्षोदेवजनेभ्यः स्वाहा॥ गृह्याभ्यः स्वाहा॥ अवसानेभ्यः स्वाहा॥ अवसा
नपतिभ्यः स्वाहा॥ सर्वभूतेभ्यः स्वाहा॥ कामाय स्वाहा॥ अंतरिक्षाय स्वाहा॥ इति॥ ॥ध
र्माधर्मौ वा ओषधिवनस्पति देवताः प्रसिद्धाः॥ रक्षांसि देवजनाश्च रक्षोदेवजनाः॥ देवानां भृत्यव
र्गा रक्षांसि च ता इत्यर्थः॥ गृहे विद्यमाना गृह्याः कुलदेवताः॥ गृहप्रांतदेशे वर्तमाना देवा अवसा
नशब्देनोच्यंते॥ सर्वभूतशब्देन पंचभूतानि भूतविशेषा वा उच्यंते॥ कामः प्रसिद्धः त्रिलोक्या
मोहकोरतिपतिः॥ अंतरिक्षशब्देनांतरिक्षलोकस्थवायुर्लक्ष्यते॥ द्वितीयांतरिक्षशब्देन मध्य
लोकाधिष्ठानदेवता कथ्यते॥ ॥यदेजति जगति यच्च चेष्टति नाम्नो भागोयन्नाम्ने स्वाहा॥ य

ना·उ·भा·
५८

थिव्यैस्वाहा॥अंतरिक्षायस्वाहा॥दिवेस्वाहा॥सूर्यायस्वाहा॥चंद्रमसेस्वाहा॥नक्षत्रेभ्यःस्वा
हा॥इंद्रायस्वाहा॥बृहस्पतयेस्वाहा॥प्रजापतयेस्वाहा॥ब्रह्मणेस्वाहा॥स्वधापितृभ्यःस्वा
हा॥नमोरुद्रायपशुपतयेस्वाहा॥देवेभ्यःस्वाहा॥पितृभ्यःस्वधास्तु॥भूतेभ्योनमः॥मनु
ष्येभ्योहंता॥प्रजापतयेस्वाहा॥परमेष्ठिनेस्वाहाइति॥ ॥वैदिकशब्द आरोशीवाचकेनना
मशब्देनतद्विधःपरमात्मालक्ष्यते॥तथाचायमर्थः॥जगतिब्रह्मांडे॥यद्वृक्षादिरूपंएजति
वायव्वादिनिमित्तेनकंपते॥यच्चमनुष्यादिचेष्टतिगमनादिचेष्टांकरोति॥ओपलक्षण्येनपर्व
तादिकमपिगृह्यते॥अयंसर्वोपिपदार्थसमूहः॥नाम्नःपरमात्मनोभोगोभक्षणयोग्यः॥प्रलयका राम
लेसर्वस्यजगतस्तेनोपसंह्रियमाणत्वात्॥सिद्धांतेचास्यैवपरमात्मनःनिखिलजगदुत्पत्तिस्थि ५८

तिलंयकृर्ल्ते लांगीकारात् ॥ तथा च तस्मै नाम्ने जगत्संहर्त्रे परमात्मने स्वाहा बलिहरणरूपमिदं
हविः भूमौ दत्तमस्तु ॥ अंतरिक्षं द्यावापृथिव्यौ च प्रसिद्ध्ये ॥ सूर्यचंद्रनक्षत्रेंद्र बृहस्पतयः प्र
सिद्धाः ॥ प्रजापतिब्रह्माणौ विराट् हिरण्यगर्भौ ॥ अग्निष्वात्तादिपितृभ्यः स्वधा इदमन्नं ब भ्यः
लीहरणकर्माहं दत्तमस्तु स्वाहा चास्तु ॥ भागांतरद्योतनार्थं मंत्रांतरं ॥ रुद्राय पापिनो रोदनका
रयित्रे नमोस्तु ॥ कथंभूताय पशुपतये ब्रह्मादिस्थावरांताधिपतये स्वाहा चेदमन्नं दत्तम[illegible] च
स्तु ॥ इंद्रादिभ्यो देवेभ्यः स्वाहा ॥ पितृभ्यः अग्निष्वात्तादिभ्यः स्वपितृभ्यो वा [illegible] स्वधा अस्तु ॥
भूतेभ्यो देवविशेषेभ्यो नमः स्वाहा नाम्नोप्यनुषंजनीयोन्नदानसिद्ध्ये ॥ यद्वा ॥ नमःशब्द एव
भूतानामन्नदानवाचकोदृश्यः ॥ मनुष्येभ्यो हंताइदमन्नं दत्तमस्तु ॥ स्वाहास्वधानमोहंतकारै
श्चतुर्भिर्निपातैः देवपितृभूतमनुष्याणां अन्नं दातव्यं ॥ एतच्छब्दोच्चारणपूर्वकं हि तेषामन्नदानेभ

पा·उ·भा· यसील सि:॥प्रियोक्तिपूर्वकमिव ब्राह्मणभोजनेन ब्राह्मणानां प्रजापतये स्वाहा भागांतरद्योतनार्थं
मंत्रांतरं॥ परमेष्ठी चतुर्मुखो ब्रह्मा॥ ॥यथा कूपः शतधारः सहस्रधारो अक्षितः॥ एवा मे अ
५९ ह स्तु धान्यं सहस्रधारमक्षितं॥ धनधान्ये स्वाहा इति॥ ॥यथा येन प्रकारेण॥ कूपः उदकाधार
विशेषः॥ शतधारः सहस्रधारः अनेकोदकधारोपेतः॥ कुधारक ग्रहणे [illegible] प्यपेक्षितो अक्ष
य्यश्च भवति॥ एवा एवं॥ मह्यं परमात्मनः प्रसादात्॥ धान्यमपेक्षितमक्षय्यमस्तु॥ सहस्र
धाने ऽकुकुसूलादिपूर्णं प्रस्थादिपरं परायुक्तं च भूयात्तदर्थमिदं स्वाहा सुहुतमस्तु॥ कस्मै ध
नानि द्धाति पोषयति भक्तानामिति धनधानि: काचिद्देवता तस्यै॥ ॥ये भूताः प्रचरंति दिवा
नक्तं बलिमिच्छंतो वितुदस्य प्रेष्याः॥ तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्द ५९

धातुस्वाहेति॥ तेभ्योबलिं हरामि भूमौनिक्षिपामि॥ पुष्टिकामःसन्नहं॥ अतएव॥ पुष्टिपतिर्धनधा
न्यादिपोषाणामधिपतिर्भगवान्मयिपुष्टिं धनधान्यादिपोषं॥ दधातुस्थापयतु॥ तदर्थमिदमन्नंस्वाहा
भूमौक्षिप्तमस्तु॥ तेभ्यः॥ येभूताग्रहविशेषाः॥ आहारमिच्छंतःसंतोदिवानक्तंप्रचरंति॥ भूताः
कथंविधाः॥ प्रेष्याः प्रेषणीयाभृत्याइतियावत्॥ कस्य॥ विशेषेणतुदतिपापिनःप्राणिनःपीड
यतीतिवितुदः श्मशानवासीभगवान्कालाग्निरुद्रःतस्यवितुदस्य॥ ॥इतिअष्टषष्ठ्नुवाकः॥
॥ ॥ओंतद्ब्रह्म॥ ओंतद्वायुः॥ ओंतदात्मा॥ ओंतत्सत्यं॥ ओंतत्सर्वं॥ ओंतत्पुरोर्नमः॥ अंतश्चर
तिभूतेषुगुहायांविश्वमूर्तिषु॥ त्वंयज्ञ[stain]त्वंवषट्कारस्त्वमिंद्रस्त्वंरुद्रस्त्वंविष्णुस्त्वंब्रह्मत्वंप्रजापतिः॥
त्वंतदापआपोज्योतीरसोमृतंब्रह्म[stain]भूर्भुवःस्वरोमिति॥ ॥जपमात्रेणपापक्षयार्थोयंमंत्रः॥ त
द्ब्रह्मतदेवंवस्तु॥ ब्रह्मातिबृहत्वात्॥ देवोवायुःदेवात्माजीवोपि॥ तदेवसत्यमवितथं॥ किंबहुना॥ तदे
ते ते

ना·उ·भा· वमवैचराचरं जगत्॥ तदेवपुरो विस्तीर्णस्य ब्रह्मांडस्य कारणं यतः तस्मै नमोस्तु॥ किंच एवंविधं यद्ब्रह्म॥
६० तद्विश्वमूर्तिषु नानाविधशरीरेषु॥ प्राणिगुहायां मे तत्हृदयपुंडरीकमध्ये॥ चरति वर्तते॥ एवं परोक्षे
ण सर्वात्मकत्वमुक्त्वा॥ इदानीमपरोक्षेण परमात्मनः सर्वात्मकत्वं दर्शयति॥ हे भगवन् त्वं यज्ञः नानावि
धक्रतुरूपः॥ त्वमेव वषट्कारः देवान्नदायकशब्दविशेषः॥ ओपलक्षण्येन त्वमेव स्वाहा स्वधा हंतका
राश्चादित्यस्त्वमेवेंद्ररुद्रविष्णुब्रह्मरूपः त्वमेव प्रजापतिः विराट् त्वमेव तत्प्रसिद्धं ब्रह्मांडं त्वमेव॥
आपो नद्यादिगतास्त्वमेव आपः पारावारगतास्त्वमेव॥ ज्योतिः सूर्याग्न्यादि त्वमेव॥ रसो मधुरादि
स्त्वमेव॥ अमृतं सुधा त्वमेव॥ ब्रह्म वेदरूपं त्वमेव॥ भूर्भुवः स्वस्त्रैलोक्यं त्वमेव॥ ओंकारः शब्द राम
ब्रह्म॥ ॥इति अष्टषष्ठुनुवाकः॥ ॥अथ प्राणाहुतिमंत्रान् दर्शयति॥ ॥श्रद्धायां प्राणे निविष्टो ६०

मृतं जुहोमि ॥ श्रद्धायामपाने निविष्टोमृतं जुहोमि ॥ श्रद्धायां व्याने निविष्टोमृतं जुहोमि ॥ श्रद्धा
यामुदाने निविष्टोमृतं जुहोमि ॥ श्रद्धायाꣳ समाने निविष्टोमृतं जुहोमि ॥ ब्रह्मणिम आत्मा
मृतत्वायइति ॥ ॥ वैदिककर्मणि विन्वासातिन्नायः श्रद्धातस्यांसत्यां ॥ पंचसुशरीरगत
वायुभेदेषुमध्ये प्रथमं प्राणनामकेवायौ निविष्टः आदरयुक्तः ॥ अहं ॥ अमृतं स्वादुभूतं ॥
इदं हविर्जुहोमि प्रक्षिपामि ॥ एवमपानादिषु योज्यं ॥ एताभिः पंचभिराहुतिभिः ॥ अमृतत्वाय
मोक्षाय ॥ मदीय आत्मा जीवः ॥ ब्रह्मणि परमात्मन्येकीभवेत्वित्यर्थः ॥ ॥ अथभोजनादावपो
शानमंत्रमाह ॥ ॥ अमृतोपस्तरणमसीति ॥ ॥ हेपीयमानजल त्वं अमृतं विनाशरहितं प्रा
णदेवताया इदमुपस्तरणं ॥ तथाचवाजसनेयिनः ॥ प्राणविद्यायां प्राणदेवताया जलवस्त्रत्वमा
मनंति ॥ तस्माद शिष्यन्नाचामेद त्वमेवतदन्नमनग्नं कुरुतइति ॥ ॥ प्राणाहुतिषेव विकल्पिता

निमंत्रांतराणि दर्शयति॥ ॥श्रद्धायां प्राणे निविष्टोमृतं जुहोमि॥ शिवोमाविशाप्रदाहाय॥ प्राणा
यस्वाहा॥ श्रद्धायामपाने निविष्टोमृतं जुहोमि॥ शिवोमाविशाप्रदाहाय॥ अपानायस्वाहा॥
श्रद्धायां व्याने निविष्टोमृतं जुहोमि॥ शिवोमाविशाप्रदाहाय॥ व्यानायस्वाहा॥ श्रद्धायामुदाने
निविष्टोमृतं जुहोमि॥ शिवोमाविशाप्रदाहाय॥ उदानायस्वाहा॥ श्रद्धायाꣳ समाने निविष्टो
मृतं जुहोमि॥ शिवोमाविशाप्रदाहाय॥ समानायस्वाहा॥ ब्रह्मणिम आत्मामृतत्वाय इति॥ ॥
हूयमाणद्रव्यविशेषत्वंशिवः शांतो भूत्वा मां प्रविश॥ किमर्थं अप्रदाहाय स्फुसंपादितदाहना
शायेत्यर्थः॥ किंच हूयमाणद्रव्यं प्राणदेवतायै स्वाहा सुहुतमस्तु॥ पूर्ववदन्यद्व्याख्येयं॥ ॥भोज राम
नादूर्ध्वमपां प्राशनमंत्रमाह॥ ॥अमृतापिधानमसीति॥ ॥पीयमान हे जल त्वं अमृतं अविनश्व

रमपिधानं आच्छादकमस्ति॥ ॥इत्येकोनसप्तत्यनुवाकः॥ ॥भुक्तस्यान्नस्याभिमंत्रणे मंत्रमाह॥
श्रद्धायां प्राणे निविश्यामृतं हुतं॥ प्राणमन्नेनाप्यायस्व॥ श्रद्धायामपाने निविश्यामृतं हुतं॥ अपान
मन्नेनाप्यायस्व॥ श्रद्धायां व्याने निविश्यामृतं हुतं॥ व्यानमन्नेनाप्यायस्व॥ श्रद्धायामुदाने निविश्या
मृतं हुतं॥ उदानमन्नेनाप्यायस्व॥ श्रद्धायां समाने निविश्यामृतं हुतं॥ समानमन्नेनाप्यायस्व॥
यः ॥ ॥वैदिककर्मणि विश्वासातिशयः श्रद्धा। तस्यां सत्यां॥ प्राणवायौ निवेश्यादरातिशयं कृत्वा॥ अमृत
मन्नरूपं॥ स्वादुभूतमिदं हविर्मया हुतं प्राणाभिमानिनी देवी त्वं॥ प्राणं मुखनासिकासंचारितं वायुं॥
हुतेनान्नेनाप्यायस्व वर्धय॥ स्पष्टमन्यत्॥ ॥इति सप्तत्यनुवाकः॥ ॥क्षुधादिजनितचित्तविक्षेपरा
तस्योर्ध्वं भोक्तुर्जीवस्य परमेश्वरस्वरूपानुसंधानहेतुं मंत्रं दर्शयति॥ ॥अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रि
तः॥ ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगिति॥ ॥हृदयमध्यगत आकाशः स्वांगुष्ठपरिमितः तत्र

ना·उ·भा वर्तमानाबुद्धिरुपितावतीतयावच्छिन्नोजीवरूपःपुरुषोंऽगुष्ठमात्रःसर्वज्ञानशक्त्यंगुष्ठमाश्रितः॥
६२ चक्राकारान्मस्तकेनाश्रितःआपादमस्तकव्यापीत्यर्थः॥सचोपाधिसंबंधमंतरेणस्वकीयेनवास्तवरू-
पेणसर्वस्यजगतईशोनियंता॥अतएवविश्वभुक्सर्वंजगद्भुंक्तेतादृशः॥प्रभुरीश्वरः॥प्रीणातुअ-
नेनभोजनेनप्रीतोभवतु॥ ॥इत्येकसप्ततिः॥ ॥इत्थंभोजनानंतरंपरमेश्वरानुसंधानप्रतिपादकं
मंत्रमुदाहृत्यभोक्तुःसर्वेषामंगानांस्वस्थताप्रतिपादकंमंत्रमनुभवपूर्वकंपठति॥ ॥वाङ्मआसन्न-
सोःप्राणः॥अक्ष्योश्चक्षुः॥कर्णयोःश्रोत्रं॥बाह्वोर्बलं॥ऊर्वोरोजः॥अरिष्टाविश्वान्यंगानितनूः॥
तनुवामेसहनमस्तेअस्तुमामाहिंसीःइति॥ ॥हेभगवन्षड्समन्नमाकंठंभुक्तवतःतत्तस्यमेमम राम
वाक्वागिंद्रियशक्तिः॥तद्गोलकेआस्येप्राणोनसोर्नासिकयोः॥चक्षुश्चक्षुरिंद्रियशक्तिः॥अक्ष्योर ६२
क्ष्णोस्तद्गोलकयोःलब्धस्वास्थ्याआसन्प्राग्भोजनात्क्षुधादिवशेनविकलाअभवन्नित्यर्थः॥अत

एवं बाह्वोर्बाह्वोः ॥ बलमभूत ॥ ऊर्वो रोजः गमनागमनसामर्थ्यमभूत् ॥ किं बहुना विरुखानि सर्वा
णि ममांगानि अरिष्टानि अनुपहिंसंति तानि स्वस्वस्थान्य भूवन् ॥ किं वा परिमितगणनया मम ॥
तनुवा तन्वा ॥ लिंगशरीरेण सह तनूः स्थूलशरीरे स्वस्था भवतिस्म ॥ अत एव भो भगवन् ॥ त्वत्प्रसादान्
मिष्टान्नं लब्ध्वा यतोहं त्वत्स्तोमं कृतं नमः ते तुभ्यमस्तु ॥ इत्थं प्रत्यहं सकुटुंबस्य मे त्वत्सिं कृत्वा सर्वां
गस्वास्थ्यं च संपाद्य यावन्मरणं सकुटुंबं मा माहिंसीः मा पीडय किंतु मृडय ॥ मंत्रोऽयं भोजनोत्तरप्र
त्यहं परमेश्वरस्य तिसिद्धये ब्राह्मणैरर्थानुसंधानपूर्वकं पठनीय इति रहस्यं ॥ ॥ इति द्विसप्तत्यनु
वाकः ॥ ॥ एवं सर्वांगस्वास्थ्यमुक्त्वा सर्वपापक्षयार्थत्वेन उत्तरोत्तरधनप्राप्त्यर्थत्वेन इंद्रसप्तर्षिसंवा
दकं मंत्रं जप्यत्वेनाह ॥ ॥ वयः सुपर्णा उपसेदुरिंद्रं प्रियमेधा ऋषयो नाधमानाः ॥ अप ध्वांतमूर्णु
हि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धानिति ॥ ॥ ऋषयः सप्तसंख्याकाः ॥ कदाचिदिंद्रं स्वर्गस्थमु

ना.उ.भा. पसेदुः भूर्लोकात्स काशादिंद्रसामीप्यं जग्मुः॥ कथंभूता ऋषयः नाधमानाः किमपि याचितुकामाः॥
६३ प्रियमेधाः सर्वप्राणिप्रियकृद्बुद्धिविशेषाः॥ वय इति विशब्दबहुवचनं पक्षिवाचकं॥ वयस इव पक्षि
ण इव शीघ्रगमनाः॥ कथंभूता वयः॥ सुपर्णाः शोभनपक्षाः॥ कथंभूतं इंद्रं॥ अपध्वांतं अपगत
हृदयांधकारं॥ इंद्रं उपेत्य यत् ऊचिरे तत् उच्यते॥ हे भगवन्निंद्र अस्मान् गुहि दिव्यदुकूलादिप्रदा
नेनाच्छादय॥ अस्माकं चक्षुः चक्षुरिंद्रियं तमसौंदर्यादिमसदृशार्थप्रदर्शनप्रदानाभ्यां पूरय॥ अस्मा
न् सर्वेभ्योऽपि पाशेभ्यो मुमुग्धि मोचय॥ किंचास्मान्निधये अवबध्यानान् सक्तान्कुरु अनेकधा रत्नव न
न्निधियुक्तानस्मान्कुर्वित्यर्थः॥ एवमृषिया चितेनेंद्रेण दत्तैर्भोग्यैः सुखिनस्संतः ऋषयो भूमिमे
त्य स्वाश्रमेषु स्थितवंत इत्याद्युपाख्यानं पूरयितव्यं॥ ॥इति त्रिसप्ततमोऽनुवाकः॥ ॥एवं जपानंत ६३
रं हृदयमालभ्य जप्यं मंत्रमाह॥ १ ॥ प्राणानां ग्रंथिरसि रुद्रो मा विशांतकः॥ तेनान्नेनाप्यायस्वेति॥

हे हृदयवर्तिन्नहंकार ॥ त्वं वायुरूपाणामिंद्रियरूपाणां ॥ ग्रंथिरसि परस्पराविश्लेषाय ग्रंथेर्हेतुरसि ॥
ताहृशस्त्वं रुद्रस्तदभिमानिनी देवतारूपं तं कोदुःखस्य विनाशको भूत्वा मां आविश्य मच्छरीरे प्र
विष्ट[illegible]भव ॥ तेन मद्भुक्तेनान्नेनाप्यायस्व मां अभिवर्धय ॥ ॥ इति चतुःसप्तत्यनुवाकः ॥ ॥
एवं हृदयाभिमंत्रणमुक्त्वा यावज्जीवं मृत्युपरिहारार्थं देवताप्राणायामरूपं मंत्रमाह ॥ ॥ नमो
रुद्राय विष्णवे मृत्युर्मे पाहीति ॥ ॥ रुद्राय पार्वतीपतये नमोऽस्तु ॥ विष्णवे लक्ष्मीपतये नमोऽस्तु ॥
किंच हे रुद्र हे विष्णो त्वं च मृत्युः व्यत्ययेन मृत्योः सकाशात् ॥ मे मां ॥ पाहि ॥ ॥ इति पंचसप्तत्यनु त
वाकः ॥ ॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणि त्वमद्भ्यस्त्वमश्मनस्परि ॥ त्वं वनेभ्यस्त्वमोषधीभ्यः ।
त्वं नृणां नृपते जायसे शुचिः इति ॥ ॥ हे अग्ने त्वमपि द्युभिरुत्तमकांतिभिः सहितः सन्नस्मन्मृत्युं
निवारय ॥ किंच त्वं आशु शीघ्रं शोषति भक्तानां पापमित्याशुशुक्षणिः ॥ किंच त्वमद्भ्यः उपरिको

ना·उ·भा· ६६ रणत्वेनतिष्ठसि॥ अत्रकारणत्वादग्नेराधिक्यं॥ अग्नेरापइतिश्रुतेः॥ त्वंमहामेरुरूपस्यपाषाणस्य
उपरितिष्ठसि॥ कनकाचलशिखरेषु अग्न्यादिदेवानांविद्यमानत्वप्र[illegible]सिद्धेः॥ त्वंवनेभ्यः
व्यत्ययेननंदनादिवनेषुविहरसि॥ किंचत्वमोषधीभ्योव्यत्ययेनसोमलताद्योषधीषुव्याप्य
तिष्ठसि॥ हेनृपतेयजमानरूपमनुष्याधिपतेअग्ने॥ त्वंनृणांयजमानानांमध्ये[illegible]पूज्योजा
यसेभवसि॥ किंचत्वंवैदिकलौकिकस्मार्त्ताग्निकसर्वपदार्थभुगपिसन् सर्वदाशुचिरेव॥ एवंवि
धप्रकारस्त्वंमृत्योःसकाशान्मांपाहीतिपूर्वेणान्वयः॥ ॥इतिषट्सप्तत्यनुवाकः॥ ॥अथे
भीष्टयां दानींपरमात्मनःसकाशात्स्वाधीष्टंमाचष्टे॥ ॥शिवेनमेसंतिष्ठस्वस्योनेनमेसंतिष्ठस्वसुभू
तेनमेसंतिष्ठस्वब्रह्मवर्चसेनमेसंतिष्ठयज्ञस्यर्द्धिमनुसंतिष्ठस्वोपतेयज्ञनमउपतेनमउपतेन ६६
मइति॥ ॥हेयज्ञसर्वयज्ञस्वरूपहेभगवन्परमात्मन्॥ तेतुभ्यं॥ उपसामीप्येनमोऽस्तु॥ त्वत्सन्निधौ

त्वत्संमक्षं भूयो भूयो नमस्करोमीत्यर्थः॥ अत्यादरार्थमाम्रेडितं॥ किंच त्वं मे शिवेन कल्याणप्रदाने न सह मेग्रहे संतिष्ठस्व॥ स्वाने न ऐहिकसुखप्रदानेन सह॥ सुभूतेन महदैश्वर्येण सह॥ ब्रह्मवर्चसेन सहसमानमन्यत्त॥ एवंगुणवति त्वयि मद्गृहे प्रविष्टे सति॥ अहमपि एवंविधगुणवान्भूयासमिति प्रार्थयितुराशयः॥ किंच त्वं श्रीत्यर्थं कृतस्य यज्ञस्य सत्कर्मानुष्ठानस्य॥ ऋर्धिं समृद्धिं॥ अनुतत्फलं दातुं भरत मत्समीपे संतिष्ठस्व॥ सम्यगचलितः सन्नुपविश्य॥ समाप्तं भोजनप्रकरणं कर्मप्रकरणं च॥ ॥इतिसप्तसप्तत्यनुवाकः॥ ॥अथेदानीं सर्वकर्ममयसंसारबीजदाहार्थं संन्यासप्रकरणमारभ्यते॥ तत्र ज्ञानप्रतिबंधकमहापातकोपपातकपरिहारेण ज्ञानयोग्यतालक्षणां शुद्धिमुक्त्वा योग्यस्य पुरुषस्य विवक्षितेषु ज्ञानसाधनेषु संन्यासस्य निरतिशयोत्कर्षं वक्तुं सत्यादीनि एकादशोत्कृष्टसाधनानि प्रतियोगित्वेन वक्तव्यानि तत्र प्रथमं सा

धनमुपन्यस्यति॥ ॥सत्यं परं परꣳसत्यꣳसत्येन न स्वर्गाल्लोकाच्च्यवंते कदाचन सताꣳहि
सत्यं तस्मात्सत्ये रमंते इति॥ ॥यद्वस्तु प्रमाणेन दृष्टं तस्य तथैवाभिवदनं सत्यं॥ तच्च परं पुरु
षार्थसाधनेषूत्कृष्टं तत्र विधानार्थं परं सत्यमिति पुनर्वचनं॥ यद्वा परं सत्यं न बाध्यं तद्यथा
र्थवचनमपि बाधरहितमिति व्यावहारिकबाधराहित्येनोत्कर्षे विवक्षितत्वात्तदृष्टांतेन परं सत्य
मित्युक्तं॥ सत्येन यावज्जीवनं यथार्थकथनेन स्वर्गाल्लोकात्कदाचिदपि न प्रच्यवंते अनृतवादिन
स्तुल्केन वित्तुष्येन सर्वं प्राप्यानृतवदनदोषेण कर्मफलापूर्णतायामपि त देवस्वर्गात्प्रच्यवंते॥
किंच हि यस्मात्कारणात्सतां सन्मार्गवर्तिनामृष्यादीनां संबंधि यथार्थवादित्वं तस्मात्कारणात्सता
मिदमिति व्युत्पत्तिमाश्रित्य सत्यवादित्वमेव परमं मोक्षसाधनमिति केचिन्महातो वदंतस्तस्मिन्
नेव सत्ये रमंते क्रीडंति॥ ॥एवमेकं मतमुक्त्वा द्वितीयं मतमाह॥ ॥तप इति तपोनानशनात्परं यद्धि ६५

परंतपस्तदुर्धर्षंतद्दुराधर्षंतस्मात्तपसि रमंते इति ॥ ॥ तपः परं मोक्षसाधनं केषांचिन्मतं ॥ तीर्थया
त्राजपहोमादीनि यद्यपि बहूनि तपांसि संति ॥ तथापि तेषु सर्वेषु अनशनमुपवासं [illegible] धनस्त्रा
न वर्जनात्परमुत्कृष्टं तपो नास्ति यद्वा अनशनरूपं कृच्छ्रचांद्रायणादिकं परं तपोस्ति ॥ तद्दुर्धर्षं धर्षयितु
सोढुमशक्यं ॥ अतएवासमंतात्सर्वेषां प्राणिनां तत्तपो दुर्धर्षं दुःशकमित्यनुभूयते तस्मात्कारणा
त्केचन श्रद्धालवः कृच्छ्रचांद्रायणादिके तपसि रमंते ॥ ॥ तृतीयं मतमाह ॥ ॥ दम इति नियतं ब्रह्मचा
रिणस्तस्माद्दमे रमंते इति ॥ ॥ वाक्चक्षुरादींद्रियाणां बाह्यानां निषिद्धेभ्यो विषयेभ्यो निवृत्तिर्दमः ॥
स एवोत्तमो मोक्षहेतुरिति मन्यमाना नैष्ठिकब्रह्मचारिणः ॥ नियतं सर्वदा तस्माद्दमे रमंते ॥ ॥ चतुर्थं वदंति
मतमाह ॥ ॥ शम इत्यरण्ये मुनयस्तस्माच्छमे रमंते इति ॥ ॥ अंतःकरणस्य क्रोधादिकस्य दोषरा
हित्यं शमः ॥ स एवोत्तमो मोक्षहेतुरित्यरण्ये वर्तमाना मुनयो वानप्रस्था मन्यंते तस्मात्ते शमे रमंते ॥

ना॰ उभा॰ ६६ ॥पंचमंमतमाह॥ ॥दानमिति सर्वाणिभूतानि प्रशंसंति दानान्नातिदुश्चरं तस्माद्दानेरमं
ते इति॥ ॥गोभूहिरण्यादीनांस्वकीयानां शास्त्रोक्तवर्त्मना [illegible] स्वस्वपरित्यागपूर्वकं परस्व स
त्वापादनं दानं॥तदेवोत्तमंमोक्षसाधनमिति सर्वे प्राणिनः प्रशंसंति दानादतिशयितं दुश्चरं
णा नास्ति धनरक्षणार्थं प्राणानपिपरित्यजंतं पुरुषाणामुपालंभात् तस्माद्धेतोर्हिरण्यादिदानेर
मते॥ ॥षष्ठंमतमाह॥ ॥धर्मइति धर्मेणसर्वमिदंपरिगृहीतं धर्मान्नातिदुष्करं तस्माद्धर्मेरमं
ते इति॥ ॥स्मृतिपुराणादिप्रतिपाद्यो वापीकूपतडागादिनिर्माणरूपोधर्मोत्रविवक्षितः॥स
मा चोत्तमोमोक्षहेतुरिति राजादयः प्रभवो मन्यंते॥तडागादिरूपेण धर्मेण॥ सर्वमिदं जग
त्॥परिगृहीतं सर्वेपिमनुष्यपश्वादयः स्नानपानादिना तुष्यंति तादृशाद्धर्मादतिदुष्करं नास्ति न्यद ६६
तस्मात्कारणाद्धर्मेरमंते प्रभवः॥ ॥सप्तमंमतमाह॥ ॥प्रजनइतिभूयांसस्तस्माद्भूयिष्ठाः

प्रजायंते तस्माद् भूयिष्ठाः प्रजननेरमंते इति ॥ प्रजननः अपत्योत्पादनं मतस्यैवोत्तमसाधनत्वं
भूयांसो बहवः प्राणिनो मन्यंते ॥ धनिकैर्दरिद्रैः स्त्रीपुंभिश्च सर्वैरपि पुत्रोत्पादनायातिशयेन प्रय
तमानत्वात्तस्मादेकैकस्य पुरुषस्य ॥ भूयिष्ठाः द्वित्राः पंचषडित्येवं बहवोपत्यविशेषा उत्पद्यंते
अति तस्माद् भूयिष्ठा बहवः प्राणिनः प्रजोत्पादनेरमंते ॥ ॥अष्टमं मतमाह ॥ ॥अग्न्याधेय इत्याह तस्मा
दग्नय आधातव्या इति ॥ ॥अग्नयो गार्हपत्यादयः ॥ उत्तमाः मुक्तिहेतव इति कश्चिद्वादार्थपर आ
ह ॥ तस्मात्कारणाद् गृहस्थैरग्नय आधातव्या भवंति ॥ ॥नवमं मतमाह ॥ ॥अग्निहोत्रमित्याह
ध तस्मादग्निहोत्रेरमंते इति ॥ ॥आहितोग्निषु [illegible] सायंप्रातश्चानुष्ठेयो होमोऽग्निहोत्रं ॥ तदुत्तमं
मोक्षसाधनं इति अपरः कश्चिद्वादार्थपर आह ॥ तस्मात्केचिदग्निहोत्रेरमंते ॥ ॥दशमं मतमाह ॥
यज्ञ इति यज्ञो हि देवास्तस्माद्यज्ञेरमंते इति ॥ ॥दर्शपूर्णमासज्योतिष्टोमादिको यज्ञः ॥ उत्तमो मोक्षहे

ना॰उ॰भा॰
६७

तुरित्यपरे वेदार्थपरा मन्यंते॥ तत्र हेतुरुच्यते॥ हि यस्मात्कारणात्॥ यज्ञः व्यत्ययेन तृतीया यज्ञेन॥
पूर्वोक्तादेवा इंद्रादयो दिवंगता इति वाक्यशेषः॥ तस्मादेव कारणादद्यापि केचन वैदिकाः यज्ञे पू
र्वोक्ते रमंते आसक्तचित्ताः संतः क्रीडंति॥ ॥एकादशं मतमाह॥ ॥मानसमिति विद्वांसस्त
स्माद्धि द्वांसः एव मानसे रमंते इति॥ ॥मनसैव निष्पाद्यमुपासनं मानसं॥ तदेवोत्तमं मोक्षसाध
नमिति विद्वांसः सगुणब्रह्मविदः॥ मन्यंते तस्मात्कारणात्केचन विद्वांसो वेदोपास्तिं तास्वर्यवि भाग
दो मानस एवोपासने रमंते॥ ॥द्वादशं मतमाह॥ ॥न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्र
ह्मा तानि वा एतान्यवराणि परांसि न्यास एवात्यरेचयदिति॥ ॥पूर्वोक्तकारणानामग्निहो
त्रादिकर्मणामारुणिजाबालाद्युपनिषदुक्तप्रकारेण परित्यागो न्यासः॥ स एवोत्तमो मोक्षहे
तुरिति ब्रह्मा हिरण्यगर्भो मन्यते॥ स च ब्रह्मा परो हि परमात्मरूपो हि न तु पूर्वोक्तमतानुसारिण ६७

इव जीवः॥ यद्यप्यसौ हिरण्यगर्भो देहधारी तथापि परो हि परमात्मैव ब्रह्मा हि हिरण्यगर्भ इति व
क्तुं शक्यते॥ तच्छिष्यत्वेन तत्समानज्ञानत्वात्॥ अत एव श्रेष्ठतानश्रेष्ठतरा आहुः॥ यो ब्रह्माणं वि
दधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै॥ इति या नि पूर्वोक्तानि सत्यादीनि मानसांतानि एता
नि तपांसि भवंति एव॥ तथापि संन्यासमपेक्ष्य अवराणि निकृष्टानि संन्यास एक एव॥ सर्वाण्य
त्यरेचयत् अतिक्रांतवान्॥ उत्तमत्वेन तारतम्यं तत्र विश्रांतमित्यर्थः॥ ॥उक्तं उत्तमसाधन
मुपसंहरति॥ ॥य एवं वेदेत्युपनिषदिति॥ ॥यः पुमानेवं प्रकारेण न्यासस्यान्येभ्यः साधने
भ्यः उत्तमत्वं वेद तस्य विदुष इयमुक्ता विद्या॥ उपनिषद्रहस्यभूता भवतीति॥ ॥इति अष्टस
प्तत्यनुवाकः॥ ॥पूर्वोक्तं मोक्षसाधनसमूहमुपपादयितुमाख्यायिकामाह॥ ॥प्राजापत्यो
हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवंतः परमं वदंतीति तस्मै प्रोवाचेति॥ ॥प्रति

जापतेः पुत्रः प्राजापत्यः ॥ स चारुणिनामकः ॥ स एव सुपर्णाख्यायाः स्त्रिया अपत्यं सुपर्णेयः
इत्युच्यते ॥ तादृशः पुरुषः स्वकीयं पितरं प्रजापतिमुपससार उत्तमसाधनजिज्ञासयोपसन्नवा
न् ॥ उपसद्य चैनं पप्रच्छ हे प्रजापते ॥ भगवंतः पूज्या महर्षयः ॥ मोक्षसाधनेषु किं साधनं परमु
त्कृष्टं वदंति ॥ एवं पृष्टः प्रजापतिस्तस्मै आरुपाये ॥ प्रोवाच ॥ ॥ पूर्वमुक्तेषु साधनेषु प्रथमं द
र्शयति ॥ ॥ सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठि
तं तस्मात्सत्यं परमं वदंतीति ॥ ॥ योयं वायुरिदानीमंतरिक्षे वाति सोयं पूर्वजन्मनि मनुष्यः स
न् सत्यवादित्वं परिपाल्य तेन सत्येन वायुदेवतात्वं प्राप्य इदानीं लोकानुग्रहार्थमंतरिक्षे वाति ॥ त
थैवादित्योपि पूर्वजन्मानुष्ठितेन दिवि रोचते द्युलोके प्रकाशते ॥ यदेतत्सत्यं तदेतद्वाचो वागिंद्रिय

स्य प्रतिष्ठा स्थिरं स्थानं ॥ अनृतं तु वाचोक्तमपि परैर्निराक्रियत इति न वाचः प्रतिष्ठा ॥ तथा सति स्व
र्गलोकेऽस्मिन्सत्यभाषणे प्रामाणिकव्यवहारजातं प्रतिष्ठितं ॥ तस्मात्कारणात्सत्यमेव परमं सा
धनमित्येवं केचिदनुष्ठातारो वदंति ॥ ॥ तत्रारुणेर्मुखविकासराहित्यलक्षणापरितोषं दृष्ट्वा
द्वितीयं साधनमाह ॥ ॥ तपसा देवा देवतामग्र आयन्नृ तपसर्षयः स्वरन्वविंदन्तपसा सप
त्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदंति इति ॥ ॥ इदानीं स्वर्गे वर्तमाना
अग्नींद्रादयो देवाः ॥ अग्रे पूर्वजन्मनि अनुष्ठितेनान्नपरित्यागरूपेण कृच्छ्रचांद्रायणादितपसा
देवतां आयन् इदानीं तनं देवतात्वं प्राप्ताः ॥ तथा वसिष्ठादयो महर्षयः पूर्वानुष्ठितेन तपसा ॥ सुवरन्व
विदन् स्वर्गलोकमनुक्रमेण लब्धवंतः ॥ तथा वयमपि इदानीमभिद्धारे रूपेण तपसा ॥ सपत्नान्प्र

ना॰उ॰भा॰ त्रूनरातीः अस्मदीयद्रव्यलाभविरोधिनः॥ पुरुषानपि प्रणुदाम निराकुर्मः॥ अन्यदपि सर्वं फल
६९ जातं तपसि प्रतिष्ठितं॥ तस्मादनशनरूपं तपः परमं मोक्षसाधनमिति वदंति॥ ॥अत्रापि
पूर्ववदपरितोषं दृष्ट्वा तृतीयं साधनमाह॥ ॥दमेन दांताः किल्बिषमवधून्वंति दमेन ब्रह्म
चारिणः सुवरगच्छन्दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदंतीति॥ ॥
दांताः बाह्येंद्रियदमनयुक्ताः पुरुषास्तेन दमेन स्वकीयं पापमवधून्वंति नाशयंति॥ तथा नैष्ठि
कब्रह्मचारिणो दमेन स्वर्गमगच्छन्॥ स च दमो भूतानां प्राणिनां॥ दुराधर्षं आधर्षयितुं स
र्वतः सोढुं दुःसहं॥ तस्मिंश्च दमे सर्वमपेक्षितं फलं प्रतिष्ठितं॥ तस्मात्कारणाद्दमः परमं मुक्ति
साधनमिति केचिद्वदंति॥ ॥अत्र सर्वत्र पूर्ववत्पूर्वसाधने परितोषराहित्यादुत्तरसाधनोक्ति ६९

ईष्टव्या॥ चतुर्थं साधनमाह॥ ॥शमेन शांताः शिवमाचरंति शमेन नाकं मुनयोन्वविंदन् शमो
भूतानां दुराधर्षं शमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदंतीति॥ ॥शांताः अंतःकरणगतक्रोधा
दिरहिताः॥ ते न शमेन॥ शिवं मंगलं॥ पुरुषार्थमाचरंति॥ नारदाद्या मुनयः शमेन स्वर्गमलभंत॥ अन्य
त्पूर्ववत्॥ ॥पंचमं साधनमाह॥ ॥दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवंति
दानेनारातीरपानुदंत दानेन द्विषंतो मित्रा भवंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदंतीति॥ ॥
ण॥ यो हिरण्यादिदानं यज्ञानां संबंधिनी दक्षिं भवति॥ तस्मात् वरूथं श्रेष्ठं॥ लोकेपि दातारं पुरुषं॥ वेदशा
स्त्रविदो मूढाश्च सर्वेपि पुरुषा उपजीवंति॥ तथा योद्धुकामानां॥ दानेनारातीः शत्रून् अपानुदंत
राजानो निराकृतवंतः॥ ये [illegible] पि प्रबलाः द्विषंति ते पि धनदानेन तुष्टा मित्राणि भवंतीति॥ अन्यत्पूर्व
वत्॥ षष्ठं साधनमाह॥ धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदंतीति॥ श्रुति

स्मृतिप्रतिपादितवापीकूपतडागादिनिर्माणरूपो धर्मो विश्वस्य जगतः सर्वस्य प्राणिजातस्य प्रतिष्ठा आश्रय इत्येतत्प्रसिद्धं तथा लोके धर्मिष्ठमतिरा
यन्न धर्मे वर्तमानं पुरुषं प्रजाः सर्वा उपसर्पंति धर्मो धर्मे निर्णयार्थमुपगच्छंति किंच प्रायश्चित्तरूपेण धर्मेण पापं अपनुदंति विनाशयंति अन्य
त्सूर्ववत् ॥ सप्तमं साधनमाह ॥ प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तंतुं तन्वानः पितॄणामनृणो भवति तदेवतस्या अनृणं तस्मात्प्रजन
नं परमं वदंतीति ॥ प्रजननं पुत्रोत्पादनं यदस्ति तदेव गृहस्थानां प्रतिष्ठा पुत्रस्य गृहकृत्यनिर्वाहकत्वात् सोऽयं मनुष्यलोकः पुत्रेणैव
जय्यो नान्येन कर्मणेति श्रुतेः ॥ किंच प्रजायाः पुत्रपौत्रादिरूपायाः तंतुं परंपरां साधु [illegible] तन्वानः ॥ शास्त्रीयमार्गो यथा भवति तथा विस्तार
यन् पितॄणां मृतानां पितृपितामहादीनां अनृणो भवति तदेवमृणं पुत्रितया प्रत्यर्पितं भवति तत्प्रजननं तदेवतस्य पुत्रिणोऽनृणापाकरण
हेतुर्भवति ॥ अन्यत्सूर्ववत् ॥ अष्टमं साधनमाह ॥ अग्नयो वै त्रयी विद्या देवयानः पंथा गार्हपत्य ऋक्पृथिवी रथंतरमन्वाहार्यपचनं यजुरंतरिक्षं
वामदेव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं वदंति ॥ गार्हपत्यो दक्षिणाग्निराहवनीय इति येऽग्नयः संति त एव त्रयी
विद्या वेदत्रयात्मकाः वेदत्रयोक्तकर्मसाधनत्वात् वेदविहितत्वाच्च देवयानः यागद्वारेण देवत्वयापको मार्गश्च किंचैतेषामग्नीनां म
ध्ये गार्हपत्योऽग्निः ऋग्वेदात्मकः पृथिवीलोकस्वरूपः रथंतरसामात्मकश्चेति प्रशस्यते अन्वाहार्यपचनो दक्षिणाग्निर्यजुर्वेदोऽन्तरिक्षलोक ७०

वामदेव्यसामात्मकः ।आहवनीयाग्निरुक्सामवेदस्वर्गलोकबृहत्सामात्मकः अन्यत्पूर्ववत् । नवमं साधनमाह ।अग्निहोत्रं ऽ सा
यं प्रातर्गृहाणां निष्कृतिः स्विष्टं ऽ सुहुतं यज्ञक्रतूनां प्रायणं ऽ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदंतीति ।
सायं प्रातश्चानुष्ठितं अग्निहोत्रं गृहाणां निष्कृतिः कथं साधनं मूल्यं ।अग्निहोत्राभावे क्षुधितोग्निः गृहाणि दहेत् किं
चाग्निहोत्रं स्विष्टं शोभनयागरूपं सुहुतं शोभनहोमरूपं । देवतामुद्दिश्य द्रव्यत्यागो यागः त्यक्तस्य द्रव्यस्याग्नौ प्रक्षेपो हो
मः किं चैतद्यज्ञक्रतूनां प्रायणं प्रारंभः ।अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबंधः सौ
त्रामणीति सप्त हविर्यज्ञाः । क्रतुशब्दो यूपवत्सोमयागेषु रूढः ।अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रो
प्तोर्याम इत्येते सप्त सोमसंस्थाः । एतत्सर्वेषां यज्ञक्रतूनां प्रारंभकं अग्निहोत्रं अत एव स्वर्गस्य लोकस्य ज्योतिः प्रका
शकं । अन्यत्पूर्ववत् । दशमं साधनमाह । यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदंत यज्ञेन द्विषंतो मित्रा भवंति य
ज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदंतीति । यज्ञः उत्तमसाधनमिति केचिदाहुः । किं च देवाः पूर्वमनुष्ठितेन यज्ञेन स्वर्गं प्राप्ताः ।
किं च यज्ञेनैव यदा तदा देवा असुरान्विनाशितवंतः किं च सर्वकामप्राप्तिसाधनेन ज्योतिष्टोमेन द्वेषवंतः तिकामस्य पूर्वं द्वेषं
कुर्वतोपि शत्रवोपि मित्रा भवंति । पूर्ववदन्यत् । एकादशं साधनमाह । मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा निष्पाद्यं मान
मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजंत मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदंतीति ॥

समुपासनं यदस्ति तदेव प्राजापत्यं प्रजापतिपदप्राप्तिसाधनं। अत एव पवित्रं। चित्तशुद्धिकारणं मानसेनैवोपासनेन युक्तमनो
ऽन्तःकरणं यदस्ति तेनैकाग्रेण मनसा साधु पश्यति अतीतानागतव्यवहारादिवस्तुजातं योगी सम्यक् साक्षात्करोतीति एतच्च
योगसूत्रे पतंजलिना बहुधा प्रपंचितं। मनसा एकाग्रमनोयुक्ता विश्वामित्रादय ऋषयः स्वसंकल्पमात्रेण बह्वीः प्रजा
असृजंत। अन्यत्सर्वं वत्। द्वादशं साधनमाह। न्यास इत्याहुर्मनीषिणो ब्रह्माणमिति। न्यास इत्युक्तो यो मोक्षहेतुः। तं ब्रह्माणं हि
रण्यगर्भरूपं मनीषिणो बुद्धिमंतो महर्षयः स्मृतिकर्तार आहुः। तथा च संन्यासाद्ब्रह्मणः स्थानमिति स्मर्यत इति। हिरण्यगर्भ
प्राप्तेरंतरंगसाधनत्वात्तद्रूपत्वं तमेव संन्यासं स्तोतुं तस्मात्तस्य हिरण्यगर्भस्य स्वरूपं प्रपंचयति। ब्रह्मा विश्वः कतमः स्वयंभुः प्रजा
पतिः संवत्सर इति। यो ब्रह्मा हिरण्यगर्भः सोयं विश्वः सर्वजगदात्मकः कतमो नितरां येन सुखस्वरूपः पुनः पुनः स्वयंभुः
प्रजापतिः। उत्पादकाभ्यां मातापितृभ्यां विना स्वयमेवोत्पन्नः स चासौ प्रजापतिः प्रजानां पालकश्चेति स
मासः। संवत्सरः कालात्मक इति शब्दः प्रदर्शनार्थः इत्यादि सर्वस्वरूपत्वमुन्नेयमित्यर्थः। पुनरपि संन्यासः स्तूय
ते। हिरण्यगर्भावयवस्य संवत्सरस्य महत्त्वं दर्शयति। संवत्सरो सावादित्योय एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मेति॥

यो ऽयं संवत्सरः कालः उक्तः सोऽसावादित्यस्वरूप एव आदित्यगत्याभासेन निष्पादितत्वात्। य एव आदित्यस्तस्मिन्ना
दित्यमंडले पुरुषः स एव परमेष्ठी हिरण्यगर्भरूप मादित्यमंडलद्वारेण हिरण्यगर्भस्य प्राप्यत्वात्स च परमेष्ठी ब्रह्मा
सर्वजगत्कारणावस्कृतत्वे यात्मा सर्वेषां प्रत्यगात्मभूतः एवमादित्यादिद्वारा संवत्सरं प्रजाः स्वेन मादित्यमंडलद्वारे मा
ण सर्वव्यवहारहेतुतया प्रजां सृजति। याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायं
ते ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषाम
नीषया मनो मनसा शांतिः शांत्या चित्तं चित्तेन स्मृतिः स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञाने[illegible] ना
[illegible]त्मानं वेदयति तस्माद्ददन्सर्वाण्येतानि ददाति अन्नात्प्राणा भवंति भूतानां प्राणैर्मनो मनसश्च विज्ञानं वि
ज्ञानादानंदो ब्रह्मयोनिरिति। अयमित्यादि त्यो याभिरुष्णस्वरूपाभीर रश्मिस्तपति प्रभूतं संतापं करोति ताभिरत्तैर रश्मिभिर्भूमिग
तं जलमादाय पर्जन्यो भूत्वा वर्षति तेन च पर्जन्येन वृष्टिजनकेन व्रीह्याद्या ओषधयो अश्वत्थपनसाद्या वनस्पतयश्च प्रकर्षेणोत्पद्यं
ते ओषधीभिर्वनस्पतीभिश्च भोज्यमन्नं संपद्यते। तेन चान्नेन प्राणाः पोषिता भवंति तैश्च पुष्टैः प्राणैः शरीरे बलं संपद्यते तेन

बलेन कृच्छ्रचान्द्रायणादिरूपं तपः संपद्यते तेन च तपसा श्रद्धा चित्तस्य तत्त्वज्ञानविषयाऽऽस्था जायते तयाऽऽस्थया पुरुषस्यै
काग्रचित्तस्य मेधा गुरूपदिष्टग्रन्थतदर्थधारणशक्तिरूपा जायते तथा च मेधया मनीषा तत्त्वविषयबुद्धिरुत्पद्यते। तया म
नीषया मनो निरन्तरं तत्त्वविषयं मननमुपजायते तेन च मनसा मननेन कामक्रोधादिदोषस्यावसराभावात् शान्तिरुपजाय
ते तया च शान्त्या विक्षेपरहितस्य चित्तं चेतनं तत्त्वविषयं प्रमाणजनितं ज्ञानमुपजायते तेन च चित्तेन ज्ञाने नामिश्रादिव्यवहारव्य
वधानेऽपि तत्त्वविषयां स्मृतिमाप्नोति। तथा निद्राद्यनन्तरभाविन्या स्मृत्या स्मारं निरन्तरस्मरणं प्राप्नोति तेन च स्मारेण विज्ञा
नं विजातीयप्रत्ययव्यवधानराहित्येन विशिष्टं संततं ज्ञानं प्राप्नोति तेन च विज्ञानेनात्मानं स वेदयति। परमात्मानं सर्वदा
अनुभवति तस्मादन्नस्योत्कृष्टप्राणबलादिपरंपरया परमात्मानुभवहेतुत्वं तस्माद्दीयमानमन्नं ददन् पुरुषः सर्वाण्येतानि प्राणादी
न्यात्मानुभवान्तानि वस्तूनि ददाति अन्नदानस्य सर्वदानरूपत्वं विस्पष्टयितुं तमेवार्थं पुनरप्यन्नात्प्राणा भवन्ति भूतानामि
त्यादिवाक्येन संक्षिप्योपन्यस्यते। प्राणादिपरंपरयोत्पन्ना[illegible]द्विज्ञानादानन्दः परमा[illegible]नन्दरूपो भूत्वा ब्रह्म वेदान्तप्रतिपाद्यं योनि
र्जगत्कारणं यद्ब्रह्म स योनिर्वेदस्य योनिः कारणान्तरशून्यः स्वयंभवति यथोक्तं संन्यासमेव स्तौति तेन संन्यासेन प्राप्तं तत्त्वज्ञानं पुरुषं प्र
ह्यं सति। स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च

३ पृथिव्यादिकं भूतपंचकं चक्षुःश्रोत्रादिकं ज्ञानेंद्रियपंचकं वाक्पाण्यादिकं कर्मेंद्रियपंचकं प्राणापानादि
कं वायुपंचकं ॥ ३ स

स वै सर्वमिदं जगत्संभूतं स भव्यं जिज्ञासकॢप्त ऋतजा रयिष्ठाः श्रद्धा सत्यो महस्वांतपसो वरिष्ठात्
इति ॥ ॥ यः पुरुषः संन्यासपुरःसरं तत्त्वज्ञानं संपादयति स एव वै स पुरुषः सर्वात्मकः सन् ॥ पंचधा
पंचभिः प्रकारैः ॥ पंचत्मा पंचविंशतिवस्तुस्वरूपो भवति शब्दस्पर्शादिकं गुणपंचकं एतावतां वस्तू
नां स्वरूपभूत इत्यर्थः ॥ यद्वा ॥ पंचभिरात्मभिर्युक्तः पंचधा वर्तते ॥ तथा च पुराणेऽभिहितं ॥ भूतात्मा
चेंद्रियात्मा च प्रधानात्मा तथा भवान् ॥ आत्मा च परमात्मा च त्वमेकः पंचधा स्थित इति ॥ येन ब्रह्म
स्वरूपेण पुरुषेण ॥ सर्वमिदं जगत् ॥ सूत्रे मणिगणा इव प्रोतं प्रकर्षेणोतं व्याप्तमित्यर्थः ॥ तदेव स
वै पृथिवी चेत्यादिना प्रपंच्यते ॥ स एव पृथिव्यादिवस्तुव्यापी पुरुषः ॥ सर्वमिदं वर्तमानं जगत् ॥ त
त्वद्व्यतिरेकेणाभावात् तथा भूतमतीतं जगत्स एव ॥ भव्यं भविष्यदपि जगत्स एव ॥ तेसवि ननु
पुरुषो मूढवद्धस्तपादादियुक्तदेहरूप एव दृश्यते ॥ ननु सर्वजगत्स्वरूप इति चेन्नैवं ॥ यतोऽयं जिज्ञा

सक्तः जिज्ञासयावेदांतविचारेणसर्वात्मकतयानिश्चितोभवति॥ कृतमाकृतेनसत्येनप्रामाणिकेन
ज्ञानेनसर्वात्माजातः जिज्ञासाकालेभ्रांतिज्ञानरूपेषुपूर्वपक्षेषुनिराकृतेषुप्रामाणिकेनसिद्धांत
ज्ञानेनतादृशोजातोभवति॥ सचरयिष्ठाः रयिर्धनंगुरूपदेशात्तचैवतिष्ठतितदुपदेशरहितानांप्र नथान
तीयतइत्यर्थः॥ ईदृशात्स्वरूपविज्ञानस्यश्रद्धयालभ्यत्वात्॥ असौश्रद्धारूपश्रद्धावानूलभतेज्ञा श्र
नमितिस्मृतेः सत्यमबाध्यंयत्ब्रह्मतत्स्वरूपत्वादयंसत्यः॥ महस्वान्तेजस्वान्स्वयंप्रकाशइत्य
र्थः॥ अतएवतपसः मनननिदिध्यासनरूपात्‌ आलोचनात्॥ वरिष्ठादितरसाधनेभ्यः अंतरंगत्वे
नश्रेष्ठात्‌लभ्यंते॥ ॥ इत्थंसन्यासपूर्वकज्ञान[illegible]युक्तंपुरुषंप्रशंस्यज्ञानफलंदर्शयति॥ ॥
ज्ञात्वात्वमेवंमनसाहृदाचभूयोनमृत्युमुपयाहिविद्वानिति॥ ॥ हेआरुणेत्वंतंपरमात्मानं॥ हृ ७३
दयरूपेणमनसा एवंपूर्वोक्तसन्यासरूपसाधनप्रकारेण॥ ज्ञात्वाविज्ञानतेनज्ञानेनयुक्तःसन्

× हृदाहृत्पुंडरीकेणानियमितत्वात्

भूयःपुनर्मृत्युंनोपयाहिमाप्राप्नुहि॥ज्ञानिनोवर्तमानदेहपातेसतिजन्माभावात्॥पुनर्मृत्युर्नास्ती
त्यर्थः॥बहुधाप्रशस्तंसंन्यासमुपसंहरति॥ ॥तस्मान्न्यासमेषांतपसामतिरिक्तमाहुरिति॥ ॥य
सरम स्मात्पुरुषार्थस्यांतरंगसाधनंतस्मादेषांसत्यादीनांतपसांमध्येसंन्यासमतिरिक्तंअत्युत्कृष्टंसाध
नमनीषिणआहुः॥ ॥संन्यासादूर्ध्वंप्रणवेनात्मनिसमाधिंविधित्सन्तस्मिन्समाधौविघ्नपरिहा
रार्थमादावंतर्यामिणःसर्वकारणत्वेनस्तुतिंदर्शयति॥ ॥वसुरण्वोविभूरसिप्राणेत्वमसिसंधाताब्र
ह्मन्त्वमसिविश्वधृत्तेजोदास्त्वमस्यग्निरसिवर्चोदास्त्वमसिसूर्यस्यद्युम्नोदास्त्वमसिचंद्रमसउप
यामगृहीतोसिब्रह्मणेत्वामहसइति॥ ॥हेब्रह्मन्नंतर्यामिन्वसुरण्वोवसुनोवस्तुनस्तस्यरण्वःसंगंता यि
कथयितास्मदनुग्रहार्थमुपदेष्टासि॥तथाविभुर्हिरण्यगर्भविराडादिविविधरूपेणासन्नोसि॥प्राणेवा
युरूपेजीवात्मनःसंधातासंयोजयितात्वमसि॥विश्वंधरतीतिविश्वधृद्ब्रह्मांडधारकवायुरूपोसि॥भू

लोकवर्तिनोऽग्नेस्तेजोदाः प्रकाशदस्त्वमसि॥ द्युलोकवर्तिनः सूर्यस्य वर्चोदाः प्रकाशदस्त्वमसि॥ तथा चं-
द्रमसो द्युम्नोदाः प्रकाशरूपधनप्रदः त्वमसि॥ तथा यागेषु सोमरूपः सन् उपयामेन पार्थिवेन मृन्म-
यदारुमयपात्रेण गृहीतोसि॥ उपयामशब्दस्य पृथिवीपरत्वं षष्ठकांडे मंत्रव्याख्याने समाम्ना-
तं॥ उपयामगृहीतोसीत्याह इयं वा उपयाम इति॥ उक्तप्रकारं सर्वकर्तारं अंतर्यामिणं त्वां महसे ब्र-
ह्मणे चैतन्यज्योतिःस्वरूपब्रह्मतत्वाभिव्यक्त्यर्थं भजामीति शेषः॥ ॥अनेन प्रकारेणांतर्यामिण-
स्तुत्वा परिहृतविघ्नस्य संन्यासिनः समाधिं विधत्ते॥ ॥ॐमित्यात्मानं युंजीतेति॥ ॥त्रिमात्रं प्रणव-
मुच्चारयन् सर्ववेदांतेषु निर्णीतं परमात्मानं स्वात्मरूपेण चित्ते समादध्यात्॥ समाधिसाधनमोंका-
रं प्रशंसति॥ ॥एतद्वै महोपनिषदं देवानां गुह्यमिति॥ ॥यत्प्रणवस्वरूपमस्ति एतदेव महोपनिषदं मह-
त्यो रहस्यः उपनिषदः प्रतिपादकाः यस्य परमात्मनो वाचकस्य प्रणवस्वरूपस्य तन्महोपनिषदं अका- ७४

रांतत्वं छांदसं ॥ सर्वे वेदा यत्पदमामनंति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतदिति प्रणवस्य सर्वोपनिष
त्प्रतिपाद्यत्वं कंठ[illegible]क्तौ श्रुतं ॥ तच्च प्रणवरूपं निर्गुणतत्वप्रतिपादकं ॥ देवानामिंद्रादीनां गुह्यं गोप्यं
ते हि अमरत्वाद्यधिकारसंपत्तिरहिताय प्रणवेनोपदिशंति ॥ ॥ तथोक्तप्रणवसमाधिजनितस्य तत्व
वेदनस्य फलं दर्शयति ॥ ॥ य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमिति ॥ ॥
यः पुमान् संन्यासादूर्ध्वं प्रणवेन ब्रह्मतत्वसमाधिं कुर्वन्नेवं वेदांतमहावाक्योक्तप्रकारेण ॥ वेद ब्रह्म
तत्वं जानाति ॥ असौ ज्ञानी स्वस्मिन्नविद्याकल्पितजीवत्वापादकं परिच्छेदमपहाय देशकालवस्तुपरि
च्छेदशून्यस्य ब्रह्मणो महिमानं महत्वं ॥ आप्नोति तत्ववेदनेन जीवत्वकृतभ्रमो निवर्तते ब्रह्मस्वभा
व आविर्भवति ततो जीवन्मुक्तो भवतीत्यर्थः ॥ तस्य जीवन्मुक्तस्य प्रारब्धभोगक्षये देहपाते सति ॥ तस्मा
त्कल्लाविद्यानिवर्तकाद्वेदनाद्विद्यातत्कार्यतद्वासनालेशरहितस्य मुख्यस्य ब्रह्मणो महिमान

ना·उ·भा· प्राप्नोति॥ विदेहमुक्तिर्भवतीत्यर्थः॥ सन्यासपुरःसरांतत्वैमुपसंहरति॥ इत्युपनिषदिति॥ इत्येवमतीतेन ग्रंथेन प्रोक्तायेयंवि विद्या
द्यासेयमुपनिषद्रहस्यविद्या॥ अथमीमांसा॥ तत्र संन्यासरूपस्य चतुर्थाश्रमस्य सद्भावः तृतीयाध्यायस्य चतुर्थपादे चिंति
७५ तः॥ नास्त्यूर्ध्वरेताः किं वा अस्ति नास्त्यसावविधानतः। वीरघाती विधेः कृतावंधपंग्वादिगा स्मृतिः॥१॥ अस्ति पूर्वविधेः कृत
वीरहा नाग्निकोऽगृही। अर्थादेः प्रथगुक्तत्वात् स्कान्नाश्रूयते विधिः॥२॥ पूर्वाधिकरणे स्वतंत्रविज्ञानं कर्म[illegible]रपेक्ष्यण पुरु
षार्थसाधनमित्युक्तं तस्य चात्मज्ञानस्योर्ध्वरेतस्स्वाश्रमेषु सफलत्वात्। आश्रमसद्भावश्चिंत्यते तत्र नास्त्यूर्ध्वरेता इति प्राप्तं
ध्य कुतः वि[illegible]भावात्। त्रयो धर्मस्कंधाः यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीय
इत्यत्र यज्ञाद्युपलक्षितगार्हस्थ्यस्य तपःशब्दलक्षितवानप्रस्थस्य च नैष्ठिकब्रह्मचर्यस्य च परामर्शमात्रं गम्यते न तु
विधिरुपलभ्यते॥ न चापूर्वार्थत्वेन विधिः कल्प्ययितुं शक्यः। वीरहा वा एष देवानां योऽग्निमुद्वासयते इत्यग्न्युद्वासन ७५
स्य लक्षणस्य गार्हस्थ्यपरित्यागस्य निंदितत्वात्। चत्वार आश्रमा इति स्मृतिस्तु गार्ह[illegible]स्थ्यधर्मानधिकृतांधपंग्वादि

व्रती

विषयाभविष्यंति॥ नह्यंधस्या[illegible]थ्यावेक्षणोपेते कर्मणि अधिकारोस्ति नापि पंगोर्विष्णुक्रमणाद्युपेते कर्मण्यधिकारः
तस्मात्चक्षुरादिपाटवयुक्तस्य आत्मज्ञानोपयुक्तऊर्ध्वरेतसां आश्रमो नास्तीति प्राप्ते ब्रूमः अस्त्यूर्ध्वरेतसामाश्र
मो विध्यश्रवणेप्यपूर्वार्थत्वेनुकल्पयितुं शक्यत्वात् नच वीरघातदोषः उत्सन्नाग्निविषयत्वाद्वीरहत्यायाः॥ यत्वं
धविषयत्वं स्मृतेरुक्तं तदसत् अथ पुनरव्रती वा स्नातको वा स्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत त
दहरेव प्रव्रजेदिति विरक्तानां गार्हस्थ्यानधिकृतानां पृथक्संन्यासविधानात् नच चक्षुरादिपाटववतां आश्रमां
तरविध्यभावः जाबालश्रुतौ प्रत्यक्षविध्युपलंभात् ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेदिति॥
तस्मादस्त्याश्रमांतरं तत्रैवान्यच्चिंतितं लोककाम्याश्रमी ब्रह्मनिष्ठामर्हति वा न वा॥ यथावकाशं ब्रह्मैव ज्ञातुमर्ह
त्यवारणात्॥ १॥ अनन्यचित्तता ब्रह्मनिष्ठासौ कर्मठे कथं॥ कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति नेतरः॥ २॥ त्रयो धर्मस्कं
धा इत्यत्राश्रमानधिकृत्य सर्व एते पुण्यलोका भवंतीति आश्रमानुष्ठायिनां पुण्यलोकफलमभिधाय ब्रह्मसंस्थोमृत

पि संभाव्यते आश्रमकर्माण्यनुष्ठाय यथावकाशं ब्रह्मनिष्ठायाः कर्तुं शक्यत्वा नु ॥ नहि लोककामी ब्रह्म न जानीयादिति निषे
ना॰उ॰भा॰ त्वमेलीति मोक्षसाधनत्वेन ब्रह्मनिष्ठा प्रतिपाद्यते सेयं ब्रह्मनिष्ठा पुण्यलोककामिनः आश्रमिणो ब्रह्मनिष्ठेति शास्त्रे ब्रूमः
७६ ब्रह्मनिष्ठा नाम सर्वव्यवहारपरित्यागे सत्यनन्यचित्ततया ब्रह्मणि परिसमाप्तिः ॥ न चासौ कर्मठस्य संभव
ति कर्मानुष्ठानत्यागयोः परस्परविरोधात् ॥ तस्मात्कर्मत्यागिन एव ब्रह्मनिष्ठेति स्थितं ॥ अस्मि
न्नर्थे श्रुतिस्मृतिवाक्यानि संक्षिप्य प्रदर्श्यंते ॥ त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमं ॥ त्यजतैव हि
विज्ञेयं त्यक्तुः प्रत्यक्परं पदं ॥ मुक्तेश्च बिभ्यतो देवा मोहेनापिदधुर्नरान् ॥ ततस्ते कर्मसंयुक्ताः प्रावर्तं
त विचक्षणाः ॥ अतः संन्यस्य कर्माणि सर्वाण्यात्मावबोधतः ॥ हत्वाविद्या धियैवेयान्तद्विष्णोः परमं
पदं ॥ इति भल्लुनिरेखा यामासनं ति ॥ सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः ॥ यदक्षरं परं ब्रह्म तत्सू
त्रमिति धारयेत् ॥ ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ॥ ज्ञानमेव परं तेषां पवित्रं ज्ञानमु
च्यते ॥ अग्नेरेव शिखा नान्या यस्य ज्ञानमयी शिखा ॥ स शिखीत्युच्यते विद्वानितरे केशधारिणः ॥

X राम ७६

इत्याथर्वणिका आमनंति॥ कुटुंबं पुत्रदारांश्च वेदांगानि च सर्वशः॥ यज्ञं यज्ञोपवीतं च त्यक्त्वा गू य
ढश्चरेन्मुनिः॥ इति बाष्कलशाखायामामनंति॥ सशिखान्केशान्निकृंत्य विसृज्य यज्ञोपवीतं भूःस्वा
हेत्यप्सु जुहुयात्॥ त्रिदंडं कुंडिकां शिक्यं त्रिविष्टब्धमुपानहौ॥ शीतोपघातिनीं कंथां कौपीनं [illegible] च्छा
तथा दनं॥ पवित्रं स्नानशाटिं च उत्तरासंगमेव च॥ यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः॥ इति कठ आमनं
वा ति॥ अथ परिव्राड्विवर्णवासा मुंडो परिग्रहः॥ शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवतीति जाबालि
का आमनंति॥ अथ परिव्राडेकशाटी मुंडो दरपात्रः आरण्यो नित्यो भिक्षार्थं ग्रामं प्रविशेद्दासायं प्रद परिहृतो
क्षिणेनाविचिकित्सन्सार्ववर्णिकं भैक्ष्याचरणमभिशस्तपतितवर्जं अयज्ञोपवीती शौचनिष्ठः कामं एकं वै
य णवं दंडमाददीतेति मैत्रावरुणीशाखायामामनंति॥ कंथाकौपीनोत्तरासंगानां त्यागिनो यथाजात
रूपधरा निर्ग्रंथा निःपरिग्रहा इति संवर्तश्रुतिः॥ गृहस्थो ब्रह्मचारी वानप्रस्थो लौकिकाग्नीनुदराग्नौ सम

ना॰उ॰भा॰
७७

रोपयेत्॥ गायत्रीं चस्वमुखाग्नौ समारोपयेत्॥ उपवीतं भूमौ वाप्सु वा विसृजेदिति वारुणी श्रुतिः॥
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः॥ आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्॥ एतद्धि
जन्मसाफल्यं ब्राह्मणस्य विशेषतः॥ प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा॥ यदा तु विदितं तत्त्वं
स्यात्परं ब्रह्म सनातनं॥ तदैकदंडं संगृह्य उपवीतं शिखां त्यजेत्॥ इत्यादयः स्मृतय उदाहार्याः॥ सन्या
सस्यैव ब्रह्मज्ञानप्रत्यंतरंगसाधनत्वात् जिज्ञासोः सन्यास एव युक्तो न तु कर्मानुष्ठानमित्युक्तं॥ तर्हि
निष्पन्नेपि तत्त्वसाक्षात्कारे कर्माण्यनुष्ठीयंतां इत्येतां शंकां निवारयितुं तत्त्वज्ञानिव्यवहाराणां लौकिकानां
सर्वेषां यागरूपत्वमुच्यते॥ नहि यागस्य यागाधिकारशंकास्ति॥ ४॥ इत्येकोनाशीत्यनुवाकः॥ ७९॥ अ
तोऽस्मिन्ननुवाके पूर्वभागेन योगिनोवयवाः यज्ञांगद्रव्यत्वेनाम्नायंते॥ ॥तस्यैवं विदुषो यज्ञस्यात्मा यज राम ७७
मानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोग्नि

र्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीदिति॥ ॥अस्य पूर्वोक्तस्य
सन्यासिन एवं विदुषः पूर्वोक्तेन प्रकारेण ब्रह्मणो महत्वं साक्षात्कृतवतो जीवन्मुक्तस्य संबंधी योयं यज्ञोस्ति
तस्य यज्ञस्य देहेंद्रियादिसाक्षी य आत्मा स एव यजमान सहश्राः तस्य स्वामित्वात्॥ या तु तदंतःकरणे श्र
द्धारूपा चित्तवृत्तिः सा पत्नी॥ यच्छरीरं तदिध्मः॥ एवमुरआद्यवयवानां वेद्यादिरूपत्वोपचारो योजनीयः॥
यस्तु दमः स शमयिता सर्वेंद्रियोपशमनकारी चित्तवृत्तिविशेषः तस्य दक्षिणारूपत्वमुन्नेयं॥ एवं वा
गादीनां होत्रात्वादिरूपत्वमप्युन्नेयं॥ ॥अस्यानुवाकस्य द्वितीयभागेन योगिव्यवहारस्य ज्योतिष्टो
मावयवक्रियारूपत्वं दर्शयति॥ ॥यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्र
मते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य
विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनं सायं च तानि सवनानीति॥ ॥याव

ना॰उ॰भा॰ तं कालं भोजनमकृत्वा ध्रियते विदुषा धार्यते सा हि त्ति दीक्षाख्यसंस्काररूपा ॥ एवं भोजनादौ हविरादि

७८ रूपत्वमुन्नेयं ॥ ॥ अथास्यानुवाकस्य तृतीयभागेन जीवन्मुक्तस्य संबंधिनां कालविशेषाणां नाना

विधयागरूपत्वमाह ॥ ॥ ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतव

स्ते पशुबंधा ये संवत्सराश्च परिवत्सराश्च ते हर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ इति ॥

[redacted] संवत्सराश्च परिवत्सराश्चेति चकाराभ्यां इदावत्सरानुवत्सरेद्वत्सराः समुच्चीयंते ॥

प्रभवादिषु षष्टिसंवत्सरेष्वेकैकं पंचकं युगशब्दाभिधेयं तस्मिन्युगे पंचानां क्रमेण संवत्सरपरि

वत्सर इदावत्सरानुवत्सर इद्वत्सरसंज्ञकाः द्रष्टव्याः ॥ तथा च काल निर्णयसंग्रहकारेणोदाहृतं ॥

वर्षाणां प्रभवादीनां पंचके पंचके युगं ॥ संपरीदान्विदित्येतच्छब्दपूर्वास्तु वत्सरा इति ॥ अहर्गणा द्विरात्रा

दयः ॥ सर्ववेदसं सर्वस्वदक्षिणं ॥ अत्रैत[illegible]नाहोरात्रादिवत्सरांतं सर्वकालसमष्ट्युपलक्षितये

णो

राम

७८

गिन आयुर्वैलक्ष्यते॥यदायुस्तत्सर्वस्वदक्षिणोपेतं सत्रमित्यर्थः॥अस्यानुवाकस्य चतुर्थभागेन सर्वज्ञानात्मकं यो ऽग्निमुपासीनस्य क्र
मसुक्तिरुक्षणं फलमाह॥एतद्वैजरामर्यमग्निहोत्रं ॥ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य
सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चंद्रमसः सायुज्यं ॥ सलोकतामाप्नोत्येतौ वै सूर्याचंद्रमसोर्म
हिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमा[प्नो]ति तस्माद्ब्रह्मणो महिमानं॥जरामरणावधिकं यद्योगी च
रितं अस्ति तदेतद्वै दोक्ताग्निहोत्रादि सह स्वसंवत्सरसत्रांतकर्मस्वरूपमित्येवं॥यः पुमानुपासीन उत्तरायणे म्रियते स उपासको
देवानामिंद्रादीनां महिमानमैश्वर्यं प्राप्य तदूर्ध्वमादित्यस्य सायुज्यं सहवासं तादात्म्यं वा भावनातारतम्येन प्राप्नोति अथ पू
ण्ये वोक्तिवैलक्ष्ये नय उपासको दक्षिणायने म्रियते स उपासकः पितॄणामग्निष्वात्तादीनां ऐश्वर्यं प्राप्य चंद्रमसः सायुज्यं पूर्व
वत्प्राप्नोति॥य एवमेतौ सूर्याचंद्रमसोर्महिमानौ अनुभवन् ब्राह्मणस्तत्त्वं सगुणब्रह्मरूपं हिरण्यगर्भं विद्वान्तल्लोकवासि
नां उपदेशेन उपासीनो ऽभिजयति हिरण्यगर्भरूपसाक्षात्कारं प्राप्नोति साक्षात्कारात्तल्लोकवासि देहपातादूर्ध्वं हिरण्यगर्भलोकं गत्वा तत्र
ब्रह्मणो हिरण्यगर्भस्य महिमानमैश्वर्यं प्राप्नोति तत्रोत्पन्नब्रह्मसाक्षात्कारः तस्मात् ज्ञानाद्ब्रह्मलोकविनाशात् ऊर्ध्वं सस्यत्

नादिलक्षणस्यब्रह्मणोमहिमानंमहत्त्वंचप्राप्नोति॥ ॥इत्युपनिषत्॥ ॥इतिवाक्येनयथोक्तविद्यायाःतत्प्रतिपादक
ग्रंथस्यचोपसंहारःक्रियते॥अथमीमांसा॥तृतीयाध्यायेतृतीयपादेचिंतितंपुंविद्यैकानाभिन्नावा॥तैत्तिरीयकेतांडि
नोःमरणावभृथत्वादिसाम्यादैकेतिगम्यते॥बहूनांरूपभेदेनकिंचित्साम्यस्यबाधनात्॥नविद्यैक्यंतैत्तिरीयेब्रह्म
विद्याप्रशंसनात्॥१॥अस्तितैत्तिरीयेपुरुषविद्या॥तस्यैवंविदुषोयज्ञस्यात्मायजमानइति॥तथातांडिशाखायामपिश्रू
यते॥पुरुषोवावयज्ञइतिसेयमेकैवपुरुषविद्यायन्मरणंतदवभृथः॥मरणमेवावभृथइत्युभयत्रसमानधर्मश्रवणात्सा
घ तःसवनादीनांसमानत्वादितिप्राप्तेब्रूमः॥एवंस्वरूपस्यभूयान्॥तत्रभेदउपलभ्यते॥तथाहि॥विदुषोयोयज्ञस्तस्यय राम
ज्ञस्यात्मेतितैत्तिरीयकेव्यधिकरणेषष्ठ्यौ।अन्यथाआत्मायजमानइतिव्याघातात्॥विद्वानेवयज्ञःसएवयजमानइति ७९
कथंनव्याहन्येत॥तांडिनांतुपुरुषयज्ञयोःसामानाधिकरण्यंश्रुतमित्येकोरूपभेदः॥आत्मयजमानादिकंचसर्वत्रश्रुतं
तांडिशाखायांनोपलभ्यते॥यत्तुतांडिनामुपलभ्यतेत्रेधाविभक्तस्यायुषःसवनत्रयमित्यादिनतत्किंचिदपितैत्तिरीय

केपश्यामः॥अतोमरणावभृथत्वाद्यस्यसाम्येपिबहूनांरूपभेदानांविद्यमानत्वात्॥विद्ययोर्भेदएवोचितः॥अपिचनतैत्तिरीयाणामु
पासनमिदमुपलभ्यते॥किंतर्हिब्रह्मविद्याप्रशंसानस्यैवंविदुषइतिब्रह्मविदोनुक्रमणात्॥तस्मान्नविद्यैक्यशंकायाअप्यवकाशो
स्तिक्रममुक्तिस्तुतस्मिन्ननुवाकेतत्वज्ञानिसेवानिमित्ताभिहितेत्यशेषमतिमंगलं॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥
पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥३॥इतिनारायणीयोपनिषद्भाष्येअशीत्यनुवाकः॥ ८०॥ ८०॥ ८०॥
शके१७५२विकृतिनामसंवत्सरेज्येष्ठवद्यचतुर्थ्यांरात्रौसमापितं॥स्वार्थायपरार्थायचमयलात्॥ दृष्टांतोनैवदृष्टस्त्रिभुवनजठ
रेसद्गुरोर्ज्ञानदातुःस्पर्शश्चेत्तत्रकल्प्यःसनयतियदहो [illegible] स्वर्णतामश्मसारं॥नस्पर्शत्वंतथापिश्रितच
रणयुगेसद्गुरुःस्वीयशिष्येस्वीयंसाम्यंविधत्तेभवतिनिरुपमस्तेनसोलौकिकेन॥१॥ज्ञानामृतेनतृप्तस्यकृतकृ न
त्यस्ययोगिनः॥नैवास्तिकिंचित्कर्तव्यंअस्तिचेन्नसतत्वविद्॥येचसंतानजादोषायेचस्युःकर्मसंभवाः॥सन्य
स्तस्तुदहेत्सर्वांस्तुषाग्निरिवकांचनं॥२॥शाकेग्नीष्वभूतुल्येलिखदापाख्यजःसुधीः॥शिवरामउपनिषद्भाष्यंदेवधराभिधः॥

ना॰उ॰भा॰

१६०

इतिनारायणभाष्यं